संस्कृत-विमर्शः

नवशृङ्खला

अङ्कः २

वर्षः २००९

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृत-विमर्शः

नवशृङ्खला

अङ्कः-२

वर्षः २००९

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रकाशकः
कुलसचिव
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
५६-५७, इन्स्टीट्यूशनल एरिया
जनकपुरी, नवदेहली-११००५८

e-mail : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in

© राष्ट्रियसंस्कृतसंस्थानम्

ISSN : 0975

संस्करणम् : २००९

वार्षिकसदस्यताशुल्कम्-रू० १००.००

मुद्रकः
अमर प्रिंटिंग प्रेस, दिल्ली-११०००९
दूरभाषः- ९८७१६९९५६५, ९८९१७०९२१७
e-mail-amarprintingpress@gmail.com

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

SAMSKRITA-VIMARSAH

New Series

Vol.-2 **Year 2009**

Rashtriya Sanskrit Sansthan

Deemed University

New Delhi

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

Publisher
Registrar
Rashtriya Sanskrit Sansthan
Deemed University
56-57, Institutional Area,
Janakpuri, New Delhi - 110 058

e-mail : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in

© Rashtriya Sanskrit Sansthan

ISSN : 0975

Edition - 2009

Annual Subscription : Rs. 100-00

Printed at :
Amar Printing Press, Delhi - 9
Ph., 9871699565, 9891709217
e-mail-amarprintingpress@gmail.com

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परामर्शदातृ-समितिः

१. प्रो॰ रामकरणशर्मा, कुलपतिचरः,
सम्पूर्णानन्द-दरभङ्गासंस्कृतविश्वविद्यालययोः,
विज्ञानविहार, नई दिल्ली

२. प्रो॰ गयाचरणः त्रिपाठी, अध्यक्षः,
कलाकोशस्य, इन्दिरागाँधीराष्ट्रीयकलाकेन्द्रे,
१२६, खेलगाँव, नवदेहली

३. प्रो॰ अशोककालिया, सचिवः,
संस्कृतपरिषदः,
हज़रतगंज, लखनऊ,
उत्तर प्रदेश

४. प्रो॰ दीप्ति त्रिपाठी,
ई-२३२५, पालमविहार, गुड़गाँव, हरियाणा

५. प्रो॰ अभिराजराजेन्द्रमिश्रः, कुलपतिचरः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
सनराइज़विला, लोअरसमरहिल,
शिमला, हिमाचल प्रदेश

सम्पादक-मण्डलम्

१. प्रो॰ राधावल्लभः त्रिपाठी
कुलपतिः,
राष्ट्रियसंस्कृतसंस्थानमानितविश्वविद्यालयस्य

२. प्रो॰ रामानुजदेवनाथः
प्राचार्यः, शृङ्गेरीपरिसरस्य

३. प्रो॰ आजादमिश्रः
प्राचार्यः, भोपालपरिसरस्य

४. डॉ॰ प्रकाशपाण्डेयः
प्राचार्यः, गरलीपरिसरस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ADVISORY-BOARD

1. Prof. Ramkaran Sharma, Former Vice Chancellor, (Sampoornanand-Darbhanga Sanskrit Universties), Vigyan Vihal, New Delhi
2. Prof. Gaya Charan Tripathi, Head of Kalakosha, Indira Gandhi National Centrs For the Arts, 126, Khel Gaom, New Delhi
3. Prof. Ashok Kaliya, Secretary Sanskrit Parishad, Hzarat Gang, Lakhnow, U. P.
4. Prof. Dipti Tripathi E-2325, Palam Vihar, Gurgaon, Hariyana
5. Prof. Abhiraj Rajendar Mishra, Former Vice Chancellor, Sunrise Vila, Lower Summer Hill, Shimla, H. P.

EDITORIAL-BOARD

1. Prof. Radhavallabh Tripathi
Vice Chancellor,
Rashtriya Sanskrit Sansthan,
New Delhi
2. Prof. Ramanuj Devanantha
Shringeri Campus
3. Prof. Azad Mishra
Principal, Bhopal Campus
4. Dr. Prakash Pandey
Principal, Garli Campus
Himachal Pradesh

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सम्पादकीयम्

सुप्रतिष्ठां विमर्शस्य संस्कृते जागतीं प्रभाम्।
विधातुञ्च विचाराणां रीतिमाख्याति भारतीम्॥

अथ सुरभारत्याः समुपासनां विदधतीषु भारतीशोधपथमारूढासु अभिनवार्थप्रकल्पनाय विद्वद्भिर्भृशमासेव्यमानासु चिरस्य प्रतिष्ठितासु पत्रिका-स्वनन्यस्थानार्हासु चान्यतमो हि संस्कृतविमर्शः। प्रागस्मिन्नवसरं कामयमाना लेखा नानाविषयगर्भा अहमहमिकायमाना आसन् प्रतीच्यपाश्चात्त्यविदुषामिति नातिशयोक्तिः। विमर्शे समीक्षिता निबन्धा विद्वन्मचर्चिकाणां शोधशेमुषीकाणाञ्च कटाक्षवीक्षणैराप्लाविता अतितरां पाण्डितीप्रकर्षस्य निकषोपलाः समजायन्त। तामिमां वाचोपासनपरम्परां विवादभूयिष्ठामपि निर्विवादां साधीयसा प्रकारेणाक्षुण्णं रक्षितुमेव पुनरयं संस्कृतविमर्शः समुद्धृतो बंहिष्ठैः प्रयासैः। सम्प्रति पदमद्वितीयं द्वितीयं निदधाति मुदा। प्रथमपदं समेषामालोकपथि अभिविन्यस्तं संस्कृतजगता समाद्रियतेत्यत्र नानाकोणेभ्यः सम्प्राप्तो विदुषामाशीर्निचयस्तन्विमर्शाविष्कारोत्साहश्च प्रमाणम्।

यथापूर्वमयं विमर्शो भागत्रितयेन राराष्टि विमर्शो, रिक्थः, समीक्षा चेति। आद्यो संस्कृत-हिन्दी-आङ्ग्लभाषाभिरभिनिबद्धानुपमनिबन्धमयः, द्वितीयोऽप्रकाशित-मातृकाप्रकाशः, तार्तीयीकश्च सद्यःप्रकाशितग्रन्थसमीक्षकः। त्रेधा प्रवृत्तोऽयं विमर्शः आविर्भूयोपचयकामोऽध्वनि प्रागल्भ्ये दृढतरं पदं निधत्ते।

अस्मिन्नभिनवेऽङ्के प्रथमे भागे तत्तच्छास्त्रमर्मोद्घाटका निबन्धा बहुश्रुतैः भारतीसमाराधकैः विहितभूरिश्रमैर्विद्वद्भिः मण्डिता राजन्ते। इमे च प्रबन्धाः एकदा शास्त्रतात्पर्यानुवादपराः सन्तोऽपि अपरतो नानामतविभेददर्शनतत्परा अग्रे सुबहु चर्चाया विचारस्य च सम्प्रेरकाः स्युरिति दृढं विश्वसिमः। एतेषु कालिदासेश्शृङ्गारस्यान्वर्थता-प्रतिपादनपरः गहनविचारसमन्वितो लेखः पण्डितप्रवरैः श्रीमद् राममूर्तित्रिपाठि-भिर्दिवङ्गमनांत् कतिपयदिनेभ्यः प्राक् सानुग्रहं विमर्शे प्रकाशनाय प्रेषितः, स च तेभ्यः श्रद्धाभिव्यक्तिपुरस्सरं प्रकाश्यते। माध्यमिके रिक्ताभिधे भागे *न्यायपदार्थदीपिकाख्यो* मातृकायाः भृशं परिश्रम्य समुद्धृतः सुष्ठु सम्पादितश्च विद्वन्मतल्लिकाभ्यां **श्रीहरेरामत्रिपाठि-श्रीरामसुदर्शनमिश्राभ्याम्**। साहाय्यं च व्यधायि **श्रीकृष्णमुरारि-माणित्रिपाठिना।** ग्रन्थोऽयमन्यर्थनामा पदार्थानां परिचयं न्यायमतनुल्लङ्घ्य सविस्तरं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रस्तौति। एषो ग्रन्थः **श्रीरङ्गोजीभट्टसूनुना श्रीकौण्डभट्टेन** विरचितो नाद्यावधि प्रकाशन्नीतोऽयमद्य विमर्शे प्राप्तावकाशः तच्छोभां विवर्धयतितमाम्। तृतीये भागे संस्कृतक्षेत्रे प्राप्यमाणयशसा **शेल्डान पोलोक**–नाम्ना विदुषा नितरां परिश्रम्य गभीराध्ययनफलेग्रहिरूपेण विरचितस्य *The Language of the Gods in the World of Men* इति ग्रन्थस्य समीक्षा व्यधायि। ग्रन्थस्योपादेयता प्रत्यपादि, एतादृग्ग्रन्थप्रणयनस्यावश्यकता च न्यरूपि।

प्राकाश्यन्नीयमाने द्वितीयेऽङ्के, निबन्धान् मण्डितवतो विपश्चिदपश्चिमान् प्रमुदितान्तःकरणा वयं समभिनन्दामः कार्तज्ञ्यवचस्सुमनोभिराधमर्ण्यं च बिभर्मः।

विमर्शप्रकाशनोद्यमे सहकृतवद्भ्यो विद्वद्भ्योऽधिकारिकर्मकरेभ्यो मुद्रकेभ्यश्च साधुवादान् सहर्ष वितनुमः।

सुसंस्कृतविमर्शोऽसौ विद्वद्भिर्भृशमीक्षितः।
ज्ञानालोकदृशा भूरि भूयाल्लोकप्रकाशकः॥

राधावल्लभः त्रिपाठी

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषयानुक्रमणिका

विमर्शः

१.	साम्प्रतसंस्कृतसाहित्ये यथार्थनिरूपणम् : समस्याः सम्भावनाश्च	हर्षदेवमाधवः	१
२.	ज्ञानानां विशिष्टवैशिष्ट्यावगाहितायाः विमर्शः	नवीन होळ्ळः	८
३.	मीमांसकसम्मतः शब्दार्थविचारः	सुब्राय.वि.भट्टः	१६
४.	अष्टन्-स्वरविचारः	सि यस् यस् नरसिंहमूर्तिः	२१
५.	अकथितञ्च इति सूत्रार्थविचारः	चन्द्रशेखरभट्टः	३३
६.	जैमिनिनये देवतास्वरूपविमर्शः	सूर्यनारायणभट्टः	४३
७.	न्यायमनोविज्ञानयोर्दृष्ट्या प्रत्यक्षलक्षणमीमांसा	रामचन्द्रुल बालाजी	४९
८.	निपातातिरिक्तेत्यादिनियमविमर्शः	श्यामसुन्दरः ए	५८
९.	सिद्धान्तपक्षतानिष्कर्षः	अनन्तकृष्णः	६४
१०.	श्रृंगार की अन्वर्थता और 'कुमारसम्भव' की परम्परा	स्व. आचार्य राममूर्ति त्रिपाठी	७०
११.	हेमचन्द्राचार्य-निर्दिष्ट वाक्यविन्यास पद्धति का विश्लेषण	वसन्तकुमार म. भट्ट	८२
१२.	अभावज्ञान की समस्या : एक अनुभववादी समाधान	सच्चिदानन्द मिश्र	९०
१३.	महर्षि भरद्वाज की दृष्टि में अन्तरिक्ष एवं सूर्य-रश्मि विज्ञान	शैलजा पाण्डेय	१०४
१४.	धर्मतंत्र का सैद्धान्तिक आधार	प्रमोद कुमार दुबे	११६
१५.	'विश्ववल्लभः' में द्रुमचित्रीकरण विज्ञान	हेमलता बोलिया	१३८
१६.	वेदों में ऋत की अवधारणा तथा पुराणों में उसकी सङ्क्रान्ति	राजेन्द्र मिश्र	१४७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१७.	Origin of Environmental Science from Vedas	Shashi Tiwari	156
१८.	Transformation of Poetic Discourse in Dhvani and Structuralist Poetics	Bhavatosh Indra Guru	171

रिक्थः

१९.	न्यायपदार्थदीपिका	हरेराम त्रिपाठी	१८५

समीक्षा

२०.	The Language of the Gods in the world of Men	Radhavallabh Tripathi	227

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विमर्शः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

साम्प्रतसंस्कृतसाहित्ये यथार्थनिरूपणम् : समस्याः सम्भावनाश्च

हर्षदेवमाधवः

विमर्शनात्मके प्रबन्धेऽस्मिन् साम्प्रतसंस्कृतसाहित्ये यथार्थनिरूपणं कथमस्तीति निरूप्यते। अत्र पत्रमञ्जूषा, काक्षेण वीक्षितं, मृगया इत्याद्याधुनिकरचानाभ्यः सन्दर्भान् उद्धृत्य यथार्थनिरूपणप्रकारः विमृश्यते।

व्यावहारिकस्य चिरपरिचितस्य दैनिकजीवनस्य नानावृत्तान्तानां कृतौ सरलायां, लोकव्यवहारप्रयुक्तायां शैल्यां निरूपणं यथार्थवादो वास्तववादो वा कथ्यते साहित्ये। अस्मिन् वादे–

(१) भाषया सारल्यम्

(२) घटनानां सूक्ष्मनिरूपणम्

(३) वार्णनेषु सत्याभासः (Veri similitude)

(४) नितान्तमावश्यकानि तत्त्वानि सन्ति।

(५) अस्य वादस्य पुरस्कर्तारः कवि-लेखका मध्यमनिम्नवर्गमयस्य समाजस्य निरूपणं कुर्वन्ति।

(६) अत्र मध्यमनिम्नवर्गस्य निराशानां, वैफल्यस्य, उपेक्षायाश्चित्रणं भवति।

आङ्गलभाषायां चार्ल्स डिकन्स-बाल्झाक-एमिल झोला तोल्स्तोय्प्रभृतीनां साहित्यस्य मूल्याङ्कनम् अनेन वादेनैव कर्तुं शक्यमस्ति।[१]

सामाजिको वास्तववादः (Social Realism)

अयं वादः साम्यवादप्रचारार्थं रशियादेशे समुत्प.ाः। अन्यसाम्यवादिनां देशेऽस्य प्रचारो जातः। अयं वादः कलाकारं सर्जकं वा समाजवादि-राज्यस्य (socialist)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्राणभूतमङ्गं मन्यते। समाजवादयुक्ते समाजे ये ये प्रश्नाः वर्तन्ते तेषां निरूपणमत्र कलाकारस्य च सर्जकस्य प्रधानध्येयमस्ति।

मिसर्गवादस्य प्रतिक्रियारूपेण वादोऽयं प्रेक्ष्यते समीक्षकैः।[२]

वास्तववादस्य सम्बन्धः वास्तविकतया भवति। अत्र यथार्थनिरूपणं स्वभावोक्त्या क्रियते। तत्त्वज्ञाने वास्तविकताया अर्थः अन्य एव भवतीति प्रसिद्धम्। स्वभावोक्तिमार्गेण गन्तुमौचित्यमपि आवश्यकं वर्तते, स्वभावोक्तिः केवलमभिधा न भवेदित्यपि कविना चिन्तितव्यम्।

अतो निम्नलिखिता विचारा अवधेयाः।

(१) कलायाः कार्यं विश्ववास्तवस्य विश्वसनीयमालेखनं भवति, सत्यम् एवं निकषरूपेण वर्तते।

(२) जनलीवनस्य प्रश्नाः साहित्ये निर्भयतया प्रस्तोतव्याः।

(३) सामाजिक-आर्थिक धार्मिक लौकिकविषमतानां चित्रणमावश्यकम्।

(४) निम्नवर्गीयसमाजस्य सुखदुःखपूर्णाभिः कथाभिः संवेदनाया हृदयविदारकाऽनुभूतिः क्रियते।

(५) सामाजिक्या अभिज्ञतायाः प्रकटीकरणम्।

(६) जवजीवनस्य कुत्सित क्षुद्र-तुच्छाश्लीलाशानां स्पष्टशब्दैर्व्रर्णनम्। जातीयजीवनप्रश्नानां प्रगल्भं निरूपणं वास्तववादस्य विषयोऽस्ति।[३]

(७) वास्तववादाय अनेके पर्यायाः प्रयुज्यन्ते। यथा-

(1) Naive Realism (2) Naturalist Realism (3) Poetic Realism (4) Psychological Realism (5) Dynamic Realism (6) New Realism (7) Subjective Realism (8) Objective Realism (9) Socialist Realism (10) Conscious Realism.

(८) साहित्यकारेण बहिर्विश्वस्य वास्तविकतायाः पुनर्निर्माणं न कर्तव्यम्, किन्तु कृतावेव अपूर्वाया वास्तविकताया सर्जनं कर्तव्यमस्ति।

(९) परिवर्तितसमाजस्य परिवर्तित रीति-संस्कार-विचारधारा-भावावेगानां निरूपणं यथार्थवादस्य ध्येयमस्ति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(१०) साहित्यकारः कोमलललितपदावलीत्यागपूर्वकं कर्कश-तिक्त-वास्तवपार्श्ववर्तिन्या भाषया वरणं करोति।

(११) यन्त्रप्रसूताया जीवनशैल्या यान्त्रिकीकरणं, सामान्यजनदुर्दशा, नगरसभ्यताया दूषणानि-इत्यादयो विषयाः सन्ति।

(१२) यन्त्रप्रसूताया जीवनशैल्या यान्त्रिकीकरणं, सामान्यजनदुर्दशा, नगरसभ्यताया दूषणानि-इत्यादयो विषयाः सन्ति।

(१३) उपेक्षित- समाजं प्रति करुणाशीलतया सर्जकस्य मानवतायुक्तः स्वरः श्रोतुं शक्योऽत्र।

संस्कृते केशवचन्द्रदाश-बनमालीबिश्वाल-कलानाथशास्त्रि-नारायणदाश-राजेन्द्रमिश्र-राधावल्लभादीनां गद्यसाहित्ये, नागार्जुन राधावल्लभ-हर्षदेवमाधव-पद्मशास्त्रि-रामदेव-रमाकान्शुक्ल-वनमाली वि श्वालादीनां काव्येषु वास्तवयुता रचनाधर्मिता दरीदृश्यते।

वस्तुतः काव्यत्वमपि स्यात्। यथा-

आग्रामात् सरकं न यावदासीत् तावच्च दुःखं परं सरकं तूपगतं च तदनुलग्ना विपणिस्तमासादिता। वृत्तिस्तत्सदृशी च तयोपेता सर्वं तुलातोलनी।।[४]

अन्यत् स्वभावोक्तिपूर्णं चित्रं पश्यतु-

स्वखलदक्षरमालाभिर्लुलुलितमसीबिन्दुभिर्व्याप्तम्।
लिखितं स्वयमानीतं लगुडकरेणानतगात्रेण।।

वृद्धेन व्याकुलितां दृष्टिं क्षिपता वेपथुमताऽस्याम्।
पत्रं मञ्जूषायां क्षिप्तं हस्तेन कम्पितेन।।[5]

वर्तमानकाले सर्ववस्तूनां व्यापारीकरणं भवति। मनुष्यजीवनमपि, मनुष्यास्तित्वमपि विपणौ क्रेतव्यं वस्तु सञ्जातम्। पश्यतु काव्यमेकं गजलविधायाम्।

विक्रयार्थं समागततो विपणौ।
निष्क्रयार्थं समागतो विपणौ।।

नैव जाने महार्घतां स्वायाम्।
यन्निमितं प्रचारितो विपणौ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

को नु मां क्रेष्यतीह कैर्मूल्यैः?
वेद्मि नाहं, प्रदर्शितो विपणौ।।

ब्राह्मणो वा वृणोतु चाण्डालः।
स्यामुभाभ्यां समादृतो विपणौ।
स्वाभिमानस्य सङ्कथा व्यथा।
नैष पन्थाः समर्थितो विपणौ।।

स्वर्णशाकावुभावति क्षणिकौ।
आशु विक्रीयते यतो विपणौ।।

अत्र घटतेऽखिलं झटित्येव
प्राग्विचारो न दृश्यते विपणौ।।

स्वैरमुत्सार्यतेऽत्र सत्पुरुषः।
लम्पटो भाति सत्कृतो विपणौ।।

क्वापरत्रार्थसिद्धिरार्तानाम्।
काङ्क्ष्यतेऽथो गवेषितो विपणौ।।

('अभिराज' डॉ. राजेन्द्रमिश्रस्य)

कदाचिद् वक्रोक्तिमार्गेण लक्षणायाः प्रयोगेन यथार्थस्य चित्रणं भवति। यथा–

विक्रय : . . . Sate . . . विक्रयः
अत्र लभ्यते विना ह्रूं
किलोमितेन क्रयणेन सह
सार्धकिलोमिता वञ्चना।
सर्वकारनियुक्त्या सह
कार्यचौर्यं विना मूल्यम्
अपि च
उत्कोचलाभोऽपि निः शुल्कः संयुक्तोऽस्ति।
निर्वाचने
विजयेन सह
भ्रष्टाचारस्य वर्तत उपहारयोजना।
परीक्षाप्रमाणपत्रैः सह

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सङ्गताऽस्ति
वृत्तिप्राप्त्यर्थं चिन्ता।
भवान् जानात्येव यत्
मानवताया नास्ति मूल्यम्
अतः
विक्रयकाले क्षिप्ता सा मार्गे।
यदि भवते रुचिता स्यात् . . . . . ।।[6]

कदाचिद् व्यञ्जनायाः प्रयोगेन वैचित्र्यमार्गण 'सन्निधि' प्रयोगण वा (श्रनगजं चवेपेपवद) यथार्थनिरूपणं मार्मिकं भवति। यथा 'रावणराज्यम्' 'मानचित्रपूरणप्रश्नः' इत्यादिषु काव्येषु।[7]

समस्या : यथा वास्तवनिरूपणं शन्दैरेवाभिधया क्रियते तदा वास्तवस्य चित्रणम् अनाकर्षकं भवति, कदाचित् कविरुपदेशको धर्मगुरुर्भवति, काव्यत्वं शब्देभ्यः स्रंसते। यथा–

पर्याप्तं वरपितृवाञ्छितधनं दातुं न शक्तो यदि
पुत्री तस्य चिरं विवाहविधितो लोके भवेद् वञ्चिता।
देशेऽस्मिन्नपरत्र यापि बहुशः पित्रोर्व्यथा पीडिताः
कन्याः काश्चिदसून् स्वयं जनिगृहे मुञ्चन्ति पाशावृताः।।

एवं स्वतन्त्रे खलु भारते या
कुरीतिरेषा प्रसृता प्रचण्डा।
तस्याः समूलोद्धरणाय लोको
लोके श्वर श्चापि प्रबोधनीयौ।।

(विद्याशङ्कर त्रिपाठी', स्वतन्त्रभारते भयावहा यौतुकप्रथा)[8]

कदाचिद् प्रतिभया रहितं वास्तवनिरूपणं बाललेखनवल्लक्ष्यते। तत्र न काव्यगुणाः तत्र न काव्यगुणाः, न काचिच्चमत्कृतिः, न वक्रोक्तिरपि भवति। यथा–

वायोर्विकाराच्छ्वसनस्य दोषा–
स्तीक्ष्णध्वनि श्चेद् बधिरा भवन्ति।
अन्नेन दृष्टेन मलस्य पीडा
व्याधेर्विकासो हि शरीरनाशः।।[9]

(केशवरामशर्मणः 'पर्यावरणम्' कृतौ)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हरिश्चन्द्र-रेणापुरकरस्य नैकासु रचनासु साम्प्रतविश्वस्य वैखर्यां निरूपणे न काव्यत्वं स्पन्दते। एवं बहबः कवयः साम्प्रतघटनावर्णनेन काव्यत्वसिद्धिमभिलषन्ति। किन्तु प्रत्येकं वारं तत्क्षणमेव रचनापटुत्वे काव्यत्वं विस्मर्यते। साम्प्रतवास्तवस्य, घटनानां वा शब्देहं विधातुं कविना प्रतीक्षा कर्तव्यैव। अन्यथा अनुभूतयः चिरस्थायिन्यो न भवेयुः। यथा–

विमानापहारेच्छयाऽऽरुह्य यानं
नृशसैः समेषां कृतं दिक्पिधानम्।
तथाऽत्रासयन् यात्रिकान् स्वार्थलीनाः
न शक्या दशा वर्णनीयाऽतिदीना।।

('कमलापाण्डेया' विमानापहरणम्।)[10]

अत्र यदि गद्ये पङ्क्तयः स्युस्तदा अभिधाया एव प्रभुत्वस्य अनुभवः स्यात्। अत्र घटनायाः सामान्यवर्णनमेवास्ति। एवमेव सामयिकेषु असङ्ख्य रचना वास्तवस्य नितान्तंनिरूपणं कृत्वा तुष्टिं लभन्ते। अस्मिन् प्रचञ्चे संस्कृतस्य प्रमुखाः कवयोऽपि वशीभूता वर्तन्ते। गेयता वा छन्दोनैपुण्येन काव्यत्वं न जायते।

कदाचिदतिसरलशैल्यां वास्तवनिरूपणे काव्यत्वं जायते। यथा तेलुगुकाव्यमेकम्–

शैशवे
पुत्तलिकाया माता भूत्वा प्रसन्नाऽभवम्।
अधुना त्वहं
माता च पुत्तलिका चास्मि।[11]

(अञ्नायाः काव्यमिदम्)

संस्कृतकविभिर्वास्तवस्य निरूपणं कौशल्येन सावधानतया च कर्तव्यमितिमे मतिः।

सन्दर्भ

१. टोपीवाला डॉ. चन्द्रकान्तः, परेशनायकः, हर्षवदनः त्रिवेदी 'आधुनिक साहित्य संज्ञा कोश' गुजराती साहित्य परिषद, अमदावादम् १९८६ः पृ. २१२
२. आधुनिक साहित्यसंज्ञा कोशः पृ २२४
३. प्रमोदकुमारः पटेल 'साहित्य मां वास्तवाद' लेखः सं. अमृतलाल याज्ञिक और अन्य 'साहित्य वाद' नवभारत साहित्य मन्दिर, अमदावाद, पृ. ८७-९०

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

४. महाराजदीनपाण्डेयः 'काक्षेण वीक्षितम्' समीक्षा पब्लिकेशन, दिल्ली, पृ.९६
५. त्रिपाठीराधावल्लभः 'पत्रमञ्जूषा' काव्यम्, संप्लवः, प्रतिभाप्रकाशनम्, दिल्ली २०००, पृ. ९
६. हर्षदेवमाधवः 'स्पर्शलज्जाकोमला स्मृतिः' पार्श्व पब्लिकेशन, २००७, पृ. १६
७. हर्षदेवमाधवः 'मृगया', पार्श्व पब्लिकेशन, १९९४ पृ. १६
८. सं. विद्याशङ्कर त्रिपाठी, प्रभुनाथ द्विवेदी 'संस्कृतवाग्विलासः द्वितीयोन्मेषः,' माया प्रकाशन, सन्तरविदासनगरम्, २००५, पृ. ७१-७२
९. अर्वाचीन संस्कृतम् ३०/३-४, पृ. १४
१०. प्रोत्र विद्याशङ्करत्रिपाठी, प्रो. प्रभुनाथ द्विवेदी 'संस्कृतवाग्विलासः' प्रथमोन्मेषः, मायाप्रकाशन, सन्तरविदासनगरम्, २००५ : पृ ४९
११. सं. नूतन जानी 'विश्वकविताः कविता तुलना' श्रीमती एन.डी. ठाकरसी विद्यापीठ, मुम्बई, २००५ः पृ. ११२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ज्ञानानां विशिष्टवैशिष्ट्यावगाहितायाः विमर्शः

नवीन होळळः

रक्तदण्डवान् पुरुषः इति समानशब्दोल्लिखितानां ज्ञानानां क्वचिद् विशिष्टवैशिष्ट्यावगाहित्वं क्वचिद् विशेष्ये विशेषणमिति रीत्या अवगाहित्वमिति वैलक्षण्यमङ्गीक्रियते। अत्र प्रमाणं युक्तिरेव। निरुक्ताकारकस्य कस्यचिज्ज्ञानस्य रक्तदण्डवान् न वा इति संशयनिवर्तकत्वं कस्यचित् तदनिवर्तकत्वमिति, विशिष्टवैशिष्ट्यावगाहिज्ञाने रक्तदण्डवान् पुरुष इत्याकारके अयमेव विशेषः - अत्र मुख्यविशेष्ये पुरुषादौ विशेषणीभूतदण्डांशे रक्तत्वादिकमपि परम्परासम्बन्धेन विशेषणीभूय भासते इति। एतादृश-वैशिष्ट्यावगाहने च विशेषणतावच्छेदकीभूतरक्त-त्वादिधर्मप्रकारदण्डादिविशेष्यकः रक्तो दण्ड इत्या-द्याकारको निश्चयः कारणमिति सयुक्तिकं यथाशास्त्रं विविधमतविमर्शनपूर्वकं साधीयसा प्रकारेण विमृश्य निश्चिनोति प्रस्तोता।

'घटमहं जानामि' इत्यापामरलोकानामबाधितप्रतीतिः ज्ञानानाम् ऐन्द्रियकत्वं साधयति। बाह्येन्द्रियागोचरस्य ज्ञानस्य अन्तरिन्द्रियग्राह्यत्वेन प्रत्यक्षत्वमुपपादयन्ति न्यायविदः। युक्तिबलात्तु अतीन्द्रियमपि किञ्चिज्ज्ञानं निर्विकल्पकाख्यं निष्प्रकारविशेष्यसंसर्गकं सिद्ध्यद् अनुव्यवसीयमानेन घटादिव्यवसायेन सविकल्पकाख्येन सह ज्ञानानां स्वभाववैचित्र्यमादधाति सप्रकारकत्वनिष्प्रकारत्वाभ्याम्।

सविकल्पकानां स्वभाववैचित्र्यम्

ऐन्द्रियकेष्वपि ज्ञानेषु स्वभाववैचित्र्यमुच्चावचमाविष्कृतं प्रमाणशास्त्रे। तत्र प्रत्यक्षत्वानुमितित्वादि- वैजात्येन वैचित्र्यं 'साक्षात्करोमि, अनुमिनोमि, उपमिनोमि, शाब्दयामि' इत्याद्यनुव्यवसायगम्यं सामग्रीभेदप्रयुक्तम्। अनुभवत्वस्मृतित्वाभ्यां वैचित्र्यं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'अनुभवामि, स्मरामि' इति प्रतीतिसाक्षिकं सामग्रीभेदप्रयुक्तम्। अननुगताभ्यां संशयत्वनिश्चत्वाभ्यां वैचित्र्यामपि 'सन्देह्मि, निश्चिनोमि' इति प्रतीतिसाक्षिकमेव सामग्रीभेदप्रयुक्तम्।

क्वचित्तु युक्तिबलादेव वैचित्र्यमास्थीयते, यथा धर्मितावच्छेदकपर्वतत्त्वावच्छेदेन विधेयवह्न्यवगाहितया तादृशपर्वतत्त्वसामानाधिकरण्यमात्रेण तादृशवह्न्यवगाहितया च वैचित्र्यं समानाकारकयोरपि 'पर्वतो वह्निमान्' इति ज्ञानयोः। विभिन्नरूपावच्छिन्नधर्मिताकयोः 'द्रव्यं वह्निमत्, ह्रदो वह्न्यभाववान्' इति ज्ञानयोः प्रतिबध्यप्रतिबन्धकभावविरहेण समानरूपावच्छिन्नधर्मिताकत्वविवक्षणस्यावश्यकत्वेऽपि 'काञ्चनमयह्रदो वह्निमान्, रजतमयह्रदो न वह्निमान्' इति ज्ञानयोः प्रतिबध्यप्रतिबन्धकभावविराहोपपादनाय, धर्मितावच्छेदकतापर्याप्तेः प्रवेशने 'काञ्चनमयह्रदो वह्निमान्, ह्रदो न वह्निमान्' इति बुद्ध्योः क्वचित् प्रतिबद्ध्यप्रतिबन्धकभावोऽनुभूयमानः नोपपद्यते। अतो ज्ञानानां धर्मितावच्छेदकावच्छेदेन विधेयावगाहित्वं, ज्ञानयोरन्यतरस्य तद्वत्तायाः प्रतिबध्यप्रतिबन्धकभावे तन्त्रत्वं चोपेयते। तथा च 'ह्रदो न वह्निमान्' इति बुद्धेः ह्रदत्वावच्छेदेन वह्न्यभावरूपविधेयावगाहितया 'काञ्चनमयह्रदो वह्निमान्' इति बुद्धौ प्रतिबन्धकतोपपद्यते। तत्र बुद्धौ क्वचित् 'ह्रदो वह्न्यभाववान् इति ज्ञानस्य, सर्वोषं 'रजतमयह्रदो वह्न्यभाववान्' इत्यादीनामधिकावगाहिज्ञानानां चाप्रतिबन्धकत्वमपि धर्मितावच्छेदकह्रदत्वसामानाधिकरण्यमात्रावगाहितयोपपद्यते। तदेतत् धर्मितावच्छेदकवच्छिन्नत्वावगाहित्वतदनवगाहित्वाभ्यां वैचित्र्यं समानाकारकाणां समानजातीयानामपि ज्ञानानामतो निखिलप्रत्यक्षत्वादिवैजात्यसङ्कीर्णं तत्। प्रत्यक्ष इव अनुमित्युपमितिशाब्दादिषु अस्याः द्वयीरीतेरुपलम्भात्।

इत्थमेव विशिष्टवैशिष्ट्यावगाहितया विशेष्ये विशेषणमिति रीत्यावगाहितया च वैचित्र्यं किञ्चिद् युक्तिपथमारुह्य सिद्ध्यति। न हि रक्तं दण्डमजानानः 'रक्तदण्डवान् पुरुष' इति प्रत्येति, निश्चिन्वन् रक्तं दण्डं तथा प्रत्येति। अतोऽन्वयव्यतिरेकाभ्यां रक्तत्वविशिष्टदण्डवैशिष्ट्यावगाहिबोधानां रक्तत्वप्रकारकनिश्चयकारणकत्वमनुमीयते। विशिष्टवैशिष्ट्यावगाहिबोधं प्रति विशेषणतावच्छेदकप्रकारकनिश्चयः कारणमिति यावत्। क्वचिच्च, विशेषणतावच्छेदकधर्मनिश्चयं विनापि 'रक्तदण्डवान् पुरुष' इत्याद्याकारकं ज्ञानमभ्युपगन्तव्यं भवति। एकत्वविशिष्टकर्तुरज्ञानेऽपि क्षित्यङ्कुरादीनां सकर्तृकत्वव्याप्यवत्तापरामर्शात् लाघवोपनीतैकत्वज्ञानसहकृतात् एकत्वविशिष्टकर्तृकत्वावगाह्यनुमितिदर्शनात्। दण्डव्याप्यवत्तापरामर्शाद् रक्तत्वप्रकारकदण्डनिर्णयं विनैव रक्तेतरदण्डस्य पुरुषे बाधनिश्चये सति 'रक्तदण्डवान् पुरुष' इत्यनुमितेर्दर्शनाच्च।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तदेतद् विशेष्ये विशेषणमिति रीत्या जायमानं न विशेषणतावच्छेदकरक्तत्वादिप्रकारकं ज्ञानमपेक्षते। किन्तु, रक्तत्वादितत्तद्विशेषणानां विशृङ्खलोपस्थितिमात्रम्। अतोऽस्य विशिष्टज्ञानसापेक्षात् विशिष्टवैशिष्ट्यबोधाद् वैलक्षण्यमवश्योपपादनीयम्। न च 'रक्तो दण्ड' इति विशिष्टज्ञानसाधारणेन विशृङ्खलोपस्थितित्त्वेन विशिष्टवैशिष्ट्यबोधसाधारणेन विशिष्टविशेषणकज्ञानत्वेन च हेतुहेतुमद्भावोपगमादेव सर्वसामञ्जस्ये निरुक्तवैचित्र्यकल्पनमप्रामाणिकमिति वाच्यम्। विशृङ्खलोपस्थितिमूलकस्य 'रक्तदण्डवान् पुरुष' इति निश्चयस्य रक्तत्व-तद्विशिष्टदण्डादिसंशयानिवर्तकतायाः विशिष्टज्ञानमूलकस्य तु तन्निश्चयस्य तन्निवर्तकताया एव तत्र वैचित्र्यकल्पकत्वात्।

विशिष्टवैशिष्ट्यावगाहित्वम्

विशिष्टवैशिष्ट्यावगाहिबोधं प्रति विशेषणतावच्छेदकप्रकारकनिश्चयः कारणमिति प्राप्ते, कार्यतावच्छेदकं विशिष्टवैशिष्ट्यबोधत्वं निष्कर्षणीयम्। तद्धि न तावत् विशिष्टप्रतियोगिकवैशिष्ट्यावगाहित्वम्, व्यधिकरणसम्बन्धावगाहिभ्रमे 'संयोगेन दण्डनीलवान् अयम्' इत्यादौ व्यभिचारात्। नापि विशिष्टप्रकारकत्वं, 'काञ्चनमयवह्निमान्' इत्यादिभ्रमे प्रकारीभूतविशिष्टाप्रसिद्ध्या व्यभिचारात। नापि विशेषणान्तरप्रकारेण भासमानप्रकारकत्वम्, 'रक्तो दण्डः दण्डवान् पुरुष' इति समूहालम्बने व्यभिचारात्। नापि विशेषणान्तरप्रकारतानिरूपितविशेष्यत्वावच्छिन्न-प्रकारताकत्वं, प्रत्येकपदार्थोपस्थितिमात्रमूलके 'रक्तदण्डवान्' इति ज्ञाने व्यभिचारात्। अपि तु, तद्रूपनिष्ठप्रकारतानिरूपितविशेष्यतावच्छिन्नप्रकारतानिरूपिता तद्रूपावच्छिन्नप्रतियोगिताकत्वावच्छिन्ना या संसर्गता तन्निरूपकबोधत्वमेव। 'रक्तो दण्ड' इति ज्ञानोत्तरमुत्पन्ने 'रक्तदण्डवान् पुरुष' इति ज्ञाने दण्डसंसर्गतायां संयोगनिष्ठायां रक्तत्वावच्छिन्नप्रतियोगिताकत्वमवच्छेदकतया भासते।

यद्वा तद्रूपनिष्ठस्ववच्छिन्नतद्धर्मिनिष्ठप्रतियोगिताकसम्बन्धावच्छिन्नतद्धर्मिनिष्ठ-तत्सम्बन्धावच्छिन्नप्रकारतावच्छिन्नविशेष्यतनिरूपितप्रकारतावच्छिन्नप्रकारतानिरूपकबोध-त्वमेव तत्। विशिष्टज्ञानसापेक्षे 'रक्तदण्डवान् पुरुष' इति ज्ञाने रक्तत्वं समावायेन दण्डे प्रकारतापन्नं सदेव स्वावच्छिन्नदण्डनिष्ठप्रतियोगिताकसंयोगसम्बन्धेन धर्मिघटितेन पुरुषे प्रकारीभूय भासते। प्रत्येकपदार्थोपस्थितिमूलके 'रक्तदण्डवान् पुरुष' इति बोधे तु दण्डस्य न रक्तत्वावच्छिन्नप्रतियोगिकसंयोगः ससर्गतया भासते, अपि तु संयोगमात्रम्। न वा रक्तत्वस्य स्वावच्छिन्नप्रतियोगिकसंयोगेन पुरुषे प्रकारता, किन्तु समवायेन दण्डे एव।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

केचित्तु – तद्रूपविशिष्टपर्याप्तप्रकारताकत्वमेव तत्। विशिष्टज्ञानमूलके 'रक्तदण्डवान् पुरुष' इति बोधे दण्डनिष्ठप्रकारता रक्तत्वान्तर्भावेणैव पर्याप्ता। प्रत्येकपदार्थोपस्थितिमूलके बोधे तु दण्डप्रकारता दण्डमात्रे पर्याप्ता, न रक्तत्वान्तर्भावेणेति वदन्ति।

अत्र मते, दर्शितविशिष्टज्ञानस्य पुरुषनिनिष्ठविशेष्यतानिरूपितरक्त-त्वनिष्ठाप्रकारताकत्वेन 'पुरुषो न रक्तः' इति निश्चयप्रतिबद्ध्यत्वमापतति। तच्च, इतरप्रकारतानवच्छिन्नरक्तत्वप्रकारतायाः प्रतिबद्ध्यताच्छेदकत्वमुपगम्य वारणीयम्, निरुक्तज्ञाने रक्तत्वनिष्ठप्रकारतायाः दण्डसाधारण्या दण्डविशेष्यतानिरूपितरक्तत्वप्रकारतया अवच्छिन्नत्वात्। एवञ्च, प्रकारताविशेषस्य व्यासज्यवृत्तेः प्रत्येकोपस्थितिमूलक-विशिष्टज्ञानव्यावृत्तस्योपगमे, तस्यैव विशेषणतावच्छेदकप्रकारकधीजन्यतावच्छेदकत्व-सम्भवे लाघवमस्त्येव। तथापि, प्रकारविशेषणस्य प्रकारतावच्छेदकत्वमेव न तु प्रकारत्वं मानाभावात्।

अपरे, तु तद्रूपावच्छिन्नतन्निष्ठप्रकारताकत्वमेव तद्रूपविशिष्टवैशिष्ट्या-वगाहित्वम्। यथा 'भूतलं घटवदिति' ज्ञाने भूतलत्वादेः धर्मितावच्छेदकता न केवलभूतलनिष्ठविशेष्यतानिरूपितप्रकारतारूपा, भूतलत्वस्य घटधर्मितावच्छेदकतावत् विपरीतस्यापि सम्भवात्। अपि तु, विलक्षणविषयतैव। सा च प्रकारतारूपा तदन्यैव वा। तथा विशेषणतावच्छेदकताऽपि विलक्षणविषयतैव 'रक्तो दण्ड' इति ज्ञानसापेक्षज्ञानीयैव रक्तत्वादिविषयता। अत एतदेव ज्ञानं रक्तत्वावच्छिन्नदण्डनिष्ठ-प्रकारताकं भवति। प्रत्येकोपस्थितिमूलकं तु ज्ञानं न तादृशं, अपि तु रक्तत्वनिष्ठ-प्रकारतानिरूपितदण्डविशेष्यतावच्छिन्नप्रकारताकमात्रम् इति प्राहुः।

अत्र मते, प्रकारविशेषणस्य प्रकारतावच्छेदकतायाः युक्तियुक्तत्वेऽपि प्रत्येकोपस्थितिमूलके 'रक्तदण्डावान् पुरुष' इत्यादिज्ञानेऽपि रक्तत्वादीनां दण्डविशेषणतायास्तुल्यतया अनवच्छेदकत्वे विनिगमकं दुर्लभम्। विषयभेदमन्तरा विषयताभेदस्य दुर्घटत्त्वात्।

विशिष्टवैशिष्ट्यबोधसामग्री

विशिष्टवैशिष्ट्यावगाहिबोधहेतुस्तु विशेषणतावछेदकप्रकारको निश्चय एव। न तु संशयोऽपि। 'रक्तदण्डवान्' इति तादृशबोधस्य 'दण्डो रक्त' इति निश्ययोत्तरं जननात्। 'दण्डों रक्तो न वा' इति संशयोतरमजननात्। 'दण्डो रक्तो न वा' इत्यादि संशयस्तु विशेष्ये विशेषणमिति रीत्या 'रक्तदण्डवान् पुरुष' इति बुद्धिं प्रति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रतिबन्धकः कल्प्यते, तदुत्तरं तस्याप्यजननात्। प्रत्येकोपस्थितिरूपक्लृप्तसामग्री-सद्भावाच्च। यद्यप्येवं विशेषणतावच्छेदकप्रकारकज्ञानस्य निश्चयत्वेन कारणत्वोपगमेऽपि संशयस्य विशेष्ये विशेषणमिति रीत्या ज्ञानप्रतिबधकताया आवश्यकत्वे तत्प्रतिबद्ध्यतावच्छेकतायाः विशिष्टवैशिष्ट्यावगाहि बोधसाधारण्योपगमेनैव निरुक्तसंशयोत्तरं विशिष्टवैशिष्टयबोधवारणसम्भवात् विशिष्टवैशिष्ट्यावगाहिबोधं प्रति विशेषणतावच्छेदकप्रकारकजानत्वेनैव कारणता लाघवात् स्वीकर्तुमुचिता, तथापि रक्तत्वादिसंशयद्वितीयक्षणे लौकिकसन्निकर्षवशात् तन्निश्चये जाते तद्द्वितीयक्षणे तद्विशिष्टवैशिष्ट्यबोधो जायमानः संशयप्रतिबद्ध्यतावच्छेदकाक्रान्तत्वे नोपपद्यत इत्यतो विशिष्टवैशिष्टयविषयताभित्तविषयतैव संशयप्रतिबद्ध्यतावच्छेदिकोपगम्यते। एवं सति संशयोत्तरं विनापि निश्चयं विशिष्टवैशिष्ट्यधीप्रसङ्गवारणाय निश्चयत्वेन हेतुता स्वीक्रियते।

संशयप्रतिबद्ध्यतावच्छेदककुक्षौ प्रत्यक्षत्वं देयम्। अन्यथा, यत्र दण्डे रक्तत्वस्य संशयः, 'पुरुषो दण्डव्याप्यवान्' इति परामर्शघटितानुमितिसामग्री च वर्तते, रक्तेतरदण्डस्य पुरुषे बाधग्रहश्च, तत्रोत्पद्यमानायाः केवलं विशेष्ये विशेषणमिति रीत्या 'रक्तदण्डवान् पुरुषः' इत्युमितेः विशिष्टवैशिष्ट्यविषयताभिन्नविषयताकत्वेन व्यभिचारप्रसङ्गः। अलौकिकत्वमपि विशेषणं देयम्। तेन, 'रक्तो दण्डो न वा' इति संशयोत्तरं लौकिकसन्निर्षात् विशेष्ये विशेषणमिति रीत्या 'रक्तदण्डवान्' इति प्रात्यक्षिकबोधोदयेऽपि न क्षतिः।

एवं सति, विशिष्टवैशिष्ट्यविषयताभिन्नत्वं न देयम्। रक्तत्वसंशये सति तन्निश्चयाद् अलौकिकप्रात्यक्षिको विशिष्टवैशिष्ट्यबोधो यत्र, तत्र व्यभिचारवारणाय तन्निश्चयविरहवैशिष्ट्यस्य तत्संशये निवेशानीयत्वात्। तथा च तन्निश्चयविरहविशिष्ट-तत्प्रकारकसंशयः तद्विशेष्यप्रकारकलौकिकप्रत्यक्षत्वावच्छिन्नं प्रति प्रतिबन्धक इति फलितम्।

न चैवं सति निश्चयत्वेन कारणता निर्युक्तिकैव, संशयोत्तरं निश्चयमन्तरा विशिष्टवैशिष्ट्यबोधापत्तेः संशयप्रतिबन्धकतयैव निरासादिति वाच्यम्। संशयबलाद् इतरबाधाद्युपनीतरक्तत्वादिविशेषितदण्डाद्यनुमितौ विशिष्टिवैशिष्ट्यावगाहिताप्रसङ्गस्य, संशयोत्तरं लौकिकसन्निकर्षवशाद् उत्पन्नप्रत्यक्षे च 'रक्तदण्डवान् पुरुष' इत्याकारके विशिष्टवैशिष्ट्यविषयताप्रसङ्गस्य च वारणाय निश्चयत्वेन हेतुताया आवश्यकत्वात्।

विशिष्टवैशिष्ट्यबुद्धौ निश्चयत्वेन हेतुत्वे, 'दण्डो रक्तो न वा' इति विशेषणसंशयोत्तरं 'रक्तदण्डवान् न वा पुरुष' इति विशिष्टवैशिष्ट्यावगाहिनः विशिष्टसंश-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यस्यानुपपत्तिर्नाशङ्कनीया, तत्र रक्तत्वप्रकारकनिश्चयलक्षणस्य कारणस्यापि सत्त्वात्। तथाहि – दण्डत्वसामानाधिकरण्येन रक्तत्वनिश्चये सत्येव चैत्रीयदण्डत्वावच्छेदेन रक्तत्वाभावावगाहिनः 'चैत्रीयदण्डो रक्तो न वा' इति विशेषणसंशयात् 'चैत्रः रक्तदण्डवान् न वा' इति विशिष्टसंशय उदेति। न हि दण्डत्वसामानाधिकरण्येन रक्तत्वनिश्चयः चैत्रीयदण्डत्वावच्छेदेन रक्तत्वाभावबुद्धेः विरोधी। न च निरुक्तविशेषणसंशयाधीनो विशिष्टसंशयः विशेष्ये विशेषणम् इति रीत्यैव, न तु विशिष्टवैशिष्ट्ययावगाहीति वाच्यम्। प्रतियोगिविशेषिताभावबुद्धेः विशिष्टवैशिष्ट्यबोधमर्यादानुल्लङ्घननियमेन 'रक्तदण्डवान् न वा चैत्र' इति संशयस्य अभावांशे रक्तत्वविशिष्टदण्डवैशिष्ट्या-वगाहिताया आवश्यकत्वात्।

प्रतियोगिविशेषिताभावबुद्धेः लौकिकप्रत्यक्षात्मिकाया एवोक्तनियमस्वीकारे, संशये कोट्ययोरुपनयादेव भानेन अभावभानस्य लौकिकानात्मकतया विशेष्ये विशेषणमिति रीत्या संशयस्य सम्भवेऽपि तत्र रक्तत्वविशष्टिदण्डवैशिष्ट्यानवगाहनेन दण्डसामान्याभावावगाहितया 'दण्डवान् चैत्र' इति निश्चयोत्तरं तत्संशयस्यानुपपत्तिः।

'दण्डो रक्तो न वा' इति संशयोत्तरं जायमाने 'दण्डे रक्तं सन्देह्मि' इत्यनुव्यवसाये ज्ञानांशे रक्तत्वविशिष्टदण्डवैशिष्ट्यं नावगाह्यते। दण्डमद्वारीकृत्यैव रक्तत्वस्य ज्ञाने वैशिष्ट्यभानात्। अतो न तत्र रक्तत्वनिश्चयविरहेऽपि व्यभिचारः।

विशिष्टवैशिष्ट्यधीहेतुतायाः इच्छादिसाधारण्यम्

विशेषणतावच्छेदकप्रकारकनिश्चयत्वं हि तादृशप्रकारकसंशयान्यज्ञानत्वम्। तत्र ज्ञानत्वं न निवेश्यते, तस्य निरुक्तविशिष्टवैशिष्ट्यबोधकारणतायाः न्यूनवृत्ति-त्वेनानवच्छेदकत्वात्। निरुक्तकारणताया इच्छादिसाधारण्यात्। विशेषणतावच्छेदक-प्रकारकेभ्य इच्छाद्वेषकृतिसंस्कारेभ्योऽपि तादृशनिश्चयमन्तरा विशिष्टवैशिष्ट्यावगाहिबोध-जन्नात्। तथाहि- यत्र इष्टसाधनताज्ञानात् मधुरफलेच्छा ततः इच्छात्वनिर्विकल्पकं, ततः 'मधुरं फलमिच्छामि' इति साक्षात्कारो भवति। तत्र माधुर्यविशिष्टफलवैशिष्ट्यम् इच्छायाम् अवगाहमाने अनुव्यवसाये माधुर्यविशिष्टफलविषयणिी इच्छैव हेतुरुपयेते। ज्ञानस्य तादृशस्य पूर्वक्षणे नाशात्। इच्छात्वादिनिर्विकल्पकं नरसिंहाकारकमिति सिद्धान्तानुगुणमिच्छात्वनिर्विकल्पकस्य इच्छांशे विशिष्टवैशिष्टबोधात्मकत्वमुपेत्य तेन ज्ञानेन उत्तरत्रनुव्यवसायस्योत्पादः, इष्टसाधनताज्ञानेन विनश्यदवस्थेन तन्निर्विकल्पकय विशिष्टवैशिष्ट्यावगाहिबोधस्योत्पादश्च यद्यपि उपपादयितुं याक्यते। तथापि यत्र फलसाधानताज्ञानं, फलेच्छा, उपायेच्छा, इच्छात्वनिर्विकल्पकं, विशिष्टानुव्यवसायः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

क्रमेण भवन्ति तत्र विशिष्टवैशिष्ट्यावगाहिनो निर्विकल्पकात् पूर्वक्षणे विशिष्टज्ञानस्य विनाशेन न ज्ञानहेतुतया विशिष्टवैशिष्ट्य- बोधनिर्वाहः, अपि तु तत्र क्षणे उत्पन्नेच्छायाः हेतुतयैव।

एवं, यत्र द्विष्टसाधनताज्ञानं, दुःखद्वेषः, अम्लफलाद्युपायद्वेषः, द्वेषत्वनिर्विकपकं द्वेषेऽम्लत्वविशिष्टफलवैशिष्ट्यावगाहि, द्वेषानुव्यवसायः तत्र निर्विकल्पकस्य विाष्टवैशिष्ट्यावगाहितायां उपपादनाय द्वेषसाधारण्यं कारणताया उपगन्तव्यम्।

एवं यत्र रक्तत्वादिविशिष्टदण्डादिकृतिः, ततः कृतित्वनिर्विकल्पकं तदुत्तरं विशिष्टकृतिसाक्षात्कारः तत्र कृत्यंशे रक्तत्वविशिष्टदण्डवैशिष्ट्यावगाहिबोधनिर्वाहाय विशिष्टकृतेः कारणत्वमावश्यकम्। न चात्र विषयविशिष्टकृतेः साक्षात्कारस्य विशिष्टज्ञानात्मकस्य विशेषणज्ञानहेतुकत्वसंरक्षणय विशेषणावगाहिस्मरणं पूर्वक्षणे कल्पनीयमिति तेनैव निर्विकल्पकस्य विशिष्टशिष्ट्यावगाहिता निर्वहतीति वाच्यम्। विशेषणज्ञानस्य विशेषणविषयकत्वेन हेतुत्वोपगमेनैव विशिष्टज्ञाने तद्धेतुकत्वसंरक्षणात्। तत्र दण्डादिरूपविशेषणावगाहिकृतेरेव उक्तरूपाक्रान्ताया विशिष्टज्ञानपूर्वभाविन्यास्तन्निर्वाहकत्वात्।

एवं, विशेषणतावच्छेदकप्रकारकसंस्कारात् तादृशज्ञानमन्तरेणापि विशिष्टवैशिष्ट्यावगाहिस्मरणं भवति। अनुद्बुद्धतादृशसंस्कारात् विशिष्टस्मरणवारणाय अनुद्बुद्धसंस्कारभेदो निवेशनीयः।

फलितकार्यकारणभावनिष्कर्षः

तद्रूपनिष्ठतद्रूपावच्छिन्नप्रकारतानिरूपित तद्धर्मिनिष्ठ तद्धर्मावच्छिन्न विशेष्यतावच्छिन्न प्रकारतनिरूपित - तद्रूपावच्छिन्न प्रतियोगिताकत्ववच्छिन्न - संसर्गतानिरूपक बुद्धित्वावच्छिन्नं प्रति संशयभिन्नत्वे सति अनुद्बुद्धसंस्कारभिन्नत्वे सति तद्रूपनिष्ठतद्रूपावच्छिन्नप्रकारतानिरूपिततद्धर्मिनिष्ठतद्धर्मावच्छिन्नविशेष्यताकत्वावच्छिन्नं कारणमिति। यद्वा तद्रूपनिष्ठतद्रूपावच्छिन्नस्वावच्छिन्नतद्धर्मिनिष्ठ प्रतियोगिताकसम्बन्धावच्छिन्न-तद्धर्मिनिष्ठ तद्धर्मावच्छिन्नत्सम्बन्धावच्छिन्न प्रकारतावच्छिन्नविशेष्यतानिरूपिताप्रकारतावच्छिन्न-प्रकारताक बुद्धित्वावच्छिन्नं प्रति निरुक्तं कारणमिति।

गुणत्वेन रक्तरूपप्रकारकात् 'गुणवान् दण्ड' इति ज्ञानात् रक्तत्वेन रक्तावगाहिनः 'रक्तदण्डवान्' इति विशिष्टवैशिष्ट्यबोधस्य वारणाय कार्यताकारणतावच्छेदककोटौ तद्रूपप्रकारतयोरेकधर्मावच्छिन्नत्वनिवेशः। 'द्रव्यं रक्तम्' इति ज्ञानात् 'रक्तदण्डवान् पुरुष' इति विशिष्टवैशिष्ट्यबोधानुदयात् तत्र धर्मिविशेष्यतयोरेकधर्मावच्छिन्नत्वनिवेशः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तद्घटस्य रक्तत्वं द्रव्यत्वं च ज्ञातवतोऽपि द्रव्यत्वावच्छिन्ने तद्घटे रक्तत्वज्ञानमन्तरेण 'रक्तद्रव्यवान् पुरुष' इति बोधस्य द्रव्यत्वेन तद्घटवैशिष्ट्यावगाहिन उपपत्तये कारणदिशि धर्मिविशेष्यतायां तद्धर्मावच्छिन्नत्वं स्वावच्छिन्नत्वस्वनिरूपितविशेष्यता-सामानाधिकरण्यान्यतरसम्बन्धेन तद्धर्मविशिष्टत्वरूपं विवक्षितम्। रक्तत्वेन एतद्दण्डस्य ज्ञाने तद्दण्डस्य त्वज्ञाने तद्दण्डावगाहिनः 'रक्तदण्डवान् पुरुष' इति बोधस्य वारणाय एकधर्मिविषयताप्रवेशः।

विशेषणतावच्छेदकदण्डाद्यंशे निर्धर्मितावच्छेदककस्य 'दण्डिमान् देश' इत्याद्याकारकस्य दण्डविशिष्टवैशिष्ट्यबोधस्य तु विशेषणतावच्छेदकदण्डादि-प्रकारकज्ञानमात्रं हेतुः। न तु तादृशनिश्चय एव। 'दण्डवान् न वा' इति संशयेऽपि निरुक्तबोधोदयात्। तदनुरोधेन, कारणतावच्छेदकशरीरे ज्ञानत्वं निवेश्य, उभयत्र तद्धर्मिविशेष्यतायाम् अवच्छेदकधर्ममनिवेश्य पृथक् कार्यकारणभावो वाच्यः।

एवं, निरवच्छिन्नविशेषणतावच्छेदकप्रकारकात् 'रक्त' इत्याद्याकारकात् ज्ञानात् तादृशरक्तत्वांशे निर्धर्मितावच्छेदककस्य 'रक्तवान् दण्ड' इति बोधस्य उत्पादानुरोधेन तयोः पृथक्कार्यकारणभाव उभयत्र तद्रूपनिष्ठप्रकारतायां निवच्छिन्नत्वं प्रवेश्योपगन्तव्य इति।

आकारग्रन्थः- अनुमानगादाधर्याम् अनुमितिप्रकरणम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मीमांसकसम्मतः शब्दार्थविचारः

सुब्राय.वि.भट्टः

शब्दरूपस्य वेदस्य अर्थप्रत्यायकत्वं स्वाभावसिद्धम्। अर्थस्य नित्यत्वे सिद्धे एव शब्दतत्सम्बन्धयोर्नित्यत्वमिति अर्थस्य नित्यत्वं प्रतिपाद्यते मीमांसकैः। विभुत्वाच्छब्दो नित्यः जातिरूपस्तदर्थो नित्यः, अनयोस्सम्बन्धोऽपि नित्य इति भगवान् जैमिनिः औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्ध इति सूत्रयामास। तत्र च पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितोऽन्तिमो वर्णोऽर्थप्रत्यायक इति शबरस्वामिनः मतोपस्थापनपुरस्सरं व्याकरणादिशास्त्रप्रतिपादितसिद्धान्तात् शब्दतदर्थस्वरूपादिविषये मीमांसकानां वैशिष्ट्यमत्र सुष्ठु निरूपयति प्रबन्धा।

परमपुरुषार्थसाधनीभूतयोः धर्माधर्मयोः विवेचनार्थं प्रवृत्तमिदं मीमांसाशास्त्रम्। धर्मस्य परिसेवनार्थम् अधर्मस्य च परित्यागार्थं च अत्र उभयोः जिज्ञासा क्रियते। वेदबोधितश्रेयस्साधनताको धर्मः इति धर्मलक्षणाङ्गीकाराच्च धर्मस्य लक्षणं प्रमाणं स्वरूपं च श्रुत्यर्थाभ्यां गम्यत इति वेदवाक्यानां तात्पर्यार्थनिर्णय एव अस्य शास्त्रस्य प्रमेयः।

एवं च, शब्दरूपत्वाद्वेदस्य प्रसङ्गात् शब्दस्वरूपं किम्? स च शब्दः नित्यः अनित्यो वा? अर्थः कः? स चार्थः नित्यः अनित्यो वा? उभयोः संबन्धः कः? स च कीदृशः? इत्यादयः विचाराः परामृष्टाः। एतान् पदतदर्थसंबद्धान् विषयान् भाषाशास्त्रविदः भाषाशास्त्रीयत्वेन परिगणयन्ति।

यद्यपि व्याकरणशास्त्रे "अकुहविसर्जनीयानां कण्ठः" इत्यादिना वर्णानाम् उत्पत्ति सम्बद्धा स्थानप्रयत्नादयः निर्दिष्टाः। तथैव शब्दस्य साधुत्वासाधुत्वविषये एव तत्र चर्चा कृता।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मीमांसकसम्मतः शब्दार्थ

शब्दस्य अर्थप्रत्यायकत्वविषये मीमांसकैः महान् विमर्शः कृतः। विषयेऽस्मिन् सामान्यतः सर्वे दार्शनिका मीमांसकसम्मतसिद्धान्तमेव अङ्गीचक्रुः। भाष्ये-शबरस्वामिभिः शब्दस्वरूपविचारावसरे अथ गौरित्यत्र कः शब्दः?[१] इति पृष्ट्वा "गकारौकारविसर्जनीया इति भगवानुपवर्षः" इति समाहितम्। अत्र वृद्धानामपि ज्ञानिनां सम्मतिरस्ति इति स्वमतस्य परिपोषणार्थम् उपवर्षाचार्याणां ग्रहणं कृतम्।

अत्र गकारादिवर्णा एव शब्दा इति वर्णानामेव शब्दस्वरूपत्वं प्रत्यक्षबलेन एवं अर्थप्रत्यायकत्वानुरोधेन च सिध्यति। यथा- श्रोत्रेन्द्रियजन्यप्रत्यक्षविषये (वर्णे) एव लोके "शब्द" इति शब्दः प्रसिद्धः। अर्थवाचकत्वं तेषामेवेति। ते एव श्रोत्रग्राह्याः इत्यनेन गकारादीन् वर्णानेव श्रोत्रेन्द्रियं प्रत्यक्षेण गृह्णाति न तु तदतिरिक्तं किञ्चित् इति भाष्यकारः सूचयामास।

एवं च श्रोत्रेन्द्रियविषयत्वेन प्रत्यक्षत्वात् लोके शब्दशब्दवाच्यत्वदर्शनाच्च गकारादयो वर्णा एव शब्दाः इति प्रत्यक्षत्वसिद्धिः।

एवम् अर्थज्ञानजनकत्वमुखेनापि वर्णानामेव शब्दत्वं सिध्यति। अत्र शङ्कते-वर्णानां शब्दत्वे अभ्युपगम्यमाने शब्दश्रवणानन्तरं जायमानोऽर्थप्रत्ययो नोपपद्येत। यथा- प्रत्येकं वर्णाः अर्थं प्रत्याययेयुः उत वर्णव्यतिरिक्तः समुदायोऽर्थप्रत्यायकः आहोस्वित् संहता वर्णाः अर्थप्रत्यायका इति जिज्ञासायां - एकैकाक्षरविज्ञानेऽर्थो नोपलभ्यते। अतः प्रत्येकवर्णानाम् अर्थप्रत्यायकत्वं न संभवति।

अक्षरव्यतिरिक्तः अन्यः न कश्चिदस्ति समुदायो नाम। वर्णैरारभ्यमाणः समुदायो युगपदवस्थितैरेव वर्णेरारब्धव्यः। विच्छिन्नयत्नव्यङ्ग्यत्वेन वर्णानामुपलब्धितो यौगपद्यं वक्तुं न शक्यते। सत्तायौगपद्येन समुदायारम्भे नित्यत्वाद्विभुत्वाच्च वर्णानां सर्वे सर्वदा सर्वमारभेरन्। अतश्च वर्णातिरिक्त समुदायोऽप्रमाणिकः। एवमेव क्रमवर्तिनां वर्णानां साहित्यम् असंभावितमेव। गौः इत्यत्र यदा गकारः न तदौकारविसर्जनीयौ। यदौकारविसर्जनीयौ न तदा गकारः। अतः समुदायः अप्रसिद्धः।

एवं तर्हि अर्थप्रतिपत्तिः कथं संभवति? इत्युक्तौ - पूर्ववर्णजनितसंस्कर-सहितोऽन्त्यो वर्णः प्रत्यायकः[२] इति। यथावा - "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यत्र दर्शपूर्णमाससंज्ञकानामाग्नेयादीनां षण्णां यागानां स्वरूपतः क्रमवर्तिनामपि सहितानामेव तेषां श्रुतफलसाधनत्वान्यथानुपपत्त्या स्वरूपतः साहित्यासंभवेऽपि तज्जन्यावान्तरव्यापारद्वारा साहित्यं परिकल्प्य सहितानां फलसाधनत्वं श्रूयमाणमुपपद्यते। तथैव वर्णानामपि एकैकशः अर्थाभिधानादर्शनात् समग्रपदोच्चारणे च अर्थावगमात्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संहत्यकारित्वे निश्चिते स्वरूपेण च वर्णानां साहित्यासंभवात् संस्काररूपमवान्तरव्यापारं परिकल्प्य तद्द्वारा साहित्यमभ्युपगम्य अर्थप्रत्यायकत्वं संहितानां वर्णानामेव उपपद्यते। एवम् अर्थप्रतीत्यन्यथानुपपत्तिरूपाया अर्थापत्तेः अत्रैव क्षीणत्वात् न साऽर्थापत्तिः अतिरिक्तपदार्थकल्पनाय प्रभवति।

नन्वेवं "शब्दादर्थं प्रतिपद्यामहे" "गोशब्दात्सास्नादिमन्तं प्रतिपद्यामहे" इत्यादिको लौकिको व्यवहारोऽव्यवधानेन शब्दस्यैव निमित्तत्वबोधकः अनुपपन्न एव स्यात् इत्युक्तौ - तत्तद्वर्णानुभवजनितसंस्काराणां व्यापारमात्रत्वेन तेन व्यवधानेऽपि अव्यवधानमेव। "व्यापारेण व्यापरिणो नान्यथासिद्धिः" इति न्यायेन शब्दव्यापारत्वात् संस्कारस्य अर्थप्रत्यायकत्वे व्यवधायकत्वं न संभवति। एवं च स्वव्यापारद्वाराऽक्ष-राणामर्थप्रतिपत्तौ हेतुत्वं संभवति। स्वव्यापारव्यवधानस्य सर्वत्र नियतत्वात् संस्कारश्च शब्दस्य व्यापार एवेति ईदृशं व्यवधानमव्यवधानमेव इति अर्थप्रतिपत्तौ शब्दः गौण इत्यपि वक्तुं न शक्यते।

"वर्णातिरिक्तः शब्दः" इति पक्षे तत्तद्वर्णानुभवजनितः संस्कारः, अर्थप्रत्ययजनकस्य पदार्थविशेषस्य जनकः इत्यङ्गीक्रियते। स च संस्कारः अर्थप्रत्यायकः इति मीमांसकसिद्धान्तः। वर्णातिरिक्तशब्दपक्षे संस्कारकल्पनं तेन च पदार्थान्तरकल्पनं (अर्थप्रत्ययजननसमर्थम्) चेति कल्पनागौरवम् अनिवार्यम्। अप्रामाणिकम् प्रत्यक्षविरुद्धं च।

एवं च - पदेषु अर्थप्रत्यायने अन्त्येतरवर्णानां संस्कारः अन्त्यस्तु स्वयं वर्णः इति स्थितिः। अनुभवः क्षणिकः, स्मृतिरिप क्षणिका, संस्कारः परं न क्षणिकः किन्तु चिरस्थायी इति। अत श्च पूर्वपूर्ववर्णानुभवजन्यसंस्कारसहितः अन्त्यः वर्णः अर्थप्रत्यायकः इति वर्णानामेव अर्थप्रत्यायकत्वम्।

तेन च पदतदवयवाश्रितस्योहादेः, महावाक्यावयवावान्तरवाक्यार्थप्रयाजाद्यश्रितस्य प्रसङ्गतन्त्रादे श्च श्रौतव्यवहारः समञ्जसो भवति। तस्मादक्षराण्येव पदम् इत्याह भगवान् भाष्यकारः शबरस्वामी।

एवं सम्बन्धिद्वयाधारस्य संबन्धस्य अन्यतराधारं शब्दस्वरूपं निरूप्य अपरं सम्बन्धिनम् अर्थरूपं विमृशति भाष्यकारः-"अथ गौरित्यस्य शब्दस्य कोऽर्थ"[३] इति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आकृतेः शब्दाभिधेयत्वं नास्तीत्याक्षिपति पूर्वपक्षी। अत्राक्षेपः द्वेधा उद्भाव्यते। आकृतेरभावात्, भावे वा क्रियायामनुपयोगात् इति। तदत्र आकृतिसद्भावप्रतिपादनेन प्रथमपक्षः निराकृतो भवति।

गोत्वादिसामान्यरूपाया आकृतेर्व्यक्त्या सह भेदाभेदादिविकल्पासहत्वेन दुर्निरूपतयाऽप्रसिद्धत्वात् अगोव्यावृत्तिरूपस्यापोहस्य शब्दार्थत्वे, तस्यावस्तुतया तदाधारतया संबन्धः कथं नित्यः सिध्येदिति अथेत्यादिप्रश्नभाष्यस्य आशयः। तस्य समाधानम् एवमाह भाष्यकारः-"सास्नादिविशिष्टाकृतिरिति ब्रूमः"[४] इति। प्रत्यक्षप्रमाणसिद्धस्य "इयं गौः इयं गौः इयमपि" इत्यादिप्रतीतिवशेन भिन्नाभिन्नत्वेन प्रतीयमानस्य च गोत्वादिसामान्यस्य,

प्रत्यक्षबलसिद्धस्य सामान्यस्य कुतर्कतः।
न शक्योऽपह्नवः कर्तुं सर्वं विजयते हि तत्॥

इत्याद्युक्तरीत्या अपह्नोतुमशक्यतया तादृशं गोत्वादिरूपं सामान्यमेव शब्दार्थ इति। ततश्च तदाधारः संबन्धः नित्यः सिध्यति। अत एव भट्टपादैः वार्तिके उक्तम्-

जातिमेवाऽऽकृतिं प्राहुर्व्यक्तिराक्रियते यया।
सामान्यं तच्च पिण्डानामेकबुद्धिनिबन्धनम्॥[५] **इति।**

आक्रियते - निरूप्यत इत्यर्थः।

आकृतिः, न पिण्डपृथग्भूता, पिण्डबुध्यभावेऽनवगम्यमानत्वात्। पङ्क्तियूथवनादिवत् इत्युनुमानेन आकृतिसद्भावः आक्षिप्यते। किन्तु प्रत्यक्षविरुद्धत्वात् इदमनुमानं बाधितार्थकम्। अनुगतप्रतीत्या प्रत्यक्षसिद्धत्वात्। पंक्तिः, वनमिति वृक्षादिव्यतिरिक्तार्थान्तरस्याभावेऽपि वनमित्यादिप्रत्ययः भवति। तद्वत्पिण्डव्यतिरिक्ताकृति-रूपार्थान्तराभावेऽपि ज्ञानं तु भवितुमर्हति। अतश्च आकृतिसद्भावे बाधकाभावात् प्रत्यक्षप्रमाणरूपसाधकसद्भावाच्च आकृतेः शब्दार्थत्वं सिध्यति। "आकृतिस्तु क्रियार्थत्वात्"[६] इत्यादिकं जातेः क्रियार्थत्वेन शब्दार्थत्वबोधकं जैमिनिसूत्रम् उपपन्नतरं भवति।

आधारभूतयोः शब्दार्थयोः स्वरूपं निरूप्य आधेयभूतस्य संज्ञासंज्ञिलक्षणसंबन्धस्य स्वरूपविमर्शनार्थं भाष्यकारः एवमाह- "अर्थ संबन्धाः कः?"[७] इति। यादृशेन संबन्धेन शब्दज्ञाने सत्यर्थज्ञानं जायते तादृशः संज्ञासंज्ञिरूपः सम्बन्धः। स च अपौरुषेयः नित्यश्चेति भाष्याभिप्रायः। तदाह- अपौरुषेयत्वात्संबन्धस्य सिद्धमिति। कथं वा अयं च शब्दार्थयोः संबन्धः संज्ञासंज्ञिरूपः नित्यः भवितुमर्हति? इत्यत्र इदं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

समाधानं कथ्यते। संबन्धकर्तुः पुरुषस्य अभावात् नास्ति सम्बन्धस्य पौरुषेयत्वम्। प्रत्यक्षादिप्रमाणानामभावादेव तत्कर्ता नास्तीति अवगम्यते। पुरुषस्य सम्बन्धुरभावत्। यद्दर्शनयोग्यं वस्तु तादृशं सामग्रीसमवधानदशायामपि यदि न दृश्यते तन्नास्तीत्यवगम्यते। यथा नरशृङ्गादिः। संबन्धकर्तुः प्रत्यक्षयोग्यस्यापि चिरवृत्तत्वात् इदानीन्तनानां न प्रत्यक्षविषयत्वं भवतीति संभावयितुं न शक्यते। चिरवृत्तस्य इदानीन्तनप्रत्यक्ष-योग्यासंभवेऽपि स्मरणयोग्यत्वं तु संभवत्येव। अतः स्मृतिर्भवितुमर्हति। तस्य च अनुपलम्भनान्नास्त्येव संबन्धेत्यवगम्यते। अतश्च विनापि कर्तृस्मरणं वेदवाक्यादर्थनिश्चयस्य प्रसिद्धत्वात् संबन्धस्य वेदवाक्यस्य च कर्ता अभ्युपगन्तुं न शक्यते। तस्मादपौरुषेयः शब्दस्यार्थेन सम्बन्धः।

अत एव नित्यश्च। तदुक्तं सूत्रकृता भगवता जैमिनिना–

औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः------------
------------------- बादरायणस्यानपेक्षत्वात्।।[८]

इत्यनेन सूत्रेण॥ एवं च शब्दस्य अर्थस्य सम्बन्धस्य च नित्यत्वात् शब्दराशिरूपस्य वेदस्य नित्यत्वं निराबाधम्। एवम् अनधिगताबाधितार्थबोधकत्वेन च अलौकिके धर्मे प्रमाणं वेदाः॥

॥इतिशम्॥

टिप्पण्यः–

१. (शाबरभाष्यम् १.१.५)
२. (शाबरभाष्यम् १.१.५)
३. (शाबरभाष्यम् १.१.५)
४. (शाबरभाष्यम् १.१.५)
५. (श्लो - वार्तिकम् आ वादः - ३)
६. (जै. सूत्रम् - १.३.३२)
७. (शाबरभाष्यम्. १.१.५)
८. (जै. सूत्रम् १.१.५)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अष्टन्-स्वरविचारः

सि यस् यस् नरसिंहमूर्ति

पाणिनीयेऽष्टके अष्टन आ विभक्तौ इति सूत्रे हलीत्यपकर्षस्य किं प्रयजोनमिति विचारपरोऽयं लेखः। अत्र लेखकः अष्टानामिति रूपसिद्धिं प्रयोजनत्वेन उपपाद्य कैयट-हरदत्तादीनां मतविमर्शनपूर्वकं प्रियाष्टानामित्यत्र न ह्यन्यदतश्चतसृशब्दादिति भगवद्वचनप्रमाणं दर्शयन् अष्टन्स्वरस्य चारितार्थ्यं निराकरोति।

अष्टन आ विभक्तौ (७-२-८४) इति सूत्रमष्टाध्यायां सप्तमाध्याये विद्यते। एतदनन्तरसूत्रमस्ति - रायो हलि इति। उभेऽपि सूत्रेऽऽत्त्वविधायके। ष्णान्ता षट् इति सूत्रे भगवता भाष्यकारेण 'हलीत्युभयो शेषः' इति कथनात् हलीति अत्रापकृष्यते। तच्च हलीतिपदं विभक्तौ इत्यस्य विशेषणम्। तेन यस्मिन् विधिस्तदादावल्ग्रहणे' इति परिभाषया तदादिविधिः। एवञ्च अष्टनः आत्वं भवति हलादौ विभक्तौ इति सूत्रार्थः लभ्यते। अष्टाभिः इत्युदाहरणम्। अष्टन् शब्दः नित्यबहुवचनान्तः। ततः तृतीयाबहुवचने भिस् प्रत्यये, अनेन सूत्रेण हलादिविभक्तिपरकत्वेन नकारस्य आत्वे, सवर्णदीर्घ, रुत्वे, विसर्गे, अष्टाभिः इति रूपं सिद्ध्यति। एवमेव अष्टाभ्यः इति रूपमपि भवति। षष्ठीबहुवचने अष्टन् + आम् इति स्थिते हलीत्यपकर्षस्याङ्गीकारात् आदौ षट्चतुर्भ्यश्च इति षट्संज्ञां निमित्तीकृत्य आमः नुडागमः प्रवर्तते। अष्टन् + नाम् इति स्थिते सम्प्रति हलादिविभक्तिपरकत्वेन आत्वे, सवर्णदीर्घे अष्टानाम् इति रूपं सिद्ध्यति।

अत्रेयं शङ्का - अष्टन् + नाम् इत्यावस्थायाम् अष्टन आ विभक्तौ इत्यनेन आत्वं न भवति। नुमागमः नान्तसंख्यावाचकषट्संज्ञां निमित्तीकृत्य प्रावर्तत। आत्वे नान्तत्वं नङ्क्ष्यति। अतः सन्निपातपरिभाषया नान्तसंख्यावाचकत्वं निमित्तीकृत्य प्रवृत्तः नुडागमः तद्विघातक आत्वं प्रति निमित्तं न भवति इति आत्वाप्रवृत्तौ अष्टानाम् इति रूपं न सिद्ध्यति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अत्रेदमुत्तरम्- शमामष्टानां दीर्घः श्यनि इति निर्देशात् एतद्विषये सन्निपातपरिभाषा न प्रवर्तते इत्युभ्युपगमात् आत्वं प्रवर्तते। एवम् अष्टानाम् इति रूपसिद्धिः हलीत्यपकर्षस्य प्रयोजनम्।

सन्निपातपरिभाषायाः अनित्यत्वेन अष्टानाम् इति रूपसाधनं किमर्थम्? प्रकारन्तरेण तच्च रूपं साधयामः- अष्टन् + आम् इति स्थिते षट्चतुर्भ्यश्च इति नुडागमो भवति। तदा 'नोपधायाः (नान्तय उपधायाः दीर्घः स्यान्नामि परे) इत्यनेन उपधादीर्घे, हलादिप्रत्ययपरकत्वेन पदसंज्ञायां 'न लोपः प्रातिपदिकान्तस्य' इति नलोपे अष्टानाम् इति भवति। अत्रापि नान्तसंख्यावाचकत्वं निमित्तीकृत्य जायमानः नुडागमः तद्विघातकनलोपं प्रति निमित्तं न भवति इति सन्निपातपरिभाषाविरोधान नलोपः न प्राप्नोति खलु-

उच्यते - सन्निपातपरिभाषा कृन्मेजन्तः इति सूत्रे भाष्ये पठिता। अतः सपादसप्ताध्यायीस्थत्वं परिभाषायाः, न लोपः प्रातिादिकान्तस्य (८-२-७) इति सूत्रं त्रिपाद्यां वर्तते। पूर्वत्रसिद्धम् इति सूत्रेण सपादसप्ताध्यायीं प्रति त्रिपाद्याः असिद्धत्वबोधनात् परिभाषादृष्ट्या (नलोपस्य असिद्धत्वेन) नकारस्य विद्यमानत्वेन सन्निपातविघातः तत्र नास्ति इति वक्तुं शक्यते। अथवा षट्चतुर्भ्यश्च (७-१-५५) इति नुडागमदृष्ट्या नलोपस्यासिद्धत्वेन न सन्निपातविघात इति वक्तुं शक्यते च।

पूर्वोक्तरीत्या नलोपस्यासिद्धत्वेन सन्निपातविघातो नेति वक्तुं न शक्यते। तथा सति कृन्मेजन्तः इति सूत्रभाष्यविरोधः। तत्रहि - हे गौरि इत्यत्र हे गौरी + सु इति स्थिते गौरीत्यस्य नदीसंज्ञायाम् अम्बार्थनद्योर्ह्रस्वः (अम्बार्थानां नद्यन्तानां च ह्रस्वः स्यात् सम्बुद्धौ) इत्यनेन सम्बुद्धिं निमित्तीकृत्य ह्रस्वे, एङ् ह्रस्वात् सम्बुद्धेः इत्यनेन सुलोपे हे गौरि इति रूपं भवति। तत्र भाष्यकारः सम्बुद्धिं निमित्तीकृत्य जायमानः ह्रस्वः तद्विघातकसुलोपं प्रति निमित्तं न भवेत् इत्याशङ्क्य 'नदीह्रस्वत्वं सम्बुद्धिलोपस्य' इति नात्र सन्निपातपरिभाषा प्रवर्तते इत्युक्तम्।

भवदुक्तरीत्या तत्रापि प्रत्ययलक्षणेन सम्बुद्धिः भवतीति चिन्तयति चेद्भाष्यकारः तत्रातिव्याप्तिं किमर्थ प्रत्यपीपदत्?

किञ्च पूर्वत्र कर्तव्ये परस्यासिद्धत्वं पूर्वत्रासिद्धम् इत्यनेन बोध्यते, परे कृते तस्य पूर्वदृष्ट्या असिद्धत्वं न कदापि बोध्यते। अतः प्रकारान्तरेण रूपं न सिद्ध्यति।

अन्यथा (हलीत्यपकर्षाभावे) अष्टन् + आम् इति स्थिते नुट्-आत्वयोः प्राप्तौ षट्चतुर्भ्यश्च (७-१-५५) अष्टन आ विभक्तौ (७-२-८४) इति, उभयोः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मध्ये परत्वात् आत्वं प्राप्नोति, एवं नित्यत्वादपि प्राप्नुयात्। यतो हि नुडागमे कृतेऽकृतेऽपि आत्वस्य प्राप्तिः विद्यते। अतः आत्वे नान्तत्वाभावात् षट्संज्ञायाः अभावात् नुडागमो न स्यात्। तथा च अष्टानाम् इति रूपं न सिद्ध्यति। अतः हलीत्यपकर्षः आवश्यकः।

अष्टन् शब्दस्य नान्तसंख्यावाचकत्वेन षट्संज्ञा ष्णान्ता षट् इति सूत्रेण विधीयते। तच्च संज्ञाविधायकं सूत्रम्। संज्ञापरिभाषाणां विध्युपकारविषये पक्षद्वयं विद्यते – यथोद्देशपक्षः, कार्यकालपक्षश्च। तत्र यथोद्देशपक्षे भविष्यति किञ्चिदनेन प्रयोजनम् इति निर्णीय आदावेव अष्टन् शब्दस्य नान्तसंख्यावाचकत्वं निमित्तीकृत्य (विभक्तिनिरपेक्षत्वेन अन्तरङ्गत्वात्) षट्संज्ञां कुर्मः, अनन्तरम् आमि आत्वे, पूर्वां कृतां संज्ञा कृतात्वेऽपि एकदेशविकृतमनन्यवत् इति परिभाषया आनीयते। तेन षट्चतुर्भ्यश्च इति नुडागमो भवति, अष्टानाम् इति रूपं सिद्ध्यति हलीत्यस्यापकर्षाभावेऽपि। अतः हलीत्यपकर्षस्य यथोद्देशपक्षे प्रयोजनं नास्त्येव।

कार्यकालपक्षे षट्संज्ञायाः विधिसूत्रैकवाक्यतया नुडेकवाक्यतापन्नत्वेन, परनिमित्तकत्वेन बहिरङ्गत्वम् आत्वस्य विभक्तिनिमित्तकत्वेन समानम्। हलीत्यस्यापकर्षाभावे नुटि कृते, अकृतेऽपि आत्वस्य प्राप्त्या आत्वं नित्यं भवति। नित्यत्वात् आत्वे नान्तसंख्यावाचकत्वाभावान्नुडागमो न स्यात्। तथा च अष्टानाम् इति रूपं न सिद्ध्यति। तत्सिद्ध्यर्थं हलीत्यपकर्षः भाष्यकारेण स्वीकृतः।

शब्दरत्नकारः एवमवोचत – षट् संज्ञायाः अल्विधित्वेन तन्मूलककार्याणामप्यल्विधित्वमित्यभिमानः। यदि नान्तसंख्यावाचकत्वसमानाधिकरणधर्मविशेषरूपस्य षट्त्वस्य स्थान्यल्धर्मत्वाभावेन तत्प्रयुक्तकार्यस्य नुडादेरपि नाल्विधित्वमिति स्थानिवत्त्वेन एकदेशविकृतन्यायेन च नुट् सुलभः तर्हि मुख्ये कार्यकालपक्षे तत्सिद्धिः हलीत्यनुवृत्तेः फलमिति बोध्यम्।

एवं रीत्या अष्टन आ विभक्तौ इति सूत्रे हलीत्यपकर्षस्य 'अष्टानाम्' इति रूपसिद्धिः प्रयोजनमिति प्रतिपादितम्। तथा च आत्वम् अष्टाभिः अष्टाभ्यः, अष्टानाम्, अष्टासु इत्यत्र हलादिविभक्तिषु भवति। जसि, शसि अजादित्वात् न भवति इति निश्चीयते।

एवं स्थिते अष्टाभ्य औश् इति सूत्रेण अष्टाभ्य परयोः जश्शसोः औश् विधीयते। सूत्रार्थः एवं वर्ण्यते कृताकारादष्टनः परयोः जश्शसोः औश् भवतीति। तत्कथं सङ्गच्छते। हलादिविभक्तिपरकत्वाभावात्। इति चेद्–

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उच्यते- अष्टाभ्यः इति कृतात्वस्य अनुकरणम्- इति शेखरकारः उवाच। लक्षणवशसम्पन्नत्वे हि तस्य वैकल्पिकतया मात्रालाघवादष्टभ्य इति वदेदिति तस्याशयः। वैकल्पिकेषु भावानुष्ठानं धर्माधिक्यफलायेति तु लौकिकप्रयोविषयो नतु सौत्रप्रयोगविषय इति तदाशयः इति गुरुप्रसादशेषे व्याख्यातारः लिलिखुः।

अष्टन आ विभक्तौ इति सूत्रे हलीत्यपकृष्य वाक्यद्वयं क्रियते - अष्टनः इत्येकम्, आ विभक्तौ इत्यपरम्। द्वितीयवाक्ये हलीत्यस्य सम्बन्धः, तेन प्रथमवाक्यं क्वचिदक्ष्वपि प्रवर्तते। इति शेश्वरकाराशयः।

शेखरकारः अष्टाभ्य औश् इति सूत्रे शब्देन्दुशेखरे एवं प्रास्तावीत् - अष्टाभ्य उङ् इति कुतः नोक्तम् इति। तेषामयमाशयः भवितुमर्हति यत् - तदा सूत्रार्थः एवं भवति 'कृताकारादष्टनः परयोः जश्शसोः उङ् भवति इति। उङः ङित्वात् ङिच्च इत्यनेन अन्तादेशो भवति। जसः सकारस्य उङ् भवेत्। अष्टा अ उ इति स्थिते प्रत्ययावयवयोः द्वयोः आकार उकारयोः गुणे, वृद्धौ अष्टौ इति रूपं भवति खलु इति चेद्-

अष्टौ इति रूपं न सिद्ध्यति - अष्टा अ उ इति स्थिते गुणो न भवति। 'इण्ङशीनामाद्गुणः सवर्णदीर्घत्वात्' "शचङन्तस्यान्तरङ्गलक्षणत्वात्" इति वचनाभ्याम् अन्तरङ्गत्वात् सवर्णदीर्घ एव भवति। एवञ्च आदौ सवर्णदीर्घः प्रवर्तते। तदनन्तरं गुणे अष्टौ इति रूपं न सिद्ध्यति। अतः अष्टाभ्य औश् इति सूत्रं भगवान् पाणिनिः अकार्षीत्।

वाराणसेयाः एव व्याचख्युः - प्रथमाबहुवचने अष्टौ इति रूपं सिद्ध्यति। अष्टा अ उं इति स्थिते सवर्णदीर्घः - गुणः इति द्वे कार्ये प्राप्नुतः। प्रकृतिप्रत्ययसम्बन्धिवर्णापेक्षदीर्घापेक्षया प्रत्ययमात्रसम्बन्धिवर्णापेक्षत्वेन गुणस्यापि अन्तरङ्गत्वात् उभयोः अन्तरङ्गयोः, कृताऽकृतप्रसङ्गित्वेन नित्यत्वात् पूर्वं गुणे अष्टौ इति रूपं प्रथमाबहुवचने भवति। द्वितीयाबहुवचने शसि गुणे कृते अष्टा ओ इति स्थिते असर्वनामस्थानाजादिविभक्तिपरकत्वेन भसंज्ञायाम् आतो धातोः इति आकारलोपापत्तिः। अत्राकारान्तधातुर्नास्ति खलु इति चेत् - तत्र आतः, धातोः इति योगविभागं कृत्वा धातुग्रहणम् आबन्तनिवृत्यर्थमिति सिद्धान्तितत्वात्। अतो द्वितीयाबहुवचने एव दोषः इति।

नागेशाशयं समर्थयन् गुरुप्रसादशेषे वेङ्कटेश्वरशास्त्रिणः एवं खण्डयामासुः। प्रकृतिप्रत्ययसम्बन्धिकार्यं बहिरङ्गम्, प्रत्ययसम्बन्धिकार्यमन्तरङ्गम् इत्येतादृश

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्तरङ्गविचारः क्वापि अदर्शनेन मूलोक्तरीतिरेव साध्वी। इति।

वैकल्पिकं चेदमष्टन आत्वम् अष्टनो दीर्घात् इति सूत्रे दीर्घग्रहणात् ज्ञापकात् इति सिद्धान्तकौमुद्यां भट्टोजीदीक्षितः अगादीत्। तथाहि - अष्टनो दीर्घात् (६-१-१७२) इति सूत्रस्यैवमर्थो विद्यते - दीर्घान्तादष्टनः परा असर्वनामस्थानविभक्तिः उदात्ता भवति। (अष्टाभिः दशभिः) इत्युदाहरणम्। यदि आत्वं नित्यं तदा सर्वदा अष्टन् शब्दः दीर्घान्त एव भवति। अत ह्रस्वेऽन्तोदात्तव्यावृत्त्यर्थं क्रियमाणं दीर्घग्रहणं व्यर्थं सत् एवं ज्ञापयति - इदम् = श्रुतम् हलादौ, अनुमितम् = जश्शसोः विषये अष्टनः आत्वं वैकल्पिकमिति। तेन ह्रस्वे अष्टभिः इत्यत्र झल्युपोत्तमम् (६-१-१८०) इति (षट्त्रिचतुर्भ्यो या झलादिविभक्तिः तदन्ते पदे उपोत्तमम् उदात्तं भवति इत्यर्थः अध्वर्युभिः पञ्चभिः इत्युदाहरणम्) उपोत्तमोदात्तत्वं भवति।

अत्र शब्दरत्नकारः एवमभिप्रैति - ज्ञापनोत्तरं दीर्घग्रहणस्य स्वांशे चरितार्थ्यं न सम्भवति इति। तथाहि - अष्टन् भिस् इत्यवस्थायामात्वे अष्टाभिः इत्यत्र अष्टनो दीर्घात् इति अष्टन्स्वरः चरितार्थः। कार्यकालपक्षे सम्प्रति षट्संज्ञा न प्रवर्तते, नान्तत्वाभावात्। अष्टन् स्वरार्थं षट्संज्ञायाः अपेक्षा नास्ति। अतः निस्संशयम् अष्टन्स्वरः प्रावर्तत। स च स्वरः अष्टभिः इत्यत्रापि प्राप्नोति। (झल्युपोत्तमम् इति स्वरः पञ्चभिः इत्यत्र चरितार्थः) तत्रैव झल्युपोत्तमम् (६-१-१८०) इति सूत्रेण उपोत्तमोदात्तत्वञ्च प्राप्नोति। तदाष्टन् स्वरापेक्षया परत्वात् झल्युपोत्तमम् इति स्वर एव प्रवर्तते। तदनन्तरं पुनः अष्टन् स्वरः न प्रवर्तत एव - सकृदगतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव इति न्यायात्- (अन्यत्र चरितार्थयोः द्वयोः शास्त्रयोः एकस्मिन् लक्ष्ये युगपत्प्रवृत्तौ सकृदेकवारं यद्बाधितं तद्बाधितमेव इति परिभाषार्थः।) एवञ्च तत्र अष्टन् स्वरस्य प्राप्तेरेवाभावेन तद्वारणार्थं कृतेन दीर्घग्रहणेन किम्?

सिद्धान्ती एवं कथयति - अष्टभिः इत्यत्र अष्टन्स्वरापेक्षया परत्वात् झल्युपोत्तमम् इति स्वर एव प्रवर्तते सकृद्गतिन्यायात् इति। यावता विनाऽनुपपत्तिः तस्य सर्वस्य ज्ञाप्यत्वम् इति न्यायेन दीर्घग्रहणस्य आत्ववैकल्पिकत्वप्रतिपादकपरभाष्यप्रामाण्येन सकृद्गतिन्यायस्यानित्यत्वज्ञापनद्वारा पुनः प्रसङ्गन्यायस्य प्रवृत्तिः ज्ञाप्यते। तेन पुनः अष्टन् स्वरः ह्रस्वे प्राप्तौ तद्व्यावृत्त्यर्थं दीर्घग्रहणं स्वांशे चरितार्थम्। एवञ्च कार्यकालपक्षे दीर्घग्रहणम् आत्वस्य वैकल्पिकत्वं, सकृद्गतिन्यायस्य वैकल्पिकत्वञ्च ज्ञापयति।

यदि त्विह यथोद्देशपक्ष एव स्वीक्रियेत, तदा हलीत्यस्याऽऽत्वविधायकसूत्रेऽपकर्षो न कार्यः। अतः लाघवात् यथोद्देशपक्ष एवात्र स्वीक्रियते। तदा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अष्टन् इत्यवस्थायां नान्तसंख्यावाचकत्वात् षट् संज्ञा प्रावर्तत। ततः भिसि, आत्वं प्रवर्तते। एवञ्च अष्टाभिः इत्यत्रापि षट्त्रिचतुर्भ्यो हलादिः (६-१-१७९) एभ्यो हलादिः विभक्तिः उदात्ता भवतीति सूत्रस्य प्राप्त्या अष्टनो दीर्घात् इति सूत्रस्य अचारितार्थ्येनाऽपवादत्वेन अष्टाभिः इत्यत्रेव अष्टभिः इत्यत्रापि स्यादिति दीर्घग्रहणमिति। नान्ते कृतषट्संज्ञायाः स्थानिवद्भावेन आत्वानन्तरमपि आनीयते। नात्र अनल्विधाविति निषेधः - नान्तसंख्यावाचकत्वसमानाधिकरणधर्मरूपस्य षट्संज्ञानिमित्तिकस्वरस्याल्धर्मत्वाभावेन। स्वरादीनाम् इत्यत्र आदिपदेन षट्चतुर्भ्यश्च इति नुडागमश्च गृह्यते। अतः सोऽपि नाल्विधिः। एवञ्च अत्रापि षट्त्रिचतुर्भो हलादिः इत्यस्य प्राप्त्या अष्टन् स्वरस्य तदपवादत्वात्।

दीर्घग्रहणं षट्संज्ञाज्ञापकमाकारन्तस्येति भाष्यस्यायमेवाशयः इति न विरोधः। एवञ्च अष्टाभिः इत्यत्रैव अष्टभिः इत्यत्रापि तत्प्रवृत्तिः स्यादिति तद्व्यावृत्त्यर्थं क्रियमाणं दीर्घग्रहणं विकल्पज्ञापकमिति भावः।

एवं यथोद्देशपक्षे अष्टन् शब्दस्य षट्संज्ञा अन्तरङ्गत्वात् प्रावर्तत इति निश्चिते पक्षे सम्प्रति दोषः। अष्टन् शब्दस्य द्वितीयाबहुवचने शसि, तस्य अष्टाभ्य औश् इत्यनेन औ आदेशे, आत्वानन्तरम् आकारान्तस्यापि षट्संज्ञायां तस्य षड्भ्यो लुक् इत्यनेन लुकि अष्टौ इति रूपं न सिद्ध्यति। इति चेत्-

सत्यम्। आकारान्तस्य षट्त्वेऽपि अष्टाभ्य औश् इत्यनेन औश्विधिसामर्थ्याल्लुक् न भवति।

पूर्वपक्षी एवं पृच्छति - षट्त्रिचतुर्भ्यो हलादिः, झल्युपोत्तमम् इति द्वयोः सूत्रयोः अपवृत्तिस्थले अष्टौ इति द्वितीयाबहुवचने अष्टनो दीर्घात् इति सूत्रं प्रवर्तते। एवञ्च अष्टौ इत्यत्र अष्टन् स्वरः चरितार्थः। तत्र चरितार्थः अष्टन् स्वरः अष्टभिः इत्यत्र प्राप्नोति, परेण झल्युपोत्तमम् इत्यनेन बाध्यते। अत ह्रस्वे प्राप्तेरेवाभावेन तत्र स्वरव्यावृत्त्यर्थं क्रियमाणं दीर्घग्रहणं किमर्थम्?

अष्टौ इत्यत्र अष्टा + औ इत्यवस्थायाम् वृद्धिः प्राप्नोति, अष्टन् स्वरश्च प्राप्नोति। अन्तरङ्गत्वात् एकादेशः प्रवर्तते। इदानीं षट् संज्ञकात्परत्वेन शसः अभावात् स्वरो न प्रवर्तते। अतः स्वरस्य चारितार्थ्यं नास्ति खलु-

उच्यते - स्वरात् पूर्व सन्धिकार्यं न प्रवर्तते इति 'यद्धितुपरं छन्दसि (८-१-५६) इति सूत्र भाष्ये ध्वनितम् - तत्रहि - लोट् च (८-१-५२) इति सूत्रे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत् (८-१-५१) इत्यनुवर्तमाने लोडन्तं गत्यर्थलोटा युक्तं नानुदात्तम्, आगच्छ देव ग्रामं पश्य इत्युदाहरणम्। पश्य इति लोडन्तं गत्यर्थलोटा आगच्छ इत्यनेन युक्तं तत् नानुदात्तं प्राप्नोति। अनन्तरं यद्धितुपरम् छन्दसि इति सूत्रेण तिङन्तं नानुदात्तम् इति स्वरनिषेधः विहितः। निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्- कच्चिद्यत्रयुक्तम् (८-१-३०) एतैः युक्तं न निहन्यते। हि च (८-१-३४) हियुक्तं तिङन्तं नानुदात्तम्। तुपश्यपश्यताऽहैः पूजायाम् (८-१-३९) एभिः युक्तं तिङन्तं न निहन्यते पूजायाम्। एतैः सूत्रैः सिद्धे यद्धितुपरम् छन्दसि इति सूत्रं नियमार्थम्। एतैरेव परभूतैः योगे नान्यैः इति। तेन 'जाये स्वो रोहावेहि इत्यत्र (जाये स्वः रोहाव आ + इहि) आङ परत्वम् इहीत्यस्य अस्तीति कृत्वा तिङतिङः इति निघातो भवति।

लोट् च (८-१-५२) इति सूत्रे 'गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत् इति निषेधमाशङ्क्य छान्दसत्त्वेन समाहितम्। रोहाव आ इहि इत्यत्र आङ् इत्युपसर्गः रुहधातोः छन्दसि परेऽपि इत्यनेन परे भवति इति कथयामः चेत् - तदा समानवाक्यत्वाभावात् समानवाक्ये निघातयुष्मदस्मदादेशाः इति नियमात् न स्यात्। रुह धातोः गत्यर्थकत्वाभावात्। उपसर्गस्तु नानेन सम्बध्यते। अत एव न रुहिः गत्यर्थः। (अवष्टम्भार्थकः) अत्र प्रमाणम् - गत्यर्थाकर्मकश्लिषशीङ्स्थासव-सजनरुहजीर्यतिभ्यश्च इति सूत्रे गत्यर्थेभ्यः पृथक् रुहिग्रहणं चरितार्थम्। येषामुपसर्गयोगाद्विना गतिप्रतीतिहेतुत्वं ते गत्यर्थाः रुहिस्तु उसर्गयोगे गतिवाची। यदि रुहिः न गत्यर्थः - आराहन्ति हस्तिनं मुनष्याः, आरोहयति हस्ती स्थलं (हस्त्युपरिध्रियमाणं काष्ठादिमयमुपवेशनम्) मनुष्यान् - गतिबुद्धि - इत्यादिना कर्मसंज्ञा न प्राप्नोति। तस्मान्नैतच्छक्यं वक्तुं 'न रुहिः गत्यर्थः' इति। कस्मात्तर्हि रोहावेत्यनेन युक्ते एहित्यस्य न भवति? छान्दसत्वात्॥ तत्र कैयटेन एवं व्याख्यातम् - नित्यत्वात् एकादेशे निघाताप्राप्तिमाशङ्क्य एवंविधभाष्यविचारात्पूर्वं सन्धिकार्याप्रवृत्तिरनुमीयते इति। नेन्द्रस्य परस्य इति सामान्यापेक्षं ज्ञापकमिति नागेशः। एवञ्च अष्टौ इत्यत्र सन्धिकार्यात् पूर्वं स्वर एव प्रवर्तते, अतः अष्टौ इत्यत्र अष्टन् स्वरः चरितार्थः। तत्र चरितार्थः अष्टन् स्वरः अष्टभिः इत्यत्र प्राप्नोति, परेण झल्युपोत्तमम् इत्यनेन बाध्यते। अतः ह्रस्वे प्राप्तेरेवाभावेन तत्र स्वरव्यावृत्त्यर्थं क्रियमाणं दीर्घग्रहणं किमर्थम्?

दीर्घग्रहणस्य आत्ववैकल्पिकत्वज्ञापकतापरभाष्यप्रामाण्यात् अष्टन् शब्दस्य 'घृतादीनाञ्च' इत्यन्तोदात्तत्वेन तेन साकम् एकादेशे 'एकादेश उदात्तेन उदात्तः'

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्यनेन उदात्तो भवति। अतः एवमन्तोदात्तत्वं सिद्ध्यति। घृतादिषु पाठाभावे 'त्रः संख्यायाः' इत्यनेनाद्युदात्तत्वं स्यात्। किञ्च एकादेशे कृतेऽपि एकदेशविकृतमनन्यवत् इति न्यायेन टान्तेऽष्टन् शब्दत्वं परादिवद्भावेन औ इत्यस्य विभक्तित्वं सिद्ध्यति। एवम् अष्टनो दीर्घात् इति सूत्रं विनापि अन्तोदात्तस्वरः सिद्ध्यति। अतः अष्टन् स्वरः न चरितार्थः।

तर्हि प्रियाष्टाभ्याम् इति समासे अष्टन् स्वरः चरितार्थः। षट् संज्ञकात्परात्वमाश्रित्य- प्राप्तस्वरविधायकसूत्रद्वये विहितविशेषणाश्रयणेन गौणे समासे षट्स्वराप्राप्तेः। षट् स्वराप्राप्तिस्थले अष्टन् स्वरः चरितार्थः। अष्टभ्याम् इत्यत्र उभौ स्वरौ प्रप्नुतः। परत्वात् षट् स्वर एव प्रवर्तते। अतः तत्र स्वरव्यावृत्त्यर्थं क्रियमाणं दीर्घग्रहणं व्यर्थमेव।

एतादृशार्थस्वीकारादेव 'चतुरः शसि' ('-१-१६७) (चतुरोऽन्त उदात्तः शसि परे इत्यर्थः।) इति सूत्रभाष्यं सङ्गच्छते। तत्र हि - चतुरः शसि इत्यनेन विहितः स्वरः 'शसि स्त्रियां प्रतिषेधः' चतस्रः पश्य इति वार्तिककारः उवाच।

अन्यथा - चतुर् शब्दः एवं निष्पन्नो भवति - चतेरुरन् इति उणादिसूत्रेण चते - याचने इति धातोः उणादि उरन् प्रत्ययः। प्रत्ययस्य नित्वेन 'त्रः संख्यायाः' इति आद्युदात्तत्वं भवति। तस्य स्त्रियां त्रिचतुरोः स्त्रियां तिसृचतसृ इत्यनेन चतस्रादेशे स्थानिवद्भावेन अन्तोदात्तत्वे सिद्धे, तिसृ + अस् इति स्थिते अचि र ऋतः इत्यनेन रेफादेशे उदात्तयणो हल्पूर्वात् (६-१-१७४) इत्यनेन (उदात्तस्थाने यो यण् हल्पूर्वः तस्मात् परा नदी शसादिविभक्तिश्च उदात्ता स्यात्) उदात्तत्वं तकाराकारस्य सिद्ध्यति। अतः पुनर्विधानं किमर्थमित्याशयेन 'चतुरः शसि स्त्रियामप्रतिषेधः आद्युदात्तनिपातनात्' (चतसर्याद्युदात्तनिपातनात्सिद्धम्) इति वार्तिककारः अवोचत्। स्थानिवद्भावादाद्युदात्तत्वे सिद्धे पुनराद्युदात्तनिपातनमस्य स्वरस्य बाधकमित्यर्थः। **विभक्तिस्वरः चतुरः शसि इति सूत्रविहितः। निपातस्वरः - चतुरः शसि स्त्रियामप्रतिषेधः आद्युदात्तनिपातनात् इति वार्तिकविहितः।**

षट्त्रिचतुर्भ्यो हलादिः, झल्युपोत्तमम् इत्यत्र विहितविशेषणत्वस्वीकारे न ह्यन्यद्धलादिग्रहणे प्रयोजनम् इति भाष्यमेव प्रमाणम्। - अयम्भावः - षट्त्रिचतुराः नित्यबहुवचनान्ताः। अतः द्विवचनैकवचने न भवतः। तत्र षड्भ्यः परयोः जश्शसोः लुगेव। अन्या सर्वा हलादयः। 'अञ्चेश्छन्दस्यसर्वनामस्थानम् (६-१-१७०) (अञ्चेः परा विभक्तिरुदात्ता भवति) इति सूत्रात् असर्वनामथाने इत्यनुवृत्त्या त्रिचतुरोः जसि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नेदम्। त्रीन् इति शसि एकादेश उदात्तेनोदात्तः इत्येव सिद्धम्। तिस्रः पश्य इत्यत्र तु उदात्तयणो हल्पूर्वात् (६-१-१७४) इयनेन (उदात्तस्थाने यो यण् हल्पूर्वः तस्मात् परा नदी शसादिविभक्तिश्च उदात्ता स्यात्) सिद्धम्। अन्या सर्वा हलादयः। चतुरः पश्य इत्यत्रापि नानेन स्वरः- चतुरः शसि इत्यारम्भात्। तस्मात् चतस्रः पश्येत्येव तद्व्यावर्त्यम्। यदि निपातनस्वरो विभक्तिस्वरबाधकः स्यात् तदा तद्वैयर्थ्यं स्पष्टमेव। तस्मात् निपातनस्वरः विभक्तिस्वरस्य बाधको न भवति इति ज्ञाप्यते। तेन चतसृणामित्यादौ विभक्तिस्वरः सिद्ध्यति। अतः चतसृणामित्यत्र विभक्तिस्वरः सिद्धः। षट् त्रिचतुर्भ्यो हलादिः इति सूत्रे हलादिग्रहणेन निपातनस्वरस्य विभक्तिस्वराबाधकत्वज्ञापनात्। आद्युदात्तनिपातने हि हलादिग्रहणानर्थक्यम्, 'न ह्यन्यद्धलादिग्रहणं प्रयोजयति, अन्यदतश्चतसृशब्दात्' इति भाष्योक्तं सङ्गच्छते।

चतुरः शसि (६-१-१६७) इति सूत्रभाष्यम् - **शसि स्त्रियां प्रतिषेधः।** शसि स्त्रियां प्रतिषेधो वक्तव्यः। चतस्रःपश्य। **चतुरः शसि स्त्रियामप्रतिषेध आद्युदात्तनिपातनात्॥** चतुरः शसि स्त्रियामप्रतिषेधः अनर्थकः प्रतिषेधोऽप्रतिषेधः। शसि स्वरः कस्मान्न भवति? आद्युदात्तनिपातनात्। आद्युदात्तनिपातनं करिष्यते, स च निपातनस्वरः शसि स्वरस्य बाधको भविष्यति॥ एवमप्युपदेशिवद्भावो वक्तव्यः। यथैव हि निपातनस्वरः शसिस्वरं बाधते एवं विभक्तिस्वरमपि बाधेत। चतसृणामिति। **विभक्तिस्वरभावश्च हलादिग्रहणात्** विभक्तिस्वरस्य च भावः सिद्ध। कुतः? हलादिग्रहणात्। यदयं षट्त्रिचतुर्भ्यो हलादिः इति हलादिग्रहणं करोति तज्ज्ञापयत्याचार्यो 'न निपातनस्वरो विभक्तिस्वरं बाधते' इति। कथं कृत्वा ज्ञापकम्? **आद्युदात्तनिपातने हि सति हलादिग्रहणानर्थक्यम्॥** आद्युदात्तनिपातने हि सति हलादिग्रहणमनर्थकं स्यात्। नह्यन्यद्धलादिग्रहणं प्रयोजयत्यन्यदतश्चतसृशब्दात्। षट् संज्ञास्तावन्न प्रयोजयन्ति। किं कारणम्? **बहुवचनविषयत्वात्।** तेन द्विवचनैकवचने न स्तः। जश्शसी चात्र लुप्येते। अन्याः सर्वाः हलादयो विभक्तयः। त्रिशब्दश्चापि न प्रयोजयति। किं कारणम्? बहुवचनविषयत्वात्। तेन द्विवचनैकवचने न स्तः। असर्वनामस्थानमिति वचनाण् जसि न भविष्यति। शसि भवितव्यमेकादेश उदात्तेनोदात्त इति। अन्याः सर्वाः हलादयो विभक्तयः। तिसृशब्दश्चापि न प्रयोजयति। किं कारणम्? बहुवचनविषथत्वात्। तेन द्विवचनैकवचने न स्तः। असर्वनामस्थानमिति वंचनात् जसि न भवितव्यम्। शसि भवितव्यम् उदात्तयणो हल्पूर्वादिति। अन्याः सर्वाः हलादयो विभक्तयः। चतुः शब्दश्चापि न प्रयोजयति। किं कारणम्? बहुवचनविषयत्वात्। तेन द्विवचनैकवचने न स्तः। असर्वनामस्थानमिति वचनात् जसि न भवितव्यम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शसि भवितव्यम्' चतुरः शसीति। अन्याः सर्वाः हलादयो विभक्तयः। तत्र चतसृशब्दादेकस्माच्छस् असर्वनामस्थानमजादिर्विभक्तिरस्ति। यदि चाऽत्र निपातनस्वरः स्याद्धलादिग्रहणमनर्थकं स्यात्। नैव वा पुनरत्र शसिस्वरः प्राप्नोति॥ किं कारणम्? यणादेशे कृते शसः पूवम् उदात्तभावी नास्तीति कृत्वा। अवशिष्टस्य तर्हि प्राप्नोति। ऋकारेण व्यवहितत्वान्न भविष्यति। यणादेशे कृते नास्ति व्यवधानम्। स्थानिवद्भावाद्व्यवधानमेव। प्रतिषिध्यतेऽत्र स्थानिवद्भावः 'स्वरविधिं प्रति न स्थानिवद्भवतीति। नैषोऽस्ति प्रतिषेधः। उक्तमेतत् - प्रतिषेधो स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवदिति।

यदि षट् स्वरविधायके सूत्रे न विहितविशेषणं तदा अन्यदतश्चतसृशब्दात् इति कथनमसङ्गतं स्यात्। प्रियाष्टानः इति बहुव्रीही सम्भवात्।

प्रियाः अष्टौ यस्य सः इति बहुव्रीहिसमासे प्रियाष्टाः- प्रियाष्टा इति वा भवति। तस्य षष्ठी बहुवचने प्रयोजनसत्त्वात् नान्यदतः चतसृशब्दात् इति कथनमसङ्गतं स्यात्। अष्टौ परमाष्टौ इत्याद्यपि न व्यावर्त्यम्। तत्र एकादेश उदात्तेनोदात्त इति स्वरेणैव सिद्ध्यति।

वस्तुतस्तु ष्णान्ता षट् इति सूत्रे भाष्ये अष्टन आ विभक्तौ इत्यत्र हलीत्यपकर्षमुक्त्वा प्रियाष्टौ - प्रियाष्टाः इति न सिद्ध्यति, प्रियाष्टानौ - प्रियाष्टानः इत्येव प्राप्नोति इति शङ्किते यथा लक्षणमप्रयुक्ते इति समाहितम्। नैव वा लक्षणमप्रयुक्ते प्रवर्तते, प्रयुक्तानामेवान्वाख्यानात् इति कैयटः।

कदष्टौ इति व्यावर्त्यं स्यात्। तथाहि - कुत्सिताः अष्टौ इति विग्रहे कुशब्दस्य अष्टन् शब्देन कुगतिप्रादयः इति समासे 'कोः कत्तत्पुरुषेऽचि' इति कोः कदादेशे सिद्धम्। तत्र समासान्तोदात्ते ततो वृद्ध्या एकादेशे औकारे तस्य एकादेश उदात्तेनोदात्तः इत्यन्तोदात्तत्वस्वरः सिद्ध्यति। तत्र स्वरसाधनार्थमपि अष्टन् स्वरः आवश्यकः।

अत्रोच्यते - कुशब्दस्य निपातत्वेन 'निपाता आद्युदात्ता' इति आद्युदात्ततया "तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः" इति पूर्वपदप्रकृतिस्वरेण अष्टावित्यस्याद्युदात्तत्वात्। अत्र अव्यये नञ् कुनिपातानाम् इति परिगणनेन पूर्वपदप्रकृतिवरव्यावृत्तिस्तु न कर्तुं शक्यते स्थानिवत्त्वेन कत् इत्यस्य कुशब्दत्वाक्षतेः। आद्युदात्तत्वे प्राप्ते अन्तोदात्तत्वार्थम् अष्टन् स्वरः चरितार्थः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चतुरः शसि इति सूत्रभाष्य (न ह्यन्यद्धलादिग्रहणम्) प्रामाण्यात् कदष्टौ इत्यादीनामनभिधानमेव।

वस्तुतः दीर्घग्रहणस्य आत्ववैकल्पिकत्वप्रतिपादकपरभाष्यप्रामाण्यात् प्रियाष्टादीनामनभिधानमेव। तिसृभ्यो जसः इति सूत्रे भाष्येऽपि जस् ग्रहणं किमर्थम्? इति आशङ्क्य तिसृकेति कन्प्रत्ययान्तं प्रत्युदाहरणमुक्त्वा जस्ग्रहणानर्थक्यमन्यत्राभावात् इत्युक्तम्। अस्यापि नित्यबहुवचनान्ततया तदन्ययोरभाव एव, शसि तु उदात्तयणः इत्येव सिद्धम्। अन्याः सर्वाः हलादयः तत्र षट्त्रिचतुर्भ्यो हलादिः इत्येव भविष्यति। तिसृकेत्यपि न प्रयोजनम्। मध्येऽपवादन्यायेन तिसृभ्यः इत्यस्य अनुदात्तौ सुप्पितौ इति स्वरं बाधिष्यते नित्स्वरं न बधिष्यते। 'उपसमस्तार्थमेके' इति कथनात् तदन्तेऽपि तिसृभ्यो जसः इति स्वरः प्रवर्तत इति लभ्यते। अतः षट्स्वरः अष्टन् स्वरश्च तदन्तेऽपि प्रवर्तन्ते।

चतुरः शसि इति सूत्रस्थं स्त्रियां प्रतिषेधो वाच्यः इति वार्तिकमपि न कार्यम्। चतस्रः पश्य इत्यत्र स्वररेफादेशयोः प्राप्तौ परत्वात् रेफादेशे तस्य स्थानिवत्त्वेन व्यवधानात् तकाराकारस्य स्वराप्राप्तेः। न च रेफस्यैव स्वरो भवत्विति वाच्यम्? हल्स्वरप्राप्तौ व्यञ्जनस्याऽविद्यमानवद्भावात्। न च स्थानिवद्भावस्य स्वरे कर्तव्ये निषेधो भविष्यतीति वाच्यम्। स्वरदीर्घयलोपेषु लोपाजादशस्यैव स्थानिवद्भावनिषेधात्। एवमाद्युदात्तयोः त्रिचतुरोः आन्तरतम्यादाद्युदात्ते सिद्धे आद्युदात्तनिपातनमपि न कार्यम्। हलीत्यस्यापकर्षस्तु प्रतिपत्तिलाघवाय इति।

तर्हि चतुरः शसीति सूत्रभाष्यविरोधः। तत्र हि विभक्तिस्वरभावश्च हलादिग्रहणात् इति। तच्च वार्तिकं तिसृभ्यो जसः इति सूत्रस्थ जस्ग्रहणानर्थक्यमन्यत्राभावात् इति वार्तिकवद्दूष्यम्।

तिसृभ्यो जसः इति सूत्रस्थ उपसमस्तार्थमेके इति भाष्ये एके इति मुख्यार्थकम्। अतो विहितविशेषणं नास्त्येव क्वापि। तस्मात् गौणे षटत्रिचतुर्भ्यो हलादेः, चतुरः शसि इत्यादयश्च प्रवर्तन्त एव। एवञ्च सत्यभिधाने प्रियत्रीन् इत्यादिव्यावृत्त्यर्थं हलादिग्रहणं सार्थकम्।

प्रियाष्टादीनामनभिधानादेव अष्टाभ्य औश् इति सूत्रे भाष्ये विभाषा आत्वं यदयमात्वभूतस्य ग्रहणं करोति अष्टाभ्य इति, अन्यथाऽष्टन इत्येव ब्रूयात् इत्युक्तम्। कैयटरीत्या गौणे प्रवृत्त्यभावाय बहुवचननिर्देशस्यावश्यकतया तदसङ्गतिः स्पष्टैव। एवञ्च हरदत्तादिरत्नकारान्तानामेतत्प्रयोगविचारः सर्वोऽपि निष्फल एवेति बोध्यम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अत एव ष्णान्ता षट् इति सूत्रे भाष्ये अष्टानाम् इत्येतत्सिद्धये हलीत्यपकर्षमुक्त्वा तत्र पक्षे प्रियाष्टौ-प्रियाष्टाः इति सिद्ध्यति, प्रियाष्टानी - प्रियाष्टानः इति प्राप्नोति इति शङ्किते 'यथलक्षणमप्रयुक्ते' इति समाहितम्। तत्र कैयटः १ लक्षणमनतिक्रम्य यथालक्षणमिति अव्ययीभावसमासः। अप्रयुक्ते विषये लक्षणानतिक्रमेण प्रवृत्तिरित्यर्थः। २ लक्षणस्याभावः अलक्षणम्, अलक्षणं योग्यम् यथालक्षणम् इति अव्ययीभावगर्भोऽव्ययीभावः। लक्षणपदस्य लक्षणप्रवृत्तिरित्यर्थः। अप्रयुक्ते लक्षणप्रवृत्त्यभावस्यैव योग्यता, न तु लक्षणप्रवृत्तेः। एवञ्च तादृशः प्रयोगः असाधुः। अत्र द्वितीयव्याख्यैवोचिता। प्रयुक्तेऽपि लक्षणानतिक्रमात्। प्रयुक्तानामिदमन्वाख्यानमिति भाष्योक्तेः, भाष्यकारस्य लक्ष्यैकचक्षुष्कत्वाच्च। अन्यथा प्रियाष्टानः इत्यादेराद्यव्याख्यायां साधुत्वं, द्वितीयाव्याख्यायां शास्त्रविषयत्वेनासाधुत्वं च प्रसज्येत। अत एव कैयटः - हल्ङ्यादिसूत्रे 'अप्रयुक्ते लक्षणाभावः इति व्याख्यातम्। नाम्रेडितस्यान्त्यस्य तु वा इति सूत्रे भाष्ये 'प्रयोगमूलत्वादस्य शास्त्रस्य प्रयोगाभावे न प्रवृत्तिः' इत्युक्तम्।

किञ्च प्रियाष्टादीनामभिधाने गौणे बहुवचनैकवचननिर्देशयोः फलभेदस्य सत्त्वेन तद्विषयशङ्कासमाधानयोरकरणं भाष्यकृतः न्यूनतामावहेदिति तदनभिधानमेव सर्वथा भाष्यतात्पर्यमिति भावः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अकथितञ्च इति सूत्रार्थविचारः

चन्द्रशेखरभट्टः

निबन्धेऽस्मिन् अकथितञ्च इति सूत्रार्थः मतान्तर-विमर्शनपूर्वकं साधु प्रतिष्ठाप्यते। एषः न्यासः अपादानादीनाम् अविवक्षायां कर्मसंज्ञां विधातुं प्रवृत्तः। अत्र अकथितशब्दः किमर्थपरः, अपादानाद्यविवक्षा च द्वेधा इत्यादीन् विश्लिष्य नटस्य शृणोति इत्यादौ अनुपपत्तिवारणप्रकारः कथमिति दर्शयति लेखकः। किञ्च प्रधानाप्रधानयोः अप्रवृत्तिः कथमिति च विचार्य गतिबुद्धिसूत्रार्थमपि मतभेदपुरस्सरं प्रदर्श्य वैकारणकृतान्तः भाष्यसम्मतरीत्या निरूप्यते।

आबाहुपुरुषाकारं शङ्खचक्रासिधारिणम्।
सहस्रशिरसं देवं पतञ्जलिमुपास्महे॥

वेदाङ्गेषु प्रमुखमङ्गं भवति व्याकरणम्। मुखं व्याकरणं स्मृतम् इत्युक्तिः। मुखमिव प्रधानत्वात् मुख्यः प्रथम इत्यर्थः। छान्दसं व्याकरणं, लौकिकं व्याकरणम्, छान्दसलौकिकं व्याकरणमित्येवं व्याकरणेषु त्रीन् भेदान् द्रष्टुं शक्नुमः। कानिचन लौकिकशब्दानामेव व्युत्पादकानि, वैदिकानामेव व्युत्पादकानि कानिचित्। पाणिनीयव्याकरणं तु उभयव्युत्पादकतया छान्दसलौकिकमित्युच्यते। सत्स्वपि बहुषु व्याकरणेषु पाणिनीयमेव भजते वेदाङ्गत्वम्। अस्य च व्याकरणस्य प्रक्रियाप्रस्थानम्, आर्थिकप्रस्थानमिति द्वयी गतिः। प्रकृतिप्रत्ययविभागद्वारा शब्दसंस्कारकमाद्यम्। विभक्तानां प्रकृतिप्रत्ययचिन्तनमेव आर्थिकप्रस्थानमित्युच्यते। आर्थिकप्रकरणे च विभक्त्यर्थविचारः सर्वातिशायी दृश्यते। तत्र हि–

कर्ता कर्म च करणं सम्प्रदानं तथैव च।
अपादानाधिकरणे इत्याहुः कारकाणि षट्॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्युक्तरीत्या षट् कारकाणि प्रतिपादितानि। तत्र द्वितीयाविभक्तिप्रयोजककर्मसञ्ज्ञाविधायकानि नव सूत्राणि दृश्यन्ते कारकप्रकरणे–

१. कर्तुरीप्सिततमं कर्म

२. तथायुक्तं चानीप्सितम्

३. अकथितं च

४. गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ

५. हृक्रोरन्यतरस्याम्

६. क्रुधद्रुहोरुपसृष्टयोः कर्म

७. अधिशीङस्थाऽऽसां कर्म

८. अभिनिविशश्च

९. उपान्वध्याङ्वसः

तत्र क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः इति सूत्रेण प्राप्तस्य सम्प्रदानस्य कर्मसञ्ज्ञाविधायकं क्रुधद्रुहोरुपसृष्टयोः कर्म इति सूत्रम्। अधिशीङ्स्थाऽऽसां कर्म, अभिनिविशश्च, उपान्वध्याङ्वसः इतीमानि सूत्राणि आधारस्य कर्मसञ्ज्ञां विदधते। गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ, हृक्रोरन्यतरस्याम् इति सूत्रे अण्यन्तावस्थायां कर्तुः ण्यन्तावस्थायां कर्मत्वं विदधाते।

कर्तृनिष्ठव्यापारजन्यफलाश्रयस्य कर्मसञ्ज्ञाविधायकं मुख्यं सूत्रं कर्तुरीप्सिततमं कर्म इति। द्वेष्योदासीनकर्मसङ्ग्रहार्थं तथायुक्तं चानीप्सितम् इति सूत्रं प्रणीतम्। अपादानादीनामप्रसक्तौ कर्मसञ्ज्ञां विदधाति अकथितं च इति सूत्रम्। तदिदं सूत्रमत्र विचार्यते।

अपादानादिविशेषैरविवक्षितं कारकं कर्मसञ्ज्ञं स्यादिति कौमुद्यां सूत्रार्थो वर्णितः। कथ (वाक्यप्रबन्धे) धातोः निष्ठाप्रत्यये इडागमे कथितम्, न कथितम् अकथितम् इति अकथितशब्दस्य प्रक्रिया। कथनस्य करणाकाङ्क्षायाम्, अपादानादिविशेषकथाभिः इति आकाङ्क्षोपशमनम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अत्रेयं विचारणा–अकथितशब्दोऽयम् अप्रधानवाची रूढ उत असङ्कीर्तितपरः क्रियाशब्द इति। क्रिया तु उभयथाऽप्याश्रीयते। केन अकथितम्, अपादानादिविशेषकथाभिः इत्येवं भाष्यकृत्कृताभ्यां प्रश्नप्रतिवचनाभ्याम् अकथितशब्दः असङ्कीर्तितवचनः क्रियाशब्द एव आश्रीयते न त्वप्रधानवाची रूढः इति निर्णीयते। रूढशब्देऽपि क्रियाश्रीयते इति सत्यं, किन्तु व्युत्पत्त्यर्थमेवोपादीयते सा न तु प्रवृत्तिनिमित्तत्वेन। रूढिशब्दत्वाश्रयणे प्रश्नप्रतिवचने भाष्यकृत्कृते असङ्गते स्याताम्। यथा गोशब्दः सास्नादिमति रूढः। गच्छतीति गौः इति व्युत्पत्तिराश्रीयते (क्रियारूपेण) गच्छति इत्युक्ते केनेति प्रश्ने रथेनेति प्रतिवचनं भवति। गौः इत्युक्ते प्रश्नप्रतिवचने न सम्भवतः। तथेहापि प्रश्नप्रतिवचनसामर्थ्यात् असङ्कीर्तितवचन एवाकथितशब्दः।

तत्रासङ्कीर्तितत्वं च द्वेधा व्यवस्थापितम्। क्वचित्प्रसक्तस्याप्यपादानादेः अपादानत्वादिरूपेण अविवक्षितत्त्वम्। क्वचिच्च सर्वथैव अपादानादिप्रसक्तिराहित्यम्।

गां दोग्धि पयः इत्यत्र प्राप्तस्याप्यपादानस्याविवक्षायां प्रकृतसूत्रेण गोः कर्मत्वम्। बलिं याचते बसुधाम् इत्यत्र बलेः अपादानत्वाप्राप्तौ प्रकृतसूत्रेण कर्मत्वम् इत्येवमस्य सूत्रस्य विषयः सिद्धः। तत्र प्रथमकल्पे तावत् अपादानादेः सर्वथा अप्रसक्तौ कर्मसञ्ज्ञाऽनेन विधीयते इति मतमालम्ब्य विचारः प्रवर्तते।

उदाहरणपरिगणनम्

नेन्वेवं नटस्य श्रृणोति इत्यत्रातिप्रसङ्गः। अत्र च सर्वथा अपादानत्वादीनामप्रवृत्तिः। तथा हि–गीतद्वारा नटस्य क्रियाजनकत्वमस्ति। नटस्य अपादानत्वं तु कदापि न भवति। आख्यातोपयोगे इतिं सूत्रेण तत्र अपादानत्वं वक्तव्यम्। तदेव न शक्यं, सूत्रे उपयोगग्रहणेन नियमपूर्वकविद्यास्वीकारे एव तस्य सूत्रस्य प्रवृत्तिः। न च उपयोगे इति प्रत्याख्यायते, ततश्च अपादानप्रसक्तिरस्तीति वाच्यम्, उपयोगग्रहणस्य प्रत्याख्यानेऽपि युक्तत्वात्। अन्यथा उपयोगग्रहणप्रत्याख्याने नटात् शृणोतीति प्रयोगः, उपयोगग्रहणे तदभावः इति आरम्भप्रत्याख्यानयोः फलभेदः स्पष्ट एव। एवञ्च शृणोति इत्यत्र कर्मत्वापत्तिवारणाय परिगणनं क्रियते।

दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ।
ब्रुविशासिगुणेन च यत्सचते तदकीर्तितमाचरितं कविना॥

दुह (प्रपूरणे), याचृ (याञ्चायाम्), रुधिर् (आवरणे), प्रच्छ (ज्ञीप्सायाम्), भिक्ष (भिक्षायामलाभे लाभे च), चिञ् (चयने), ब्रूञ् (व्यक्तायां वाचि), शासु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(अनुशिष्टौ) एतेषां प्रयोगे उपयोगनिमित्तस्य गवादेः अपादानादिपूर्वविधीनामप्रवृत्तौ अकथितं च इति सूत्रेण कर्मत्वं भवति इत्यर्थः। अत्र उपयुज्यते इति उपयोगपदेन प्रधानं कर्म ग्राह्यम्। तस्य निमित्तम् इत्यनेन धात्वर्थव्यापारात् प्राक् सम्बद्धत्वं विवक्षितम्।

दुह्–गां दोग्धि पयः। याच्–पौरवं गां याचते। रुध्–व्रजमवरुणद्धि गाम्। प्रच्छ्–माणवकं पन्थानं पृच्छति। भिक्ष्–पौरवं गां भिक्षते। चिञ्–वृक्षमवचिनोति फलानि। ब्रूञ्–माणवकं धर्मं ब्रूते। शासु–माणवकं धर्ममनुशास्ति इत्युदाहरणानि।

गां दोग्धि पयः इत्यत्र क्रियाजन्यफलाश्रयत्तवरूपमुख्यकर्मत्वं पयस एव न तु गोरिति अप्राप्ता कर्मसञ्ज्ञा अनेन विधीयते। (अत्र कैयटः–दोहेनाप्यमानत्वेऽपि गोरीप्साप्रकर्षाभावात्, कर्मसञ्ज्ञासूत्रे तमब्ग्रहणात् प्रकर्षस्य विवक्षितत्वान् अप्राप्ता कर्मसञ्ज्ञा अनेन विधीयते इत्याह। विभागजन्यसंयोगानुकूलव्यापारानुकूलव्यापारस्य दुहधात्वर्थत्वे कैयटमतमिदम्। ततः उद्देश्यत्वाभावात् व्यापारद्वयजन्यफलाश्रयत्वाभावाच्च गोः कर्मत्वं नास्ति तत्तु पसय एव इत्यर्थः। अकाडारसूत्रस्थभाष्यविरोधात् कैयटमतमिदं चिन्त्यमिति नागेशोऽभिप्रैति। गां दोग्धि पयः, परत्वात् कर्तुरीप्सिततममिति कर्मत्वमिति आकाडारसूत्रे भाष्ये। तत्र सूत्रे धातूपात्त–फलाश्रयत्वरूपस्यैव ईप्सिततमत्वस्य ग्रहणम्। अतः पयोनिष्ठविभागजन्यसंयोगानुकूलव्यापारो दुहेरर्थः। अतः ईप्साप्रकर्षाभावात् कर्मत्वं नेति कैयटमतं तु भाष्यविरुद्धमिति नागेशाभिप्रायः।

पौरवं गां याचते इत्यत्र पौरवेण गां दिदापयिषते इत्यर्थः प्रतीयते। अत्र गोरेव ईप्सिततमत्वं न पौरवस्येति अप्राप्ता कर्मसञ्ज्ञा अनेन विधीयते।

व्रजमवरुणद्धि गाम् इत्यत्र गौः व्रजं प्रविशति, गवा व्रजं प्रवेशयति इत्यर्थः। अत्रापि व्रजस्य अप्राप्तं कर्मत्वं सूत्रेणानेन विधीयते। माणवकं पन्थानं पृच्छतीत्यत्र माणवकेन पन्थानम् आचिख्यापयिषति। तत्र जिज्ञासितकार्यज्ञानानुकूलव्यापारे विषयतया ज्ञानरूपफलाश्रयत्वात् पन्थाः प्रधानकर्म। माणवकस्य तु अप्राप्ता सा प्रकृतसूत्रेण विधीयते। पौरवं गां भिक्षते इत्यत्र प्रार्थनार्थस्य भिक्षेः गौरेव मुख्यं कर्म भवतीति पौरवस्य अप्राप्तायां कर्मसञ्ज्ञायाम् अनेन कर्मत्वविधिः।

वृक्षमवचिनोति फलानि इत्यत्र वृक्षेण फलानि त्याजयतीत्यर्थः। प्रच्याव्यादानानुकूलव्यापारे प्रच्याव्यादानविषयत्वात् फलानां मुख्यकर्मत्वं, वृक्षस्य तु तन्नास्तीति अनेन विधीयते। माणवकं धर्मं ब्रूते अनुशास्ति वेत्यत्र माणवको धर्मं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रतिपाद्यते माणवकं धर्मं प्रतिपादयतीत्यर्थः। तत्र व्यापारप्रयोज्यबोधनविषयत्वात् धर्मः प्रधानकर्म, माणवकस्य तु अप्राप्तं तत् सूत्रेणानेन विधीयते।

पूर्वविधीनां सर्वथा अप्रसक्तौ अकथितकर्मत्वप्राप्तिवादिनो मतम्—गां दोग्धि पयः इत्याद्युदाहरणपञ्चकमयुक्तम्। तथा हि गां दोग्धि पय इति वाक्यात् गोः सकाशात् पय आदत्ते इत्यर्थावगमात् विश्लेषाश्रयत्वेन गोरपादानत्वम्। एवञ्च अपादानसञ्ज्ञा कथिता इति अकथितकर्मत्वस्य प्राप्त्यभावः। 'व्रजमवरुणद्धि गाम्' इत्यत्र गां व्रजे स्थापयतीति सम्प्रत्ययात् स्थानक्रियापेक्षमाधारत्वं व्रजस्यास्तीति कथिता अधिकरणसञ्ज्ञा। अतः अकथितकर्मत्वस्य प्राप्त्यभावः। वृक्षमवचिनोति फलानि इत्यत्र वृक्षात् फलान्यादत्ते इति तात्पर्यावगमात् विभागाश्रयत्वात् वृक्षस्य अपादानत्वम्। अतः कथितत्वादपादानस्य अकथितकर्मत्वयोग्यताऽत्र नास्ति। माणवकं धर्मं ब्रूते, माणवकं धर्ममनुशास्ति इत्यनयोः वाक्ययोः वचनकर्मणा, अनुशासनकर्मणा च धर्मेण पुत्रस्य अभिप्रेयमाणत्वात् "कर्मणा यमभिप्रैति स सम्प्रदानम्" इति सम्प्रदानत्वं भवतीति सम्प्रदानस्य कथितत्वात् अकथितकर्मत्वस्य प्राप्त्यभावः। एवञ्च पौरवं गां याचते, माणवकं पन्थानं पृच्छति, पौरवं गां भिक्षते इतीमानि त्रीण्येवोदाहरणानि अकथितं च इति सूत्रस्य भवन्ति।

ननु एतान्यपि उदाहरणानि न भवन्ति। तथाहि—पौरवँ गां याचते इत्यत्र पौरवाद् गां जिघृक्षते इति सम्प्रत्ययात् विभागाश्रयत्वात् पौरवस्य अपादानत्वम्। एवञ्च अपादानस्य कथितत्वात् अकथितकर्मत्वस्य अप्राप्तिरेव। माणवकं पन्थानं पृच्छति इत्यत्र माणवकात् मार्गोपदेशं जिघृक्षते इति सम्प्रत्ययात् माणवकस्य अवधित्वेन अपादानस्योक्तत्वात् अकथितकर्मत्वस्याप्राप्तिः। पौरवं गां भिक्षते इत्यत्रापि पौरवाद्गां जिघृक्षते इत्यर्थस्वीकारे अपादानसञ्ज्ञा कथितेति नात्र सूत्रस्य प्रवृत्तिः इति चेत् अत्रोच्यते—न याचनादेवापायो भवति, यदि याचितोऽसौ ददाति ततोऽपायेन युज्यते। न च बुद्धिकृतापादानस्य प्राप्तिः इति वाच्यम्, याचनकाले याचितुरपि नूनमस्मादिदं वस्तु निर्गत्य मां प्राप्नोतीति ज्ञानाभावात्। अतः सर्वथा अपादानत्वादीनामप्राप्तौ इदमुदाहरणं भवति प्रकृतसूत्रस्य। किञ्च माणवकं पन्थानं पृच्छति इत्यत्र न प्रश्नादेवापायो भवति, पृष्टोऽसौ यद्याचष्टे ततोऽपायेन युज्यते। अनङ्गीकृतापायं प्रश्नमात्रं पृच्छधात्वर्थः। एवञ्च प्रश्नस्य विश्लेषाजनकत्वेन प्रच्छिं प्रति माणवकस्य अपदानत्वं न प्रसक्तमिति अकथितं च इति कर्मत्वं भवति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एवमेव पौरवं गां भिक्षते इत्यत्र न हि भिक्षणादेवापायो भवति भिक्षितोऽसौ यदि ददाति ततोऽपायेन युज्यते इत्येवं अपादानस्य अप्रसक्तौ इदम् अकथितं च इति सूत्रस्योदाहरणं भवति। [अत्रेदमवधेयम्—याचतिभिक्षत्योः समानार्थत्वेन अन्यतरोपादानेन सिद्धे उभयोपादानं कुतः? अनुनयार्थस्यापि याचेर्ग्रहणार्थम्, तेन अविनीतं विनयं याचते इत्यत्रापि कर्मसञ्ज्ञा सिद्ध्यति इति कैयटः। भिक्षेरप्युभयार्थत्वेन कैयटोक्तं चिन्त्यम्, किञ्च उभयार्थकयाचिग्रहणेनैव सिद्धे भिक्षिग्रहणमर्थग्रहणाभवे लिङ्गमिति नागेशः]

उक्तेषु यदि अपायप्रतीतिर्न भवति तर्हि इमानि त्रीणि उदाहरणानि भवन्ति। याचेः स्वत्वनिवृत्तिस्वस्वत्वोत्पत्त्यनुकूलव्यापारविशेषोऽर्थः। तत्र स्वत्वे पौरवस्य जनकता-समानाधिकरणनिरूपकत्वेनान्वयः। एवं भिक्षेरपि। पृच्छेस्तु जिज्ञासाविषयार्थज्ञानानुकूल-व्यापारोऽर्थः। व्यापारे माणवकस्य जनकत्वमात्रेणान्वय इति अप्राप्तकर्मत्वार्थमिदं सूत्रम्। यदि उक्तेषु त्रिष्वप्यपायप्रतीतिः तदा तेष्वपि पूर्वविधिविषयसत्त्वात् तान्यपि नोदाहरणानि इति सूत्रमेवासङ्गतम्।

अत्रायं सिद्धान्तपक्षः—गां दोग्धि पयः गोः पयो दोग्धि इत्युभयथा प्रयोग इष्यते। असङ्कीर्तितपर्यायस्य अकथितशब्दस्य ग्रहणात् अपादानादीनां विवक्षा-विवक्षाभेदमाश्रित्य, विवक्षायां पञ्चमी, अविवक्षायां कर्मत्वमिति प्रयोगद्वयमपि साध्यते। पौरवं गां याचते इत्यादिषु त्रिषु कर्मसञ्ज्ञैव, तत्र सर्वथा अपायस्याप्रतीतेः।

यदि तु अप्रधानवाची अकथितशब्दो गृहीतः स्यात् तर्हि अपादान-सम्प्रदानाधिकरणसञ्ज्ञा बाधित्वा कर्मसञ्ज्ञैव स्यात्। अतोऽत्र असङ्कीर्तितवचनोऽकथितशब्द आश्रितः। ततश्च पूर्वविधिविषयप्रसक्तिपूर्वकं तदविवक्षायां, सर्वथा पूर्वविधेरप्रसक्तौ च एतत्सूत्रस्य प्रवृत्तिरिति लभ्यते। एवमर्थाश्रयणे गां दोग्धि पयः इत्यादिपञ्चके पूर्वविधीनां प्राप्तौ, तदविवक्षायां पौरवं गां याचते इत्यादिषु त्रिषु सर्वथा पूर्वविधीनामप्रसक्तौ कर्मत्वमिति सर्वाण्यप्युदाहरणानि युज्यन्ते।

प्रधानाप्रधानयोः प्रत्ययनिर्णयः—सर्वोदाहरणवादी सिद्धान्ती सूत्रासङ्गतिवादिनं पृच्छति। ननु ''लः कर्मणि च भावे चाकर्मकेभ्यः'' इति सूत्रेण कर्तरि कर्मणि भावे च लकारा विधीयन्ते। तत्र कर्मणि लादय उत्पद्यमानाः प्रधानं कर्म अप्रधानं कर्म इत्युभयमपि युगपदभिधातुमसमर्थाः सन्तः किं प्रधानकर्मणि भवन्ति उत गुणकर्मणि? इति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तदत्र समाधानम्–(सूत्रासङ्गतिवादिनः) प्रधानाप्रधानसन्निधौ प्रधानस्यैवाभिधानस्य न्याय्यत्वात् प्रधानकर्मणि लादयो भवन्ति। अथवा अकथितस्य कारकत्वाभावेन तत्र लादयो न भवन्ति। यत्र कर्त्रादिषट्कान्यतमत्वं तत्रैव कारकत्वात्। अकथितकर्म तु कर्त्रादीनां षण्णां सर्वथाप्राप्तौ भवति इति तत्र कारकत्वाभावः।

यद्येवं प्रधाने कर्मणि लादयो भवन्ति तर्हि गुणकर्मणि का विभक्तिरिति प्रश्ने गुणकर्मत्वेनाभिमतात्षष्ठी विभक्तिर्भवति, दुह्यते गोः पयः, याच्यते पौरवस्य कम्बलः इति। यतो हि अपादानादिषु विशेषेष्वेव कारकसामान्यं स्थितम्, न तु विशेषरहितस्य सामान्यस्य स्थितिरिसति। अकथिते कारकत्वाभावात् षष्ठी भवति इति भावः। एवञ्च सूत्रमिदमसङ्गतमेवेत्याशयः।

ननु यदा अपादानत्वादिविशेष आश्रीतये तदा सामान्यस्यापि स्थितिरस्तीत्यतः तत्र या या विभक्तिः प्राप्नोति सा सा विभक्तिः क्रियते। दुह्यते गोः (पञ्चमी) पयः, याच्यते पौरवात् कम्बलः इति अत्र गोरपादानत्वम्।

अत्रेदं तत्त्वम्–अत्र उदाहरणत्रयवादी–कारकं चेद्विजानीयाद्यां यां मन्येत सा भवेत् इत्युक्त्वा गोः पयो दुह्यते इति वाक्येन सह याच्यते पौरवात् कम्बलः इति वाक्यमपि दर्शयामास। अत्र उदाहरणत्रयवादी पौरवस्य कर्मत्वमेवेच्छति। एवं च कृत्वा पौरवादिति स्वोक्तिर्विरुद्धा खलु? इति चेदत्र कैयट आह– न्यायस्य सर्वोदाहरणेषु समानत्वात् पौरवस्याप्यपादानत्वं मन्यते। तथाहि– याच्यते पौरवात् कम्बलः इत्यस्य पौरवात्कम्बलः आदित्स्यते इत्यर्थसम्प्रत्ययात् अस्ति बुद्धिकृतस्याप्यपायस्य सम्भव इति। नागेशस्तु– त्रीण्येवोदाहरणानि इत्यस्य अपायस्याप्रतीतौ त्रीणि, यद्यपायः प्रतीयते तर्हि तत्र पूर्वविधिविषयत्वसत्त्वात् तान्यपि उदाहरणानि न भवन्ति इति व्याख्यामकृत। ततश्च अस्मिन् मते सूत्रासङ्गतिरेव। एवञ्च भाष्ये षष्ठ्युच्चारणं पूर्वपक्षिणो यथा तथा पञ्चम्युच्चारणमपि। अतः याचियोगे सिद्धान्ते पञ्चमी भवति इति न मन्तव्यम् इत्याह।

इत्थञ्च सर्वथा पूर्वविधिविषयत्वाभावे अनेन कर्मत्वमिति अङ्गीकर्तुर्मते सूत्रमेवासङ्गतम्। पूर्वविधीनां प्रसक्तानामविवक्षायां तु कर्मसञ्ज्ञाविधानाय सूत्रमिदमावश्यकमिति भावः।

प्रधाने लादिविधिखण्डनम्– कथिते लादयो भवन्तीति मतं न युक्तम्। ''गुणकर्मणि लादिविधिः सपरे।'' गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स णौ इति सूत्रमप्यविहाय गुणकर्मणि लादयो भवन्ति। तथाहि–पयोर्थी प्रथमं गवि प्रवर्तते। ततश्च अन्तरङ्गत्वात् गुणकर्मणि लादयो भवन्ति। ननु अन्तरङ्गत्वात् गोरेव मुख्यकर्मत्वमस्तु इति चेन्मैवम्, अन्तरङ्गत्वे सत्यपि गोः ईप्सिततमत्वाभावः अन्यार्थत्वात् क्रियाप्रवृत्तेः पयसोऽविवक्षायां तु गोरेवेप्सिततमत्वम्। पयोविवक्षायां पयसः मुख्यत्वेऽपि अन्तरङ्गत्वेन गुणे एव लादयो भवन्ति। एवञ्च गां दोग्धि पयः इत्यत्र गुणे लकारे गौर्दुह्यते पयः इति प्रयोगः। गोः अपादानत्वविवक्षायां तु गोः पयो दुह्यते इति वाक्यम्। यदा तु पयोविशेषणत्वेन गोर्विवक्षा तदा गोः पयो दुह्यते इति।

एवमेव यदा धर्मेण कर्मणा माणवकस्य अभिप्रेयमाणत्वं विवक्ष्यते तदा सम्प्रदानत्वम्, माणवकाय धर्मं ब्रूते इति। तदविवक्षायां तु अनेन कर्मत्वं, माणवकं धर्मं ब्रूते इति।

गतिबुद्धि इत्याद्युत्तरसूत्रेऽपि गुणकर्मणि एवं लादयो भवन्ति इति सपरे इति वचनेनोक्तम्। यथा– बोध्यते माणवकं धर्मः। माणवकं धर्मं बोधयति इति कर्तरिप्रयोगः। यत्किञ्चिद्विषयकज्ञानानुकूलव्यापारानुकूलव्यापारः बोधयतेरर्थः। प्रयोजकव्यापारजन्य-फलाश्रयस्य माणवकस्य प्राधान्यम्, प्रयोज्यव्यापारजन्यफलाश्रयो धर्मः गुणकर्म।

ध्रुवचेष्टितयुक्तिषु चाप्यगुणे तदनल्पमतेर्वचनं स्मरत। गुणकर्मणि लादिविधिः सपरे इति कथनेन सामान्येन सर्वत्र द्विकर्मकेषु अप्रधानकर्मणि लकारः प्राप्तः। तदपवादोऽत्र पठ्यते। ध्रुवयुक्तिषु, चेष्टितयुक्तिषु च प्रधानकर्मणि लादयः भवन्तीत्यर्थः। अकर्मकाः ध्रुवयुक्तय इति प्राचीनाचार्यैरभिहितम्। एवञ्च अकर्मकेषु, गत्यर्थकेषु च प्रधाने कर्मणि लादयो भवन्तीत्यर्थः। यथा मासमास्यते देवदत्तः। देवदत्तः मासमास्ते। चैत्रो देवदत्तं मासमासयति इति कर्तरि प्रयोगः। अत्र प्रयोजकचैत्रव्यापारजन्यफलाश्रयत्वेन देवदत्तस्य प्राधान्यम्। तत्रैव लादयो भवन्ति। एवं शाय्यते क्रोशं देवदत्तं इत्यपि। गत्यर्थस्य यथा-गम्यते ग्रामं देवदत्तः। देवदत्तः ग्रामं गच्छति। मैत्रो देवदत्तं ग्रामं गमयति इति कर्तरि। अत्र प्रयोजकव्यापारजन्यसंयोगानुकूलव्यापाररूपफलाश्रयस्य देवदत्तस्य प्राधान्यात् तत्र लादयः।

आचार्यान्तरमतम्–

प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्।
अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति आचार्यान्तरोक्तिः। द्विकर्मणां धातूनां प्रधानकर्मणि लादयो भवन्ति। यथा अजां ग्रामं नयति। कर्तृव्यापारजन्यफलाश्रयत्वादजायाः प्राधान्यम्। नेतुः तस्यामेव पूर्वं क्रियाप्रवर्तनात् अन्तरङ्गत्वाच्च तत्रैव लादयः। ततश्च अजा ग्रामं नीयते।

नन्वेवं दुहादीनामपि द्विकर्मकत्वात् तत्र गुणकर्मणि लादयः स्युः इति चेत् न 'अप्रधाने दुहादीनाम्' इति वचनात्। दुहादीनां तु अप्रधाने कर्मणि लादयो भवन्ति इत्यर्थः। यथा– गां दोग्धि पयः। व्यापारजन्यफलाश्रयत्वेन पयो मुख्यं कर्म। अकथितं च इति गोः कर्मत्वविधानात् तस्य गुणभावः। गुणकर्मणि लकारे गौः दुह्यते पयः इति प्रयोगः।

ण्यन्ते कर्तुश्च कर्मणः– गतिबुद्धि ---- इत्यनेन अस्य प्रयोज्यस्य कर्मसञ्ज्ञा विधीयते, तस्मिन् वाच्ये गत्यर्थादिषु धातुषु लादयो भवन्ति इत्यर्थः। यथा देवदत्तः यज्ञदत्तं ग्रामं गमयति। अत्र अण्यन्तावस्थायां कर्तुः यज्ञदत्तस्य ण्यन्तावस्थायां कर्मसञ्ज्ञा विहिता। तत्रैव लकारः, कर्मणि विधीयमानः। देवदत्तेन यज्ञदत्तः ग्रामं गम्यते इति प्रयोगः।

कथितेऽभिहिते इत्यादिपूर्वश्लोके अकर्मकाणां गत्यर्थकानां च प्रधाने कर्मणि लादयो भवन्ति इत्युक्तम्। सपरे इति वचनेन गत्यर्थकान् अकर्मकांश्च विहाय अन्येषां गतिबुद्धिसूत्रोक्तानाम् अर्थात् बुद्धिप्रत्यवसानार्थशब्दकर्मणां गुणकर्मणि लादयो भवन्ति इत्यभिहितम्। प्रधानकर्मण्याख्येये इति आचार्यान्तरश्लोके तु ण्यन्ते कर्तुश्च कर्मणः इति वचनेन ण्यन्ते सर्वत्र प्रधानकर्मणि लादयः इत्यभ्यधायि। एवञ्च बुद्धिप्रत्यवयानार्थशब्दकर्मकेषु प्रधाने कर्मणि, अप्रधाने कर्मणीति विकल्पः फलितः। माणवकं धर्मं बोधयति इत्यत्र गुणप्रधानभावोऽनियतः। वाक्यस्य धर्मप्रतिपादनपरत्वे धर्मस्य प्राधान्यं, माणवकस्य गुणभावः, वाक्यस्य माणवकसंस्कारपरत्वे तु माणवकस्य प्राधान्यं, धर्मस्य गुणभावः।

द्विकर्मकधातुनिर्णयः–

'प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्' इति आचार्यान्तरश्लोकव्याख्याने अजा ग्रामं नीयते इति नीञ् धातुरुदाहृतः। कथं तस्य द्विकर्मकत्वेन ग्रहणम्? इति चेदुच्यते भाष्ये दुह्यादिपरिगणनादन्यत्र द्विकर्मकता न स्यादित्याशङ्क्य के पुनर्द्विकर्मकाः इति प्रश्नं विधाय–

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'नीवह्योर्हरतेश्चापि गत्यर्थानां निजेच्छया।
द्विकर्मकेषु ग्रहणं द्रष्टव्यमिति निश्चयः॥'

अजां नयति ग्रामम्, भारं वहति ग्रामम्, भारं हरति ग्रामम्, गमयति देवदत्तं ग्रामम् इति समाहितम्।

अत्र कैयटः– नीवह्योरिति भाष्ये चकारेण जयत्यादयोऽन्ये द्विकर्मकत्वेन समुच्चीयन्ते, तेन शतं जयति देवदत्तम्, शतं मुष्णाति देवदत्तम्, शतं दण्डयति देवदत्तम् इत्यादि सिद्धमित्याह। दीक्षिता अपि षोडशधातून् पेठुः दुहादिषु।

नागेशस्तु– व्यापारद्वयार्थकतया, **कर्तुरीप्सिततमं कर्म** इति यत्र द्वयोः कर्मत्वं तेऽत्र द्विकर्मका उच्चन्ते, नीवह्योर्हरतेः इत्यादिकारिका तु व्यापारद्वयार्थकधातूपलक्षणार्थम्, न त्वेषां दुह्यदिषु पाठे मानमस्ति इत्याह।

इत्थं महाभाष्यमाश्रित्य **अकथितं च** इति सूत्रार्थविचारः निरूपितः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जैमिनिनये देवतास्वरूपविमर्शः

सूर्यनारायणभट्टः

अपूर्वमङ्गीकृत्य देवताप्रसादस्य प्रयोजकत्वं निराकृतं द्वितीयाध्याये अपूर्वाधिकरणे। नवमे च देवतायाः विग्रहादिकं निराकृत्य पुनः अपूर्वस्यैव प्रयोजकत्वं प्रतिपाद्यते। यजेत स्वर्गकामः इत्यादौ स्वर्गयागयोः विद्यमानः साध्यसाधनभावः श्रौतः, क्लृप्तश्च इत्यतः अपूर्वद्वारा यागस्यैव फलजनकत्वं निरूप्यात्र प्रबन्धा देवताप्रसाद-स्याङ्गीकारे श्रुतश्रौतसाध्यसाधनभावभङ्गापत्तिं प्रदर्शयति। देवताप्रसादस्तु विग्राहिदिष्वेव सम्भवतीति यागस्यैव पदश्रुत्या फलसाधतोच्यत इति च निरूपयति।

उपक्रमः–

जैमिनीयपूर्वमीमांसाशास्त्रे प्रमाणादिप्रसङ्गान्ताः द्वादशाध्याया धर्माधर्मविवेकाय सूत्ररूपेणोपनिबद्धाः प्रथन्ते। तेषु आदिमाः षडध्यायाः पूर्वषट्कमिति अग्रिमषडध्याया उत्तरषट्कमिति संज्ञां लभन्ते। तयोरपि पूर्वषट्कस्योपदेशट्कम्, उत्तरस्यातिदेशषट्कमिति व्यवहारः तत्र तत्र ग्रन्थेषु दृश्यते। सम्प्रति विवेचनीयो विषयः उत्तरषट्कान्तर्गतनवमाध्याये विवेचितः, यस्योहाध्याय इति संज्ञा वर्तते।

तत्र ऊहो नाम **"प्रकृतावन्यथादृष्टास्य विकृतावन्यथाभावः। तत्त्वं च येन सम्बन्धेन यद्धर्मावच्छिन्नवृत्तित्वं यस्य प्रकृतौ श्रुतं, तेन सम्बन्धेन विकृतौ तद्धर्मावच्छिन्नभिन्नवृत्तित्वमिति"**[1] अर्थात् व्रीहीन् अवहन्तीति प्रकृतौ व्रीहीणामवघातो विहितः। तत्र वितुषीभावरूपद्वारेण व्रीह्यादिषु विद्यमानस्यावघातस्य विकृतावपि तेनैव द्वारेण नीवारेषु अन्यथाभाव ऊह इति। मन्त्रोहस्सामोहस्संकारोहश्चेति त्रिधोहश्चिन्त्यते नवमे। यथा **"मन्त्राणां हि स्मारकत्वसंबन्धेन अग्नित्वाद्यवच्छिन्नवृत्तित्वं श्रुतं प्रकृतौ। विकृतौ च तेनैव सम्बन्धेन तद्धर्मावच्छिन्नभिन्नसूर्यादिवृत्तित्वात्। एवं**

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रोक्षणावघातादीनामपि संस्कार्यतासम्बन्धेन व्रीहित्वाद्यवच्छिन्नवृत्तित्वं श्रुतं प्रकृतौ, विकृतौ च तेनैव संबन्धेन तद्धर्मावच्छिन्नभिन्नश्यामाकादिवृत्तित्वात्। एवं साम्नामपि आईभावादिरूपाणां येन सम्बन्धेन यत्स्थानगतैकारवृत्तित्वं प्रकृतौ (अत्र प्रकृतिशब्देन सामवेदीयप्रकृतिग्रन्थो ग्राह्यः) श्रुतं, विकृतौ (उत्तराग्रन्थे) तेषां तेनैव सम्बन्धेन तत्स्थानभिन्नस्थानगतैकारवृत्तित्वादूहः''[२]।। एवं त्रिविधोऽत्यूहो नवमे विवेचितः।

विषयप्रवेशः–

तथाहि **''यज्ञकर्म प्रधानं तद्धि चोदनाभूतं तस्य द्रव्येषु संस्कारस्तत्प्रयुक्तस्तदर्थत्वात्''**[३] (जै.सू.९.१.१) इति नवमे प्रथममिदं सूत्रम्। यज्ञसंबन्धिनः सर्वेऽपि धर्माः अपूर्वप्रयुक्ता इति सप्तमप्रथमाधिकरणसिद्धान्तः। यथा **व्रीहिभिर्यजेत, यवैर्यजेत, दध्ना जुहोति, पयसा जुहोति,** इत्यादिभिर्वाक्यैः यागहोमसाधत्वेन विहिता व्रीह्यादयोऽपूर्वप्रयुक्ताः, अपूर्वमेवैतेषां प्रयोजकम्।। इमानि द्रव्याण्युद्दिश्य व्रीहीनवहन्ति, तण्डुलान् पिनष्टि, पिष्टं संयौति इत्यादिभिः विहितानाम् अवघातपेषणसंयवनादीनामपूर्वार्थत्वं प्रतिपादितम्। अपूर्वं हि साध्यम्, व्रीह्यादीनि द्रव्याणि, तदुद्देशेन विहितान्यवघतादीनि तत्साधनानीति भावः।

प्रोक्षणादीनां व्रीह्यादिप्रयुक्तत्वे श्यामाके चरौ वा व्रीह्यादीनामभावात् प्रोक्षणादीनां लोप एव भवेन्नतूहः। किन्तु अपूर्वप्रयुक्तत्वे श्यामाकादीनामपि तद्रूपावच्छिन्नत्वात् सिध्यत्यूहः। अपि च अपूर्वस्य शाब्दं प्रयोजकत्वं सप्तमे वर्णितम्। इह तु नवमे आर्थिकी निमित्तता वर्ण्यते इति वैलक्षण्यं सिध्यति। एवम् अपूर्वप्रयुक्तत्वात् अङ्गीकृतमेवापूर्वम्। एवं द्वितीयाध्याये चोदना पुनरारम्भः (जै.सू. २.१.६) इत्यत्र आरभ्यते इत्यारम्भः अपूर्वं तु पुनः अङ्गीकार्यमेव यतः चोदना यागस्वर्गसाध्यसाधनभावपरं ज्योतिष्टोमेन स्वर्गकामो यजेत इत्यादि वाक्यमुपलभ्यते इति प्रतिपादितम्।

इत्थं च अपूर्वमङ्गीकृत्य देवताप्रसादस्य प्रयोजकत्वं निराकृतम्। सम्प्रति पुनः देवताप्रसादस्यैव प्रयोजकत्वमाशङ्क्य प्रसङ्गान्निराक्रियते।

आक्षेपः–

कर्मकारकं हि क्रियया ईप्सिततमं प्रधानम्। तेनापि व्याप्यमानं संप्रदानं ततोऽपि प्रधानम्। अतः क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छतीत्यत्र किं प्रतिपत्ति कर्म? उतार्थकर्म? इति संशये चतुर्थीसामर्थ्यात् अर्थकर्मेति निर्णीतम्। एवमत्रापि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चतुर्थ्या सम्प्रदानस्य प्राधान्यमवगम्यते। सम्प्रदानं च देवता, तस्मात्प्रधानम्। सम्प्रदानस्याभिप्रेयमाणत्वेन प्राधान्यम्। यद्यपि यदाग्नेयोऽष्टाकपाल .... इत्यत्र आग्नेय इति देवतात्वबोधने संप्रदानत्वार्था चतुर्थी नैव वर्तते, तद्धितेन देवताबोधः अङ्गीक्रीयते यथा–

तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः।
देवतायाः विधिस्तत्र दुर्बलं तु परं परमिति॥

वचनात् अग्निः देवता अस्येत्यर्थे व्युत्पन्ने आग्यशब्दे तद्धितेन द्रव्योद्देश्यकत्वेन यागक्रियाव्याप्यद्रव्यं प्रति व्याप्यमानत्वात् तस्याः संप्रदानत्वमुक्तम्। अतो देवतायाः प्राधान्यमवगम्यत एव। अतः यागस्य पूजारूपत्वं देवतायाश्च पूज्यरूपत्वम्। एवमेव यजि देवपूजासङ्गतिदानकरणेषु इति शाब्दिकस्मरणात् पूजारूपो दानरूपोऽपि वा यागशब्दार्थः न त्वेतदतिरिक्तः कश्चनान्यः सः। उभयरूपस्यापि तस्य देवतार्थत्वं निर्विवादं सिध्यत्येव। इत्थं सम्प्रदानत्वेन वा पूज्यत्वेन देवतायाः प्राधान्यम् अभिप्रेत्य यजेत स्वर्गकाम इत्यादौ यागेन देवतामाराधयेत् ततः देवताप्रसादात् स्वर्गो भविष्यतीत्यभ्युपगन्तव्यम्। तदा देवतानां विग्रहवत्वं, हविषां भोक्तृत्वं, प्रसादवत्वं, फलैश्र्ववत्वं, फलदातृत्वञ्चेति पञ्चकं उक्तयागविधानसामर्थ्यात्कल्पनीयम्। तदुक्तं यथा–

विग्रहो हविषां भोगः ऐश्वर्यं च प्रसन्नता।
फलप्रदानमित्येतत् पञ्चकं विग्रहादिकमिति॥

यथा वा राज्ञ आराधनं तत्प्रासादजननद्वारा फलसाधनम्, प्रसन्नः स फलं प्रयच्छतीति सूत्रितं देवता वा प्रयोजयेत् अतिथिवद्भोजनस्य तदर्थत्वादिति। (जै.सू. ९.१.६.) सूत्रस्यायमर्थः, देवता इन्द्रादिः सर्वान् साङ्गप्रधानरूपान् कर्मणि प्रयोजयेत्, भोजनस्य देवताभोजनरूपस्य यागस्य तदर्थत्वात् देवतार्थत्वात्। अतिथिवत्। यथा अतिथये दीयमानं चान्नं तदर्थं, तथा कर्तुः प्रियतमं कर्म संप्रदानं कर्मणः प्रियतमम्। तथा च यत्कर्तुः प्रियतमं तस्य प्रियतमं कर्तुरपि परम्परया प्रियतममेवेति तदर्थत्वं युक्तमिति यावत्।

अतः यागैः आराध्यमानाः देवताः प्रसन्नाः सत्यः फलं प्रददति। फलदातृत्वं तु तास्वेव भवितुमर्हति। अतः फलैश्र्वर्यवत्वं तासु देवतासु अभ्युपगन्तव्यम् यतोऽप्रसन्नाः कदापि फलं न प्रयच्छन्तीति अनुभवसिद्धमिति हेतोस्तासां देवतानां प्रसादोऽप्यावश्यकः। प्रसादश्च हविर्भोक्तारः प्रसन्नाः फलैश्र्वर्यवन्तः फलदाताश्चेति तत्तद्यागविधिसामर्थ्यात्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सिध्यति। अतो देवताया विग्रहादिपञ्चकमभ्युपगन्तव्यमेव, तत्रैतानि प्रमाणानीत्थं श्रूयन्ते– यथा स एवैनं भूतिं गमयति। तृप्त एवैनमिन्द्रः प्रजया पशुभिश्च तर्पयति। इष्टान् भोगान् हि वो दास्यन्ते यज्ञभाविता इत्यादीनि। एभिर्वाक्यैः स्पष्टं देवतानां विग्रहादिकमभिधीयत इति तु निर्विवादम्। यद्यपि अर्थवादादिभिः प्रतीयमानत्वात् स्वार्थे प्रामाण्याभावेऽपि विध्येकवाक्यतया प्रामाण्यस्य सत्वात् निराकर्तुं न शक्यत एव। तस्मात् देवताप्रसादस्य विग्रहभोगादिव्यतिरेकेणानुपपत्तेः अर्थवादाद्यनुसारेण विग्रहभोगादिकल्पने न दोषः। अत एव वक्तव्यं यथा– यागाराधिता देवता फलं प्रयच्छतीति देवता प्रधानाम् देवताराधनार्थो याग इति प्राप्ते–

समाधानम्–

''यागस्यैव पदश्रुत्या फलसाधनतोच्यते।

देवतायाश्च तादर्थ्यं तन्निर्वृत्युपयोगतः।।'' इति। किं देवतायाः फलप्रदत्वलक्षणं प्राधान्यं शब्दादापाद्यते उत वस्तुसामर्थ्यात्?। न प्रथमः, स्वर्गकामो यजेत इत्यादौ शब्देन विधेयस्य यागस्य फलप्रदत्वावगमात्। द्रव्यदेवते तु सिद्धत्वेन सिध्यनर्हे। तत्र द्रव्यस्य विधानं प्रतिगुणत्वं यथा, तथैव देवताया अपि गुणत्वं न तु प्राधान्यम्।

नापि वस्तुसामर्थ्यात् फलप्रदत्वं देवतायाः, यतो हि विग्रहादिपञ्चकप्रतिपादकवाक्यानां स्वार्थे तात्पर्याभावात्। अन्यथा वनस्पतिभ्यः स्वाहा, मूलेभ्यः स्वाहा इत्यादिमन्त्रेष्वपि विग्रहदिपञ्चकयुक्तं देवतात्वं भवेत्। यच्च प्रत्यक्षविरुद्धम्।

एवं स्वर्गकामो यजेत इत्यादिषु वाक्येषु फलं यागस्य विधानं स्पष्टं यागेन स्वर्गं भावयेदिति प्रतीयते। तत्र प्रत्ययाभिहिता भावना अंशत्रयोपेता भाव्यं स्वर्गमपेक्षते स्वर्गस्यैव पुरुषार्थत्वात्। शान्तायां भाव्याकाङ्क्षायां साधनमाकाङ्क्षन्ती भावना समानपदश्रुत्युपनीतं यागमविरोधात् ग्रहीत्वा इतिकर्तव्यताकाङ्क्षायां द्रव्यदेवतं भूतं भव्ययागनिर्वर्तनसमर्थं तादर्थ्येन गृह्णन्ती देवतां यागार्थं करोति। न तु देवतायाः फलप्रदानार्थं तदाराधनाय यागविधिः भवेत्।

देवतोद्देशपूर्वकद्रव्यत्यागो हि यागः। देवतोद्देशो नाम इदं द्रव्यम् अग्न्यादि स्वामिकम्, अथवा अग्नेरिदम्, अथवा अग्न्यर्थमिदम् इत्याकारकद्रव्यत्यागश्च इदं मदीयं न इत्याकारकं ज्ञानं, तदा ज्ञाने विध्यनुपपत्तिः। तस्य कृतिसाध्यत्वाभावात् यदाकारकं ज्ञानं तदाकारकत्यागस्यैवापत्तौ अग्नय इदं न ममेति त्यागानुष्ठानापत्तेश्च। तादृशमानसयज्ञोत्पत्तिमात्रेणैव यागानुष्ठानसिद्धौ वाचनिकतादृशत्यागे प्रमाणाभावप्रसङ्गः। अतो द्रव्यत्यागकाले देवतावाचकपदस्य चतुर्थीप्रकृतिकत्वेनोच्चारणमात्रमेव देवतोद्देशपदार्थः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कृतिसाध्यो विधिविषयः, द्रव्यत्यागोऽपि द्रव्यवृत्तिस्वस्वत्वनिवृत्यनुकूलेदं न ममेत्याकारकज्ञानपूर्वो व्यापार इदं ममेत्याकारकशब्दोच्चाररूपः स एव। यद्यपि द्वितीयाध्याये अपूर्वाधिकरणे कौस्तुभे देवताप्रसादस्यैव रात्रिसत्रन्यायेन द्वारत्वोपपत्तेः न अनुपस्थितापूर्वकल्पनं युक्तमित्याक्षिप्य अर्थवादोपात्तदेवताप्रसादापेक्षया उपस्थिततध्वंसद्वारकत्वेनैव नैराकाङ्क्ष्ये रात्रिसत्रन्यायानवतारात्, देवताप्रसादस्येच्छा-विशेषरूपस्य क्षणिकत्वेन व्यापारान्तरापेक्षा, अतो यागध्वंसस्यैव व्यापारत्वकल्पनं वरमिति निरस्तः देवताप्रसादपक्षः। यागध्वंसस्यापि व्यापारत्वकल्पनं नास्त्येव।

तस्माद् देवताप्रसादकारणीभूतविग्रहादिस्वीकारः कथमपि न सम्भवति। हविस्त्यागसमये चतुर्थ्यन्तपदेन निर्दिश्यमानत्वात् देवतायाः प्राधान्यं प्राक्प्रदर्शितम्। न तद्युज्यते चोदनागम्यत्वाभावात्। यतो हि गुणत्वेन देवताश्रुतिः। फलवाक्ये हि यजिः यदाग्नेयादिवाक्योत्पन्नयागपरः। उत्पत्तिवाक्ये आग्नेय इति तद्धितान्तेन अग्निदेवताकः पुरोडाश इति पुरोडाशस्य प्राधान्यम्। देवतायाः तत्र गुणभावोऽवगतः। द्रव्यदेवतासंबन्धात् कल्प्यमानो यागः तदनुगुणमेव कल्प्यते– अग्निदेवताकाष्टाकपाल-पुरोडाशहविष्को याग इति। एवंविधयाग एव फलवाक्ये यजिना परामृश्यत इति देवता गुणभूतैव त्यागांशं प्रतीति युज्यते। अनेनापि यागस्यैव प्राधान्यमवगम्यते।

ननु देवतायाः विग्रहादिकं नाङ्गीक्रियते, तर्हि किं रूपं तस्याः इत्याशङ्कायामुच्यते ''शब्दमात्रं देवता। अर्थस्तु प्रातिपदिकानुरोधात् चेतनोऽचेतनो वा कश्चित् स्वीक्रियते''[५]

इत्थं च शब्दमात्रस्य देवतात्वेऽपि द्रव्यसंबन्ध कर्मसु आरोपित एव। एवमुपासनादौ मन्त्रप्रतिपाद्यार्थस्य स्वीकारात् तस्मिन्नर्थे विग्रहाद्यारोपेण वाचनिकं ध्यानमात्रं विधीयते। तद्विशिष्टात् उपासानारूपकर्मणः फलम्। अपि च ''मन्त्रार्थवादेतिहासपुराणेष्वपि देवतानामपि तपश्चरणक्रत्वनुष्ठानब्रह्मास्त्रादिमन्त्रतश्च समीहितसिध्यनुकीर्तनात् कर्मण एव फलं गम्यते। मन्दधियस्तु श्रद्धालवस्तात्पर्यमजानाना भ्राम्यन्तु नामे''[६] ति शास्त्रदीपिकायां मिश्रपादाः।

''किञ्च स्तेग– मण्डूकादीनां तिरश्चाम्, अचेतनानां चौषधिवनस्पतीनाम्, अश्वानां गवां च हनुदन्तानाम्, अश्वरूपाणां च कृष्णश्वेतादीनाम्, अश्वचरितानां चेङ्कार– शकृत्करणादीनां देवतात्वेन होमेषु श्रूयमाणानां को नाम फलदायित्वं श्रद्दधीत। किञ्च सैव आग्निहोत्रदेवता दध्ना पूज्यमाना इन्द्रियं ददाति, पसया पशुमिति को हेतुरन्यदतो वस्तुस्वभावात्, यावकभोजनानशनादिभिश्च किमिति देवतास्तुष्यन्ति, किमिति वा सुरापानादिभिः कुप्यन्ति? येनाभ्युदयं, प्रत्यवायं च कुर्वन्ति कर्तुः। अथैवमादिषु कर्मण एवापूर्वद्वारं फलं तस्मादापूर्वप्रयुक्ता धर्माः''[७]।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उपसंहारः

एवं च यजेत स्वर्गकाम इत्यादौ स्वर्गयागयोः साध्यसाधनभावः श्रौतः क्लृप्तश्च, अतोऽपूर्वद्वारा यागस्यैव फलजनकत्वं स्पष्टम्। देवताप्रसादस्य अङ्गीकारे श्रुतश्रौतसाध्यसाधनभावभङ्गापत्तेः यागस्यैवाभ्युपगन्तव्यम्। यथा चोक्तं भट्टपादैः

''तस्मात् फले प्रवृत्तस्य यागादेः शक्तिमात्रकम्।
उत्पत्तौ वाऽपि पश्चादेरपूर्वं न ततः पृथक्॥''[८] इति

आधारग्रन्थाः

१. भाट्टदीपिका। (प्रभावलीसहिता)
२. भाट्टदीपिका। (प्रभावलीसहिता)
३. जैमिनिसूत्रवृत्तिः।
४. भाट्टदीपिका। (प्रभावलीसहिता)
५. भाट्टदीपिका। (प्रभावलीसहिता)
६. शास्त्रदीपिका (प्रभासहिता)
७. शास्त्रदीपिका (प्रभासहिता)
८. श्लोकवार्त्तिकम् (चो. सू. १९९)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न्यायमनोविज्ञानयोर्दृष्ट्या प्रत्यक्षलक्षणमीमांसा

रामचन्द्रुल बालाजी

प्राचीनं न्यायशास्त्रम् अर्वाचीनं च मनोविज्ञानम्। आभ्यां प्रतिपाद्ये विषये साम्यं वैषम्यं चावलोक्यते। प्रयोगप्रधान-मिति मन्यते मनोविज्ञानं, विचारप्रधानमिति च न्यायशास्त्रम्। तथाऽपि प्रत्यक्षलक्षणं, प्रत्यक्षविभागः, प्रत्यक्षप्रक्रिया, इन्द्रियाणां विभागः, मनसः स्वरूपमित्यादिविषये अनयोः शास्त्रयोः मतानि सन्तोल्य साम्यवैषम्यपरीक्षणमत्र सप्रमाणं विदधाति लेखकः।

प्रत्यक्षलक्षणविचारः–

न्यायमतम्–गौतममहर्षिणा न्यायसूत्रेषु प्रत्यक्षप्रमालक्षणम् एवमुक्तम् 'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्।'[1] अस्य भाष्यकारः वात्स्यायनः सम्यक् विवरणमकरोत्। तत्र इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षमिति लक्षणम्। इन्द्रियाणामर्थैः सह यः सन्निकर्षः तज्जन्यत्वं प्रत्यक्षज्ञानस्य लक्षणम्। वस्तुतः प्रत्यक्षप्रक्रिया एवं भवति। आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेनेति। परं प्रकृतप्रत्यक्षलक्षणे इन्द्रियार्थसन्निकर्षस्यैव कारणत्वेन उक्तत्वात् आत्मनः, आत्ममनस्संयोगस्य, मन इन्द्रियसंयोगस्य च कारणत्वं नोक्तमिति नाशङ्कनीयम्। अत एव भाष्ये 'नाशङ्कनीयम्, इदं कारणावधारणं न' असाधारणकारणत्वप्रदर्शनपरम् एतद्वचनम्। विशिष्टकारणवचनम्। आत्मादीनां तु ज्ञानसामान्यं प्रति कारणत्वात् अस्मिन्सूत्रे तन्नाभिहितम्। मन इन्द्रियसंयोगः असाधारणकारणेऽपि प्रत्यक्षभेदे भेदाभावात् विशेषतया इन्द्रियार्थसन्निकर्षस्यैव इहोपदानां कृतम् इति वात्स्यायनेन भाष्ये निर्णीतम्[2]। भाष्ये ज्ञानपदसार्थक्यं नोक्तम्। ज्ञानपदं विशेष्यसमर्पकम्। ज्ञानपदाभावे इन्द्रियार्थसन्निकर्षध्वंसे अतिप्याप्तिः स्यात्। सुखादिष्वतिव्याप्तिवारणाय ज्ञानपदमिति मञ्जरीकाराः[3]। सूत्रे अव्यपदेश्यपदाभावे प्रत्यक्षस्य शाब्दबोधत्वं प्रसज्येत। तथाहि, नामधेयेन सहिताः एव सर्वे अर्थाः वर्तन्ते। अर्थप्रतीतिरपि नामधेयोपेतैव। शब्दादर्थप्रतीतिः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अर्थप्रतीत्या च व्यवहारः क्रियते। अतः इन्द्रियार्थसन्निकर्षादुत्पन्नम् अर्थज्ञानं रूपमिति, रस इति वा रूपरसशब्दैः व्यपदिश्यत इति तादृशप्रत्यक्षस्य शाब्दत्वापत्तिः। तन्निराकरणाय सूत्रे अव्यपदेश्यपदमिति उक्तम्[४]। व्यवहारकाले शब्दापेक्षासत्त्वेऽपि अर्थज्ञानकाले शब्दापेक्षायाः अभावात् नेदं शाब्दम्। अपि च शाब्दबोधस्थले पदपदार्थयोः शक्तिरूपसम्बन्धज्ञानापेक्षा वर्तते:। इदं रूपम्, अयं रसः इत्यादिप्रत्यक्षस्थले तु शक्तिज्ञानापेक्षा नास्तीति प्रत्यक्षं शाब्दविलक्षणम्। सूत्रस्थस्य अव्यभिचारिपदस्य सार्थक्यम् एवं वदति भाष्यकारः। 'ग्रीष्मे मरीचयो भौमेनोष्मणा संसृष्टाः स्पन्दमानाः दूरस्थस्य चक्षुषा सन्निकृष्यन्ते। तत्रेन्द्रियसन्निकर्षाद् 'उदकम्' इति ज्ञानम् उत्पद्यते। तच्च प्रत्यक्षं प्रसज्यते इत्यत आह– अव्यभिचारीति। ग्रीष्मे मरुमरीचिषु भौमेनोष्मणा संसृष्टेषु उदकभ्रान्तिः इन्द्रियार्थसन्निकर्षाज्जायते। एवं च इन्द्रियार्थसन्निकर्षोत्पन्नम् इदमुदकमिति भ्रमात्मकं ज्ञानं प्रत्यक्षप्रमा स्यात्। तद्व्यावर्तनाय अव्यभिचारीति[५]। भ्रमभिन्नमिति तदर्थः। इदं जलमिति ज्ञानं भ्रमरूपमिति तद्भिन्नत्वाभावात् न प्रत्यक्षप्रमालक्षणस्यातिव्याप्तिः। व्यवसायात्मकमिति पदस्य प्रयोजनम् एवं वदति भाष्यकारः–'दूरात् चक्षुषा अर्थं पश्यन्नावधारयति, अयं धूम इति वा रेणुरिति वा न निश्चिनोति किन्तु धूमो वा रेणुर्वा इति संदिग्धे। एवं च धूमो वा रेणुर्वा इति संशयात्मकं ज्ञानं प्रत्यक्षप्रमा स्यात्[६]। संशयस्य अयथार्थानुभवप्रभेदतया प्रत्यक्षप्रमात्वं नेष्टम्। अतः व्यवसायात्मकमिति विशेषणे प्रकृतज्ञाने निश्चयत्वाभावात् संशयवारणं भवति। अव्यपदेश्यव्यवसायात्मकदलयोः सार्थक्यविषये न्यायवार्तिकतात्पर्यटीकाकारणाम् वाचस्पतिमिश्राणाम् आशयः अन्यरूपेण द्रष्टुं शक्यते। वाचस्पतिमिश्रैः स्वगुरोः त्रिलोचनस्य मतानुसारेण भाष्यवार्तिककारैः अप्रदर्शितः सविकल्पक–निर्विकल्पकभेदः सूत्रे प्रादर्शि। अनेन इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानम् अव्यभिचारीति, उभयप्रत्यक्षसाधारणं लक्षणमिति प्रतिपादितम्। अव्यपदेश्य–व्यवयसायात्मकमिति पदद्वयेन क्रमेण निर्विकल्पकप्रत्यक्षस्य सविकल्पकप्रत्यक्षस्य च निर्देशः सूत्रकारेण कृत इति वाचस्पतिमिश्राः[७]। मनसः इन्द्रियत्वात् इन्द्रियस्य मनसः अर्थेन आत्मसुखादिना सन्निकर्षात् यत् आत्मसुखादिज्ञानं जायते इति तत्रापि प्रत्यक्षलक्षणस्य अव्याप्तिर्नास्ति। न च मनसः इन्द्रियत्वे 'आत्मशरीरेन्द्रियार्थबुद्धिमनः प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयत्'[८] इत्यस्मिन् सूत्रे मनसः इन्द्रियेभ्यः पृथगुपदेशः अनुपपन्नमिति वाच्यम्। मनसः इन्द्रियत्वेऽपि बाह्येन्द्रियापेक्षया वैलक्षण्यसूचनाश पृथगुपदेशः कृतः। वैलक्षण्यन्तु बहिरिन्द्रियाणां भूतजन्यत्वं वर्तते। 'घ्राणरसनचक्षुस्त्वक्छोत्राणि इन्द्रियाणि भूतेभ्यः'[९] इतीन्द्रियाणां भौतिकत्वम् । पृथिव्यादिपञ्चभूतेभ्यः घ्राणादीनि इन्द्रियाणि उत्पन्नानीति भौतिकानि इन्द्रियाणि। एवं बहिरिन्द्रियाणां नियतविषयत्वञ्च। मनस्त्वभौतिकम्। सर्वविषयकञ्च।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वविषयगुणत्वमपि नास्तीति वैलक्षण्यसूचनाय आत्मेन्द्रियेति सूत्रे मनसः पृथगुपदेशः कृतः सूत्रकारेण। यद्यपि सूत्रे इन्द्रियेषु मनसः गणना न कृता तथापि मनसः इन्द्रियत्वमस्य शास्त्रस्य सम्मतम्।[१०]

मनोविज्ञानम्:—ज्ञानेन्द्रियाणामुपयोगेन तत्तदिन्द्रियग्राह्यवस्तूनां तद्विशेषाणाञ्च ज्ञानप्रक्रिया प्रत्यक्षीकरणमिति कथ्यते। मानवः दैनन्दिनजीवने अनेकैः उद्दीपनैः प्रभावितो भवति। सः न केवलं तान्युद्दीपनानि तत्तद् ज्ञानेन्द्रियैः गृह्णाति, अपि तु सः तान्युद्दीपनानि अवगन्तुं प्रभवति। एतादृशमर्थवत् विचक्षणज्ञानमेव प्रत्यक्षमिति व्यपदिश्यते। यथा—मानवः भोजनसमये कश्मिंश्चित् भोज्यपदार्थे लवणाधिक्यमस्तीति, गीतश्रवणसमये तद्गायकस्य नाम च यदा ज्ञातुं प्रभवति तदानीमेव सः मानवः तान्युद्दीपनानि प्रत्यक्षीकृतवानिति वक्तुं शक्यते। न केवलमुद्दीपनैः मानवः उद्दीपितो भवति, अपितु तैरुद्दीपनैस्साकमर्थवत्संसर्गं च सम्पादयति। एषैव प्रकिया प्रत्यक्षपदेन उच्यते। प्रत्यक्षं गतिशीला प्रक्रिया (Dylamic process) प्रत्यक्षादेव मनुष्याणां कृते विविधोद्दीपनान्यधिकृत्य स्पष्टज्ञानं भवति। 'ज्ञानेन्द्रियाणाम् विषयैस्साकं संयोगकन आदौ संवेदना (Sensation) ज्ञानं भवति। संवेदना नाम वस्तुनः परिचयमात्रम्। प्रत्यक्षं तद्विषयकं ज्ञानम्। ध्वनेः श्रवणं संवेदना, रूपरसगन्धादिभ्योऽयं पृथक् नारिकेलपतनजन्यश्चेति सप्रकारकं ज्ञानं प्रत्यक्षम् (Perception) संवेदनाऽज्ञातार्थस्य वस्तुनः प्रथमः संस्कारः निर्विकल्पकं भवति। अनन्तरमेव प्रत्यक्षम्[११]। तत्र संवेदनाप्रत्यभिज्ञयोः संयोगो भवति। नवजाते शिशौ गतानुभवानामभावेन वस्तुतः संवेदनैव सम्भवति। अर्थबोधसमर्थे च तस्मिन् संवेदना प्रत्यक्षक्रियास्वरूपं लभते। संवेदनायां तु संवेदना विषयको ज्ञानेन्द्रियसम्पृक्त एव भागः उत्तेजितो भवति, प्रत्यक्षक्रियायां तत्सहचारिप्रदेशोऽपि। संवेदनाऽमिश्रा विशुद्धैका प्रक्रिया। प्रत्यक्षक्रिया सम्मिश्रा. तत्र संवेदनानुभावानां मिश्रणं भवति'[१२]।

समीक्षणम्—न्यायशास्त्रीयप्रत्यक्षलक्षणस्य मनोवैज्ञानिकैः कथितप्रत्यक्षचिन्तनस्य च नाधिकः भेदः दृश्यते। नैयायिकप्रत्यक्षलक्षणम् 'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षमिति। मनोविज्ञानेऽपि सर्वमपि ज्ञानम् इन्द्रियपूर्वकमेव भवति। एवञ्च उभयोः शास्त्रयोर्दृष्ट्यापि ज्ञानेन्द्रियाणां सन्निकर्षः अथैः साकम् आवश्यकः।

* इन्द्रियार्थसंयोगात् आदौ निर्विकल्पकं ज्ञानं भवति न्यायमते। संवेदना भवति मनोविज्ञानमते। एवञ्च उभयत्रापि निष्प्रकारकं भवतीति साम्यम्।
* निर्विकल्पकज्ञानस्य पूर्वानुभवैः साकं सम्बन्धेन सविकल्पकं प्रत्यक्षं भवतीति सादृश्यं दृश्यते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रत्यक्षविभागः–

न्यायमतम्–न्यायमते प्रत्यक्षं द्विविधं भवति, निर्विकल्पकसविकल्पकभेदेन। यद्यपि सूत्रभाष्ययोर्मध्ये प्रत्यक्षविभागः कण्ठरवेण नोक्तः। मणिकारान्तरकालिकेन विश्वनाथपञ्चाननेनापि स्वकीयन्यायसूत्रवृत्तौ प्रत्यक्षव्याख्यानावसरे स्पष्ट्यकारि यत्, सूत्रस्थ–अव्यपदेश्यव्यवसायात्मकशब्दौ प्रत्यक्षविभागपराविति[१३], अव्यपदेश्यं-निर्विकल्पकं, व्यवसायात्मकं-सविकल्पकमिति द्विविधं प्रत्यक्षमिति।

मनोविज्ञानम्–आद्यमिन्द्रियजं ज्ञानं संवेदनपदवाच्यं पूर्वमुक्तम्। तानि च संवेदनजनकानि ज्ञानेन्द्रियाणि पञ्च भवन्तीति संवेदनमपि मुख्यतः पञ्चविधम्। यथा–

* दृष्टिसंवेदना (Visual Sensation)
* श्रोत्रसंवेदना (Auditory Sensation)
* घ्राणसंवेदना (Olfactoty Sensation)
* रससंवेदना (Taste Sensation)
* त्वक्संवेदना (Tactual Sensation)

चेति इन्द्रियप्रधानः संवेदनविभागः कृतः एतादृशसंवेदनानन्तरं जायमानम्. अर्थवज्ज्ञानं प्रत्यक्षपदेन व्यपदिश्यते[१४]।

समीक्षणम्–नैयायिकैः कृतः प्रत्यक्षविभागः मनोवैज्ञानिकः प्रकारान्तेरण कृतः। नैयायिकैः कथितविभागविषये मनोवैज्ञानिकानां वैमनस्यं नास्ति। विशिष्य समग्राकृतिवादिभिः (Gestalt) अस्मिन् क्षेत्रे विशेषपरिश्रमः कृतः। एतैः प्रतिपादितसंवेदनैव नैयायिकानां मते निर्विकल्पकज्ञानं भवति। तस्य गतानुभवैस्साकं संयोगेन सविकल्पकप्रत्यक्षं भवति[१५]। उभयत्र विभागः समान एव। संवेदनानां विभागविषये मनोवैज्ञानिकैः इन्द्रियप्रधानः संवेदनविभागः कृतः। न्यायदर्शने रूप–रस–गन्ध–स्पर्श–शब्दाः पञ्चज्ञानेन्द्रियाणां विषयाः समाम्नाताः। तदनुसारं १. रूपसंवदेना, २. रससंवदेना, ३. गन्धसंवेदना, ४. शब्दसंवेदना, ५. स्पर्शसंवेदना चेति विषयप्रधानो विभागः कृतोऽस्ति। अयं नामभेद एव न वस्तुगतः भेदः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रत्यक्षप्रक्रिया–

न्यायमतम्–वस्तुतः प्रत्यक्षप्रक्रिया एवं भवति आत्मा मनसा संयुज्यते। मन इन्द्रियेण, इन्द्रियमर्थेन ततः प्रत्यक्षमिति, नैयायिकानां क्रमः[१६]। तत्र आत्ममनस्संयोगः ज्ञानसामान्यं प्रति कारणम्। मन इन्द्रियसंयोगः बाह्यप्रत्यक्षसामान्यं प्रति कारणम्। इन्द्रियार्थसंयोगस्तु प्रत्यक्षभेदेन भिद्यते। तत्रेन्द्रियार्थसन्निर्कषः षड्विधः न्यायवार्तिक निरूपितः। अपि च प्रत्यक्षसामान्ये महत्त्वस्य, चाक्षुषं प्रति उद्भूतरूपालोकसंयोगादीनामपि कारणत्वमङ्गीकुर्वन्ति नैयायिकाः[१७]।

मनोविज्ञानम्–किमपि ज्ञानेन्द्रियं बाह्यपदार्थेन (उद्दीपनेन) संपृक्तं भवति तदा तत्रस्थाः ज्ञानवाहिन्यो नाड्यः उत्तेजिताः भवन्ति। ज्ञानेन्द्रियोत्तेजना च सुषुम्णा मार्गेण मस्तिष्ककेन्द्रं प्राप्नोति। मस्तिष्के लक्षशः जीवकणाः भवन्ति। एकैकप्रत्यक्षस्य कृते नियमितजीवकणाः कार्यं कुर्वन्ति। मस्तिष्कं प्रति आगतोत्तेजनाः विशिष्टज्ञानरूपेण परिणमन्ति। तदा संवेदना जायते। यदा संवेदनया साकं पूर्वानुभवानां मेलनं भवति तदा प्रत्यक्षज्ञानमुत्पद्यते। इयं प्रत्यक्षोत्पत्तिप्रक्रिया[१८]।

समीक्षणम्–प्रत्यक्षज्ञाने इन्द्रियार्थसन्निकर्षः उभयोः मतयोः दृष्ट्या समान एव। परन्तु नैयायिकैः कथितप्रत्यक्षप्रक्रियायां विद्यमानाः मन-आत्मादिपदार्थाः अनुमानेन शब्दप्रमाणेन च साध्याः भवन्ति। आधुनिकमनोविज्ञानिनां व्यवहारवादिनां मतानुसारं सर्वोऽपि पदार्थः प्रत्यक्षप्रमाणसाध्यः, प्रयोगशालायां निरूपणयोग्यश्च भवेत्। अतः नैयायिकैरभ्युपगतान् मन- आत्मादिपदार्थान् नाभ्युपगच्छन्ति। समग्राकृतिवादिनां मते तु अन्तर्दृष्ट्या अधिगमः यद्यपि भवति तेषां मते मनसः स्वरूपं किम्? तस्य कार्यं किमिति विचारणीयाम्। मनोवैज्ञानिकप्रत्यक्षप्रक्रियायाम् इन्द्रियार्थसंयोगानन्तरं सर्वमपि कार्यं मस्तिष्कस्यैव। अतः प्रत्यक्षप्रक्रियायाम् उभयोः शास्त्रयोः भिन्नाः सिद्धान्ताः वर्तन्तेः इति ज्ञायते।

इन्द्रियलक्षणं विभागश्च–

न्यायमतम्–स्वविषयग्रहणलक्षणानि इन्द्रियाणीति भाष्यकारेण इन्द्रियसामान्यलक्षणभिहिताम्[१९]। घ्राणरसनचक्षुस्त्वक् छ्रोत्राणि ज्ञानेन्द्रियाणि। तेषां गन्ध-रस-रूप-स्पर्श-शब्दविषयग्राहकंत्वं वर्तत इति समन्वयः। तथा च गन्धग्राहकं घ्राणम्, रसग्राहकं रसनम् इति प्रत्येकलक्षणानि भवन्ति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इन्द्रियविभागविषये 'घ्राणरसनचक्षुस्त्वक्छ्रोत्राणीन्द्रियाणि भूतेभ्यः'[२०] इति भूतप्रकृतिकानि पञ्च बहिरिन्द्रियाणि न्यायदर्शने प्रतिपादितानि। मनस्तु अन्तरिन्द्रियम्, अभौतिकं सर्वविषयं च। एतत् भेदप्रदर्शनायैव प्रमेयपरिगणनसूत्रे इन्द्रियेभ्यः पृथक्मनसः प्रतिपादनं कृतम्। अतः ज्ञानेन्द्रियाणि षडिति सिद्धम्।

मनोविज्ञानम्–ज्ञानेन्द्रियाणि प्रत्यक्षविषये मुख्यकारणानि भवन्ति। ज्ञानेन्द्रियाणि बाह्योद्दीपनानि गृह्यन्ते। अत एव एतेषाम् इन्द्रियाणां ग्राहकाणि (Receptors) इति अन्वर्थनाम[२१]। एतानि प्रत्येकतया स्वविषयग्राहकाणि भवन्तीत्यतः स्वविषयग्राहकत्वम् इन्द्रियाणाम्।

इन्द्रियाणां विषयग्राहकशक्त्यनुसारं प्रधानतया इन्द्रियाणि अष्टौ ग्राहकाणि भवन्ति। तानि क्रमेण दृष्टिग्राहकं, श्रवणग्राहकं, आघ्राणग्राहकं, रसनग्राहकं, स्पर्शग्राहकं, स्तब्धज्ञानग्राहकं, गतिसंवेदनीयग्राहकं, आङ्गिकज्ञानग्राहकमिति इन्द्रियाणां भेदः कृतः वर्तते[२२]।

समीक्षणम्–न्यायशास्त्रे स्वविषयग्राहकत्वम् इन्द्रियलक्षणमुक्तम्। तत्र मनोवैज्ञानिकानामपि विप्रतिपत्तिः नैव दृश्यते। इन्द्रियविभागविषये न्यायशास्त्रे पञ्चविध एव बाह्यज्ञानेन्द्रियाणां विभागः दृश्यते। ततोऽतिरिक्तिरूपेण त्रयो भेदाः मनोवैज्ञानिकैः कृताः दृश्यन्ते।

* स्तब्धज्ञानग्राहकम् (Static sense receptor)
* गतिसंवेदनीयग्राहकम् (Kinesthetic sense receptor)
* आङ्गिकज्ञानग्राहकम् (Organic sense receptor)

अत्र संशयः भवति कथम् अष्टौ प्रत्यक्षाणि, इन्द्रियाणि पञ्चैव किल? इति। वस्तुतः मनोवैज्ञानिकाः प्रत्यक्षविषये संवेदनाविषये वा चत्वारि निर्णायकानि अङ्गीकुर्वन्ति। तेषामाधारेणैव विभागः कर्तव्यः। तानि क्रमेण बार्ट्ली (Bertely) महोदयस्य कथनानुसारं।

* एक संवेदनमनन्यसाधारणं भवेत्। एकेनेन्द्रियेण एकप्रकारकप्रत्यक्षमेव भवेत्।
* एकस्य प्रत्यक्षस्य एकमिन्द्रियं भवति। तदेव वस्तुनः प्रत्यक्षस्य मध्यस्थं भवेत्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

* तदिन्द्रियात् मस्तिष्कं प्रति सूचनाप्रेषणाय विशिष्टमार्गः भवेत्।

* प्रत्यक्षसाधनाय प्रेरणावश्यकी। तस्याः प्रेरणायाः निर्दिष्टा शक्तिः भवेत् इति।[२३]

उपरि कथितचतुर्विधतत्त्वानुरोधेन चक्षुरशदीनां पञ्चबाह्येन्द्रियाणां साधने नास्ति विप्रतिपत्तिः। परन्तु स्तब्धज्ञानादीनि त्रीणि ग्राहकाणी ज्ञानेन्द्रियाणि इति प्रत्येकतया कथनं कथम्। तेषां प्रत्येकंमिन्द्रियस्त्वायाभावात् इति कश्चन विचारः।

एवमेव केचन मनोवैज्ञानिकाः चर्मसम्बन्धग्राहकेषु पीडासंवेदनाद्यवान्तरभेदान् कल्पयित्वा दशप्रत्यक्षाणीति कथयन्ति। परन्तु तन्नैव युक्तम्। एतादृशावान्तरविषयभेदेन प्रत्यक्षाणां संख्याकल्पने सहस्राधिकप्रत्यक्षाणि अङ्गीकर्तव्यानि भवेयुः।

मनोनिरूपणम्–

न्यायमतम्–आन्तरिकमिन्द्रियं मनः भवति। तत्सद्भावे अनुमानं प्रमाणम्। यथा–'स्मृत्यनुमानागमसंशयप्रतिभास्वप्नज्ञानोहाः सुखादिप्रत्यक्षमिच्छादयश्च मनसो लिङ्गानीति'[२४]। 'युगपद् ज्ञानानुपपत्तिर्मनसो लिङ्गम्'[२५] इत्यादिसूत्राणि न्यायसूत्रकारेण प्रतिपादितानि दृश्यन्ते। इन्द्रियार्थसन्निकर्षेषु सत्स्वपि युगपज्ज्ञानानि नोत्पद्यन्ते। तेनेदं निर्णीयते तत्तदिन्द्रियसंयोगि अव्यापि निमित्तान्तरमस्तीति। यस्य सन्निधौ ज्ञानमुत्पद्यते। यदभावे ज्ञानं नोत्पद्यते, तदेव मनः इति अङ्गीकर्तव्यम्। इदं च मनः न भौतिकम्। भौतिकत्वे नियतविषयत्वापत्तिः। मनः अनियतविषयत्वात् अभौतिकम्। सर्वबाह्येन्द्रियाणां सहकारि। तच्च मनः प्रतिशरीरं भिन्नम् एकं च। अणुपरिमाणं च। विभुत्वे मनसः सर्वेन्द्रियसम्बन्धः सर्वदा भवतीति ज्ञानयौगपद्यप्रसङ्गः।

मनोविज्ञानम्–दार्शनिकैः अङ्गीकृतान् मन–आत्मादिपदार्थान् आधुनिकमनोवैज्ञानिकाः नाभ्युपगच्छन्ति। तेषां मते मस्तिष्कम् (Brain) एकमिन्द्रियं भवति यत्र अर्बुदाधिकसंख्याकाः जीवकणाः भवन्ति। एते परस्परसंयोगेन कार्यं कुर्वन्ति। मानसिककार्याणां सर्वेषामेतदेवेन्द्रियम्।

इन्द्रियेभ्यः ग्राह्यसंवेदनाना व्यवस्थापनम् अर्थकल्पनं, पूर्वानुभवैस्साकं सम्मेलनं, प्रकृतविद्यमानपरिस्थित्यनुगुणव्यवहारस्य निर्देशनं च मस्तिष्कस्य कार्यं भवति। संवेदना–प्रत्यक्षम्–ऊहा–तुलनं–न्यायनिर्णयः–कल्पनम् इत्यादीनां सर्वेषामेतदेव कारणं भवति। मस्तिष्कं नामकमिन्द्रियं मूर्तद्रव्यं भवति[२६]। अत्र केचन मस्तिष्कमेव मनः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति अतिरिक्तसूक्ष्मेन्द्रियमिति च मन्वते। मनसः अतिवेगत्वाम् मस्तिष्कस्य कार्यरूपक्रियात्वेन च केचन मन्यन्ते।

समीक्षणम्–मनसः स्वरूपविषये उभयोः भेदः स्पष्ट एव। नैयायिकैः अनुमानप्रमाणात् युगपत्ज्ञानानुत्पत्तिकारणाच्च मनसः साधनं कृतम्। मनोवैज्ञानिकाः अपि ज्ञानानां यौगपद्यं नाङ्गीकुर्वन्ति। परन्तु एकाधिकप्रत्यक्षाणि नियमेन युगपत्र सम्भवन्तीति, अथवा इतरप्रत्यक्षैः प्रकृतप्रत्यक्षं प्रभावितं न भवतीति वक्तुं नैव शक्यते इति वदन्ति मनोवैज्ञानिकाः। एकस्य विषयस्य प्रत्यक्षीकरणसमये इतरप्रत्यक्षाणां प्रभावः किमर्थं न भवतीति विषये उदासीनाः भवन्ति मनोवैज्ञानिकाः। केचन मनोवैज्ञानिकाः तदितरप्रत्यक्षाणां प्रभावं स्थिरदोषः (Constant error) इति स्वीकुर्वन्ति। एवञ्च अयं विषयः अङ्गीकर्तव्यः यदयौगपद्यप्रत्यक्षविषये जीर्विज्ञानिभिः मनोवैज्ञानिकैर्वा बहुचिन्तनं न कृतम्। अस्मिन् क्षेत्रे इतोऽपि यत्नः करणीय इति।

एवमेव लौकिकालौकिकप्रत्यक्षभेदं स्वीकृत तत्र नैयायिकैः कृतः सन्निकर्षप्रकारः आधुनिकशास्त्रेषु नैव दृश्यते तत्रापि लौकिकसन्निकर्षेषु संयोगसन्निकर्षं विहाय संयुक्तसमवायादिसन्निकर्षादीनाम् आवश्यकता वैज्ञानिकानां नास्तीति भाति। एवमेव दार्शनिकैः प्रतिपादितेषु अलौकिकसन्निकर्षेष्वपि मनोवैज्ञानिकाः उदासीनाः एव। यतोहि अलौकिकसन्निकर्षाः प्रयोगशालायां प्रयोपूर्वकं सिद्धान्तयितुम् अथवा अन्यव्यवहारेण निरूपितुं न शक्याः। अतः सामान्यलक्षणाद्यलौकिकसन्निकर्षान्यधिकृत्य मनोवैज्ञाने कुत्रापि उल्लेखः नैव दृश्यते इति भाति। तथापि १९६० अनन्तरं मनोविज्ञाने कश्चन सम्प्रदायः आविर्बभूव, यस्य नाम ट्रैन्स्पर्सन् सैकोलजि (Transperson Psychology)[२७] इति। अत्र पञ्चज्ञानेन्द्रियेतरप्रत्यक्षविषयस्याध्ययनम् अर्थात् अलौकिकप्रत्यक्षस्य अध्ययनमत्र प्रधानपदार्थः। अस्मिन् विषये मास्लो (Maslow) सुटिच (Sutich) इत्यादयः प्रसिद्धाः। एवञ्च अलौकिकसन्निकर्ष-विषयेऽपि आधुनिकमनिवैज्ञानिकाः प्रयत्नं कुर्वन्तीति ज्ञायते।

---

१. न्यायदर्शनम्, गौतमहर्षिः, १:१:४
२. न्यायसूत्रभाष्यम्, वात्स्यायनमहर्षिः, १:१:४
३. न्यायमञ्जरी (प्रथमभागः), जयन्तभट्टः, –पृ. सं – ७०
४. न्यायसूत्रभाष्यम्, वत्स्यायनमहर्षिः, –१.१.४
५. तत्रैव,
६. तत्रैव,
७. न्यायवार्तिकतात्पर्यटीका, वाचस्पतिमिश्रः, – १.१.४
८. न्यायदर्शनम्, – १.१.९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

९. न्यायदर्शनम्, १.१.१२

१०. General Psychology, IInd edition-J.P. Guilford, - P.No . 135 .
मनोविज्ञानशास्त्रमु, तेलुगुसाहित्य-अकाडमिपब्लिकेशन्, - पृ. सं. - ८६-८७

११. अभिनवमनोविज्ञानम्, अग्निहोत्री - पृ. सं. - ६१

१२. तत्रैव,

१३. न्यायसूत्रवृत्ती, विश्वनाथपञ्चाननः, - पृ. सं. - २२

१४. मनोविज्ञानमीमांसा, आचार्यविश्वेश्वरः, - पृ. सं. - 176

१५. उच्चतरशिक्षामनोविज्ञान (हिन्दी), सुशीलगुप्ता-अलकागुप्ता, - पृ. सं. ३७६

१६. न्यायसूत्रभाष्यम्, १.१.४

१७. सिद्धन्तमुक्तावली, विश्वनाथन्यायपञ्चाननः, पृ. ८-१५४

१८. Manual of Psychology, Jadunath Sinha , P.No. 140

१९. न्यायभाष्यम्, १.१.१२

२०. न्यायदर्शनम्, १.१.१२

२१. मनोविज्ञानशास्त्रमु, तेलुगुसाहित्य-अकाडेमी पब्लिकेशन्, पृ. सं. - ४९

२२. तत्रैव, - पृ. सं. ५०

२३. Principles of Perception, S.H. Bartely, P.No - 60

२४. न्यायसूत्रभाष्यम्, १.१.१५

२५. न्यायदर्शनम्, १.१.१६

२६. मनोविज्ञानशास्त्रमु, पृ. सं. ६०

२७. Theoires of Personality, Hall, P.No. 120

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निपातातिरिक्तेत्यादिनियमविमर्शः

श्यामसुन्दरः ए

राज्ञः पुरुषः इत्यादौ पदार्थोपस्थित्यादिघटितक्लृप्तसामग्रीबलात् पुरुषे राजस्वत्वावगाहिबोधो जायते इति निर्विवादम्। तथा सति राजा पुरुषः इत्यादावपि क्लृप्तसामग्रीबलात् शाब्दबोधः आपद्यते। तद्वारणाय निपातातिरिक्तनामार्थयोः साक्षादभेदातिरिक्तसम्बन्धेनान्वयबोधोऽव्युत्पन्न इति नियमः अङ्गीक्रियते। स च नियमः लाघवमूल एवेति निरूपयति निबन्धा।

उपक्रमः

शाब्दस्थले हि द्विविधः संसर्गो भासते। एको वृत्तिभास्यः अपरश्च आकाङ्क्षाभास्य इति। ''व्यक्त्याकृतिजातयस्तु पदार्थः''[१] इति न्यायसूत्रोक्तदिशा शक्य–शक्यतावच्छेदक–तत्संसर्गाणां वृत्तिभास्यत्वात्। पदार्थ–तत्त्वावच्चेदकयोः संबन्धो वृत्तिभास्यो भवति। पदार्थद्वयसंसर्गस्तु क्रमविशेषात्मक–वाक्यानुपूर्वीरूपाकाङ्क्षाभास्यो भवति। तदुक्तं भट्टाचार्यैः व्युत्पत्तिवादे ''शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते'' इति। नैयायिकास्तावत् पदार्थद्वयसंसर्गभासिकामाकाङ्क्षां संसर्गमर्यादापदेन व्यपदिशन्ति।

स च पदार्थद्वयसंसर्गो द्विविधः अभेदः, तदतिरिक्तः आधाराधेय–प्रतियोग्यनुयोगि–विषयविषयिभावादिश्चेति। अभेदश्च प्रातिपदिकार्थे स्वसमानविभक्तिकेन स्वाव्यवहितपूर्ववृत्तिना च पदेन विरूपेणोपस्थितस्यैव पदार्थस्य संसर्गमर्यादया भासते। यथा– ''नीलो घटः'' ''नीलघटमानय'' इत्यादौ घटादौ नीलादेः संसर्गोऽभेदः। अभेदातिरिक्ताधाराधेयभावादिस्तु प्रत्ययार्थे क्वचिन्निपातार्थे च धात्वर्थ–प्रातिपदिकार्थयोः संसर्गमर्यादया भासते। यथा ''राज्ञः पुरुषः'' इत्यत्र राजपदार्थस्य षष्ट्यर्थस्वत्वादौ संसर्गः निरूपितत्वं, ''भूतले न घटः'' इत्यादौ नञर्थेऽभावे घटस्य संसर्गः प्रतियोगित्वं, ''चैत्रः पचति'' इत्यादौ धात्वर्थपाकस्य आख्यातार्थकृतौ अनुकूलत्वं च संसर्गः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषयविमर्शः–

"राजा पुरुषः" भूतलं घटः" इत्यादौ तत्तत्पदज्ञानजन्यपदार्थोपस्थिति-योग्यताज्ञानादिघटितकारणसमवधाने सत्यपि पुरुष–घटादिरूपप्रातिपदिकार्थे राज-भूतलादिपदार्थस्य स्वत्व–आधेयत्वादिभेदसंम्बन्धेन, "तण्डुलः पचति" इत्यादौ धात्वर्थपाकादौ तण्डुलपदार्थस्य कर्मकत्वसम्बन्धेन चान्वयबोधस्याप्रामाणिकतया "निपातातिरिक्तनामार्थयोः धात्वर्थ–तादृशनामार्थयोश्च अभेदातिरिक्तसम्बन्धेन साक्षादन्वयबोधोऽव्युत्पन्नः[२] इति व्युत्पत्तिरङ्गीक्रियते।

"राज्ञः पुरुषः" इत्यत्र राजपदार्थस्य पुरुषपदार्थे षष्ठ्यर्थस्वत्वद्वारा भेदेनान्वयबोधस्य स्वीकारात् उक्तनियमे (व्युत्पत्तौ) साक्षादिति निवेशः। अतो नियमस्य न व्यभिचारः।

"घटो न पटः" "मुखं चन्द्र इव" इत्यादौ घट–चन्द्रादिरूपनामार्थयोः निपातार्थाभाव–सादृश्यादौ भेदेन साक्षादन्वयस्य स्वीकारात् नामार्थे निपातातिरिक्तत्वविशेषणं सार्थकं भवति।

"नीलो घटः" इत्यादौ नामार्थयोः नीलघटाद्योः "स्तोकं पचति" इत्यादौ धात्वर्थनामार्थयोः पाकस्तोकयोश्च साक्षादभेदसम्बन्धेनान्वयबोधोदयात् अभेदातिरिक्त-सम्बन्धेनेत्युक्तिः।

तथा च "नामार्थ–धात्वर्थयोः साक्षाद्भेदेनान्वयबोधश्चेत् विभक्त्यर्थेन क्वचिन्निपातार्थेन च सममेव जायते न त्वन्येन" इति नियमः सिद्ध्यति।

"राजपुरुषः" इति समासस्थले राजपदलक्ष्यार्थस्य राजसम्बन्धिनः पुरुषपदार्थे, "मुखं चन्द्र" इति रूपकस्थले चन्द्रपदलक्ष्यार्थस्य चन्द्रसदृशस्य च अभेदेनैव सम्बन्धेनान्वयः न तु स्वत्व–सादृश्यादिरूपभेदसम्बन्धेनेति निपातातिरिक्तेति नियमस्य न व्यभिचारप्रसङ्गः।

आक्षेपः–

ननु "राजा पुरुषः" इत्यत्र राजादिपदार्थोपस्थिति–योग्यताज्ञानादिघटित क्लृप्तसामग्रीसत्त्वात् स्वत्वसंसर्गकराजप्रकारकपुरुषविशेष्यकबोधः कुतो न भवति? सामग्रीसमवधाने अवश्यं कार्योत्पादात्। न च निपातातिरिक्तेति नियमभङ्गप्रसङ्गेन नामार्थयोः न साक्षादन्वयबोधो जायते इति वाच्यम्। उक्तनियमभङ्गस्य कार्यानुत्पादप्रयोजकत्वाभवात्। कारणाभावस्यैव कार्यानुत्पादप्रयोजकत्वात्। तत्र

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तादृशभेदान्वयबोधप्रयोजकाकांक्षाविरहान्न सामग्रीसमवधानं इत्यपि न, समाभिव्याहार-रूपाकाङ्क्षायास्तत्रापि सत्त्वात्। न च तत्र राजपदार्थप्रकारकभेदसंसर्गकबोधस्यैवापाद्यमानतया तादृशबोधकारणीभूतायाः "राजपदाव्यवहितोत्तर ङस् पदत्वरूपानुपूर्वीविशेषात्म-काकाङ्क्षायाः" "राज्ञः, पुरुषः" इत्यादौ प्रसिद्धायाः विरहान्न शाब्दबोधापत्तिः इति वाच्यम्। तादृशाकाङ्क्षायाः स्वत्वादिसम्बन्धविशेष्यकराज- पदार्थप्रकारकबोधं प्रति कारणत्वेऽपि आपद्यमानं स्वत्वसंसर्गेण राजविशिष्टपुरुषविषयकबोधं प्रति कारणत्वाभावात्। अतोऽत्र निपातातिरिक्तेति नियमो व्यभिचरितः।

समाधानम्

इति चेदुच्यते–"राजा पुरुषः" इत्यत्र आपाद्यमानस्य स्वत्वसंसर्गकराजप्रकारक बोधस्याप्रसिद्धत्वादेव नापत्तिः सम्भवति। "राज्ञो धनं" इत्यत्र षष्ठीविभक्तेरेव स्वारसिकलक्षणया शक्तिभ्रमेण वा पुरुषोपस्थितिः तत्र तादृशबोधस्य प्रसिद्धावपि तद्धेतुभूतायाः प्रकृतिप्रत्ययानुपूर्वीविशिषरूपाकाङ्क्षाज्ञान-लक्षणाधीनतत्तद्वि-भक्तिजन्यपुरुषाद्युपस्थितिघटितसमाग्र्याः "राजा पुरुषः" इत्यत्र विरहेण आपादकाभावान्नापत्तिः संभवति।

एवमेव यत्र स्वत्वसम्बन्धेन राजविशिष्टपुरुषतात्पर्यकंतदादिपदघटितं "स सुन्दरः" इति वाक्यं प्रयुज्यते तत्र स्वत्त्वसंसर्गकराजप्रकारकबोधस्य प्रसिद्धावपि तत्कारणीभूतायाः तत् पदशक्तिज्ञान–विशिष्टार्थोपस्थितिघटितसामग्र्याः "राजा पुरुषः" इत्यत्र विरहान्नापत्तिदानं सम्भवति। अतो न व्यभिचारशङ्का।

आक्षेपः–

ननु एवं सति "राजा पुरुषः" इत्यत्र भेदसंसर्गेण राजप्रकारकबोधज-नकपूर्वोक्तसामग्रयाः विरहात् "निपापातिरिक्तनामार्थयोर्भेदेन साक्षादन्वयबोधोऽव्युत्पन्नः" इति व्युत्पत्तिं विनैव भैदान्वयबोधस्य वारणसम्भावात्, सा व्युत्पत्तिः निर्युक्तिकैव। तथा च राज्ञः पुरुषः इत्यादौ स्वत्वसम्बन्धेन राजादेः पुरुषाद्यंशेऽन्वयोऽप्युपगन्तुं शक्यते, लाघवात् बाधकाभावाच्च। "नीलो घटः" इत्यादौ विशेषणविभक्तेरिव सर्वासामेव विभक्तीनां साधुत्वमात्रार्थकत्वसम्भवेन सम्बन्धादिवाचकत्वमपि निर्युक्तिकमेव। एवं "राजपुरुषः" इत्यादौ समासस्थले राजपदस्य राजसम्बन्धिनि लक्षणास्वीकारोऽपि व्यर्थः। तत्रापि पुरुषांशे स्वत्वसम्बन्धेन राजप्रकारकबोध एव स्वीक्रियते लाघवात् बाधकाभावाच्च।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एवमपि "राज्ञः पुरुषः" इत्यादौ भेदान्वयबोधप्रयोजकीभूतायाः षष्ठ्यन्तराजपदसमभिव्याहृत-पुरुषपदत्वरूपाकाङ्क्षाघटितायाः,"राजपुरुषः" इति समासस्थले तादृशबोधप्रयोजकीभूतायाः राजपदाव्यवहितोत्तरपुरुषपदत्वरूपानुपूर्वी-विशेषज्ञानघटितायश्च सामग्रयाः "राजा पुरुषः" इत्यत्र विरहादेव भेदान्वयबोधा-पत्तेरसम्भवात्। इति चेत्

समाधानम्

अत्रोच्यते-"निपातातिरिक्तनामार्थयोः साक्षाद्भेदेनान्वयबोधोऽव्युत्पन्नः" इति नियमः आवश्यक एव। अस्य नियमस्य "राजा पुरुषः" इत्यादौ स्वत्वसंसर्गेण राजप्रकारकबोधानुपपत्तिवारकतया सार्थक्यासम्भवेऽपि, "पुरुषो न राज्ञः" इत्यादौ स्वत्वाभावबोधानुपपत्तिवारकतया सार्थक्यं सम्भवति। राज्ञः पुरुषः इत्यादौ स्वत्वसंबन्धेन राजप्रकारकान्वयबोधस्वीकारे "पुरुषो न राज्ञः" इत्यत्र तत्सम्बन्धावच्छिन्नप्रतियोगिताकराजा भावो नञा बोध्यते इति वक्तव्यं तच्च न संभवति स्वत्वस्य वृत्त्यनियामकतया अभावप्रतियोगितानवच्छेदकत्वात् तदवच्छिन्नाभावबोधनासंभवात्। निरुक्तनियमाङ्गीकारे तु "राज्ञः पुरुषः" इत्यत्र षष्ट्याः स्वत्वार्थकत्वं स्वीकृत्य तद्द्वारा राज्ञः पुरुषेऽन्वोपगमेन "पुरुषो न राज्ञः" इत्यत्र नञ आश्रयतासम्बन्धेन स्वत्वाभावबोधकत्वं सम्भवति।

न च नञ् समभिव्याहारस्थले स्वत्वाभावबोधोपपादनाय षष्ट्याः स्वत्वार्थकत्वेऽपि नञसमभिव्याहारस्थले स्वत्वसंसर्गकबोधस्वीकार एवोचितः। तदा शाब्दबोधे स्वत्वीयसम्बन्धस्याधिकस्य भानाकल्पनेन लाघवसम्भवादिति वाच्यम्।

"नञ् पदं विना यादृशसमभिव्याहारस्थले यत्र धर्मिणि येन सम्बन्धेन यस्य विशेषणतया भानं तत्र नञ् समभिव्यवहारे तत्र धर्मिणि तत्सम्बधावच्छिन्न-प्रतियोगिताकतदभावः प्रतीयते" इति सर्वजनानुभवस्यापलापापत्तेः। एवं "राज्ञः पुरुषः" इति वाक्यजन्यस्वत्वसंसर्गकराजप्रकारकबोधदशायां "पुरुषो न राज्ञः" इति वाक्याच्छाब्दबोधापत्तेश्च। स्वत्वाभावप्रकारकबद्धौ स्वत्वसंसर्गकबोधस्याविरोधित्वात्। अत उक्तनियमाङ्गीकारेण षष्ट्याः स्वत्वार्थकत्वस्वीकार आवश्यकः।

न चैवमपि वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितावच्छेदकत्वाङ्गीकारपक्षे "पुरुषो न राज्ञः" इति वाक्यात् स्वत्वसम्बन्धावाच्छिन्नप्रतियोगिताक-राजाभावबोधस्वीकारेण च "प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमौ" इति पूर्वोक्तनियामपरिपालनस्य पूर्वोक्तशाब्दबोधापत्तिवारणस्य च सम्भवेन निपातातिरिक्तेति नियमो निर्युक्तिक एवेति वाच्यम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वत्वादिसंसर्गतावादिमते विभक्तेः सर्वत्र निरर्थकत्वाभ्युपगमेन, ''राज्ञः पुरुषः'' इतिवाक्यजन्यशाब्दसामग्रीमध्ये ''स्वत्वसम्बन्धेन राजाभाववान् पुरुषः'' इति निश्चयाभावस्य प्रविष्टत्वात्, ''राजस्वत्वाभाववान् पुरुषः सुन्दरः इत्याकारकप्रत्यक्षसामग्रीमध्यें तु ''राजस्वत्वाभाववान् पुरुषः इत्याकारक ज्ञानस्यैव विशेषणतावच्छेदकप्रकारकज्ञानविधया प्रविशिष्टत्वादनयोर्द्वयोरपि युगपत्समवधानसम्भवेन भिन्ने विषये प्रत्यक्षशाब्दसामग्रयोः शाब्दयामग्रया: प्राबल्येन निरुक्तशाब्दसामग्र्याः तादृशप्रत्यक्षप्रतिबन्धकत्वमधिकतया कल्पनीयमिति गौरवम्।

तादृशनियममभ्युमगम्य स्वत्वादीनां प्रकारत्ववादिनां मते तु तादृशप्रत्यक्षसामग्रीगर्भप्रविष्टं यत् राजस्वत्वाभावान् पुरुषः इति ज्ञानं तदभावस्य निरुक्तशाब्दसामग्रीमध्यें योग्यताज्ञानविधया प्रविष्टत्वादुभयसामग्रयोः युगपदवस्थानासम्भवेन तादृशप्रतिबन्धकत्वाकल्पनाप्रयुक्तलाघवं सम्भवति।

न च बिभक्तीनां स्वत्वाद्यर्थकत्वे लाघवसम्भवेऽपि निपातातिरिक्त-नामार्थयोरित्यादि नियमाभ्युपगमो निरर्थकः। यतः ''राजा पुरुषः'' इत्यत्र आपादकसामग्र्याभावेन आपत्तिर्वार्यते। ''राजपुरुषः'' इति समासस्थले च लुप्तषष्ठीविभक्तिस्मरणेन विभक्त्यर्थस्वत्वप्रकारक बोधोप्युपपद्यते। तत्र राजपदस्य राजसक्बन्धिनि लक्षणास्वीकारोऽप्यनुचितः इति वाच्यम्।

यत्र समासस्थले राजपदस्य राजसम्बन्धिनि स्वारसिकलक्षणाग्रहः तत्र राजसम्बन्धिप्रकारकाभेदान्वयबोधस्योभयवादिसिद्धयता तादृशसम्बन्धिप्रकारकबोध-कारणातायाः लक्षणाग्रहघटितसामग्रयां क्लृप्ततया, तयैव निर्वाहे सर्वत्र लुप्तविभक्तिस्मरणकल्पनमनुचितम्।

ननु ''राज्ञः पुरुषः'' इत्यदौ राजादिपलक्ष्यार्थराजसम्बन्धिनः पुरुषाद्यंशेऽभेदेनान्वयं स्वीकृत्य, विभक्तीनां साधुत्वार्थकत्वस्वीकारेणैव स्वत्वप्रकारकबोधस्य, निपातातिरिक्त-नामार्थयोरित्यादिनियमस्य चोपपादनसम्भवात् विभक्तीनां स्वत्वाद्यर्थाकत्वं निर्युक्तिकमिति चेत्, न

''राज्ञः पुरुषः'' इत्यादौ राजपदस्य राजसम्बन्धिनि लक्षणास्वीकारे ''राजसम्बन्धिनः पुरुषः'' इत्यत्रेव ''राजसम्बन्धिसम्बधी पुरुषः'' इति बोधापत्तिप्रसङ्गः। अतः विभक्तीनाी स्वत्वाद्यर्थकत्वं स्वीकृत्य तदर्थप्रकारक एव शाब्दोबोधोऽङ्गीकार्यः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उपसंहारः–

तथा च निपातातिरिक्तेत्यादिनियमः सुबादिविभक्तीनां सार्थकत्वोपपादनपरः। न तु "राजा पुरुषः" इत्यादौ भेदान्वयबोधवारणपरः। विभक्तीनां सार्थकत्वस्वीकारश्च वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितानवच्छेदकत्वपक्षे, "प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमौ" इति नियमस्वीकारपक्षे च "पुरुषो न राज्ञः" चैत्रस्य न धनम्" इत्यादि नञ् समभिव्याहारसथलेऽन्वयबोधोपपादनायैव।

वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितावच्छेदकत्वे, "प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमौ" इति न्यायानङ्गीकारे वा विभक्तीनां सार्थकत्वमन्तरापि निरुक्तनञ्समभि-व्याहारस्थले शाब्दबोधस्याधिकविषयकत्वं सम्पाद्य भिन्नविषयकशाब्द–प्रत्यक्षसामग्री-द्वयसमवधानविघटनेन शाब्दसामग्र्याः निरुक्तप्रत्यक्षप्रतिबन्धकत्वाकल्पनाप्रयुक्तलाघवमेव। अतोऽयं "निपातातिरिक्त नामार्थयोः साक्षादभेदातिरिक्तसम्बन्धेनान्वयबोधोऽव्युत्पन्न" इति नियमः लाघवमूलक एव।

आकरग्रन्थः– गदाधरभट्टाचार्यविरोचितो व्युत्पत्तिवादः

१. गौतमीयन्यायसूत्रम् (२.२.६७)

२. व्युत्पत्तिवादः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सिद्धान्तपक्षतानिष्कर्षः

अनन्तकृष्णः

अनुमितिं प्रति परामर्शादिक्लृप्तकारणसद्भावेऽपि अनुमितेरनुदयस्योपपादनाय नव्यनैयायिकैः सिसाधयिषाविरहेत्यादिपक्षताख्यं कारणमूरीक्रियते। तत्र च अनुमितेर्द्वैविध्यं, ततः पक्षतानुमित्योः कार्यकारणभावे द्वैविध्यं, पक्षविशेष्यकत्वसाध्यविशेष्यकत्वाभ्याम् अनुमितेर्द्वैविध्यं, तस्मात् पक्षतानुमित्योर्कार्यकारणभावे पुनर्द्वैविध्यमित्याहत्य चत्वारः कार्यकाणभावा इति सिद्धान्तपक्षतानिष्कर्षः विधीयतेऽत्र लेखकेन।

अनुमितिं प्रति क्लृप्तकारणेभ्यः परामर्शादिभ्योऽतिरिक्तं किञ्चित् पक्षताख्यं कारणमङ्गीक्रियते नैयायिकैः। पक्षतायाः स्वरूपं तावत् ''सिषाधयिषाविरहसहकृतसाधकमानाभावो यत्र स पक्षः'' इति मणिकारैः श्रीमद्गङ्गेशोपाध्यायैः प्रतिपादितम्।

सिद्धिसत्त्वासत्त्वाभ्यां अनुमित्यनुत्पादोत्पाददर्शनेन अनुमितिं प्रति सिद्धेः प्रतिबन्धकत्वं तदभावस्य कारणत्वमुपेयते। सिद्धिदशायां सिषाधयिषासत्त्वे अनुमित्यप्रतिबन्धात् सिद्धिनिष्ठानुमितिप्रतिबन्धकतायां सिषाधयिषायाः उत्तेजकत्वं स्वीक्रियते। तेन सिषाधयिषाविरहविशिष्टिसिद्धिः अनुमितिप्रतिबन्धिका, तदभावः कारणमिति पर्यवस्यति। तदेवानुमितिकारणं सिषाधयिषाविरहविशिष्टसिद्ध्यभावरूपं पक्षव्यहारनियामकं पक्षतेत्यभिधीयते।

इत्थञ्च सिद्धसाधनस्थले सिषाधयिषाविरहविशिष्टसिद्धेरेव सत्त्वेन तदभावरूपपक्षतायाः विरहात् अनुमितिर्न जायते। यत्र तु वह्निमनुमिनुयामिति च अनुमित्सा तत्र सिषाधयिषाविशिष्टसिद्धिरेव अस्ति न तु तद्विरहविशिष्टसिद्धिरिति सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्य पक्षताख्यकारणस्य सत्त्वादनुमितिर्जायते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वह्निव्याप्यालोकवान् पर्वतो वह्निमान् इति सिद्ध्यात्माकालोकलिङ्गकपरामर्शे सति धूमेन पर्वते वह्निमनुमिनुयामिति धूमलिङ्गकानुमित्सया अनुमितिर्नोत्पद्यते। अत्रैव स्थले सिद्ध्यसत्त्वे अनुमितिरुत्पद्यत इति सिद्धान्तः।

केचित्तु उक्तस्थले सिद्धिर्नास्ति चेदपि अनुमित्युत्पत्तिं नाङ्गीकुर्वन्ति तदन्यमात्रलिङ्गकानुमितीच्छायाः तल्लिङ्गकानुमितिप्रतिबन्धकत्वात्। तन्मतानुसारं तत्रानुमितिवारणाय तल्लिङ्गकानुमितिं प्रति तदन्यमात्रलिङ्गकानुमितीच्छायाः प्रतिबन्धकत्वं स्वीक्रियते। उक्तस्थले आलोकान्यधूममात्रलिङ्गकानुमितीच्छारूपप्रतिबन्धकस्य सत्त्वात् आलोकलिङ्गकानुमितिर्न जायते।

धूमलिङ्गकानुमितिः आलोकलिङ्गकानुमितिश्च जायतामिति समूहालम्बनेच्छास्थले आलोकलिङ्गकपरामर्शात् अनुमित्युत्पादोपपादनाय 'मात्र' पदोपादनम्।

तदन्यमात्रलिङ्गकानुमितीच्छा नाम तदन्यमात्रलिङ्गकत्वप्रकारकानुमितीच्छा। तत्र तदन्यमात्रलिङ्गकत्वञ्च तल्लिङ्गकत्वाप्रकारकत्वे सति किञ्चिल्लिङ्गकत्वप्रकाश्कत्वम्। तेन प्रमेयलिङ्गकस्थले प्रयेदान्याप्रसिद्ध्या धूमादिलिङ्गकानुमितीच्छायाः न अप्रतिबन्धकत्वप्रसङ्गः।

आलोकेनेन्धनं धूमेन च वह्निमनुमिनुयामित्यादि इच्छावशात् आलोकलिङ्गक-वह्न्यनुमितिवारणाय तल्लिङ्गकत्वाप्रकारकत्वमित्यनेन तल्लिङ्गकत्वप्रकारतानिरूपित-तत्साध्यविशिष्टतत्पक्षविषयकत्वावच्छिन्नानुमितिनिष्ठविशेष्यताकान्यत्वं विवक्षणीयत्।

एतन्मते लिङ्गभेदनियन्त्रितोऽतिरिक्त एकः प्रतिबध्यप्रतिबन्धकभावः। पक्षतानुमित्योः कार्यकारणभावस्तु अनुगत एक एव।

किन्तु धूमालोकोभयलिङ्गकसमूहालम्बनात्मक परामर्शोत्तरम् आलोकलिङ्गकानु-मितीच्छावशात् उत्पन्नायां अनुमितौ व्यभिचारः। धूमलिङ्गकानुमितिप्रतिबन्धिकायाः धूमान्यालोकमात्रलिङ्गकानुमितीच्छायाः सत्त्वेऽपि धूमलिङ्गकानुमित्युत्पादात्।

उक्तव्यभिचारवारणाय धूमान्यमात्रलिङ्गकानुमितीच्छाविशिष्टान्यत्वं प्रतिबध्यतावच्छेककोटौ निवेश्यते। इच्छावैशिष्ट्यञ्चानुमितौ स्वसामानाधिकरण्यावच्छिन्न स्वाव्यवहितोत्तरोत्पत्तिकत्वसंबन्धेन।

तथाच धूमान्यमात्रलिङ्गकानुमितीच्छाविशिष्टान्यानुमितिं प्रति धूमान्यमात्र-लिङ्गकानुमितीच्छा प्रतिबन्धिका इति प्रतिबध्यप्रतिबन्धकभावः। उक्तसमूहालंबनस्थ-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लीयानुमितिस्तु तादृशेच्छाविशिष्टैव न तु तदन्या इति न व्यभिचारः तत्र।

लिङ्गभेदात् पक्षताभेदः–

असत्यां सिद्धौ अन्यलिङ्गकानुमितीच्छासत्त्वे अनुमित्यनुत्पादस्य अनुभवविरुद्धत्वात् पूर्वोक्तकल्पः नाङ्गीक्रियते। सिद्धान्ते तु सिद्धिदशायामेव अन्यलिङ्गकेच्छासत्त्वेऽनुमितिः नोत्पद्यते। यथा 'वह्निव्याप्यालोकवान् पर्वतो वह्निमान्' इत्याकारकसिद्ध्यात्मकपरामर्शोत्तरम् 'धूमेन वह्निमनुमिनुयामिति' इच्छासत्त्वे अनुमितिर्नोदयति। तेन ज्ञायते यत् आलोकलिङ्गकानुमितौ धूमलिङ्गकानुमितीच्छायाः उत्तेजकत्वं नास्तीति। तथाच तल्लिङ्गकानुमितौ तल्लिङ्गकानुमितीच्छा उत्तेजिकेति स्वीकारेण तल्लिङ्गकानुमितिं प्रति तल्लिङ्गकानुमितीच्छाविरहविशिष्टसिद्ध्यभावः कारणमिति कार्यकारणभावः सिद्ध्यति। अयं च लिङ्गभेदनियन्त्रितः पक्षतानुमित्योः कार्यकारणभावः।

अधुना तु उक्तस्थले अनुमितिर्वारयितुं शक्यते। अलोकलिङ्गकानुमिति-कारणीभूतालोकलिङ्गकानुमितीच्छाविरहविशिष्टसिद्ध्यभावस्य विरहात्।

अत्रापि धूमालोकोभयलिङ्गकसमूहालम्बनात्मकसिद्ध्यात्मकपरामर्शोत्तरं आलोकलिङ्गकानुमितीच्छावशात् उत्पन्नायां अनुमितौ व्यभिचारः। तादृश धूमलिङ्गकानुमितिकारणीभूतस्य धूयलिङ्गकानुमितीच्छाविरहविशिष्टसिद्ध्यभावस्य विशहात्। धूमलिङ्गकानुमितीच्छाविशहविशिष्टसिद्धिविशिष्टान्यानुमितिं प्रति धूमलि-ङ्गकानुमितीच्छाविहरविशिष्टसिद्ध्यभावस्य कारणत्वं स्वीकृत्य अयं व्यभिचारो वारणीयः। अनुमितौ सिद्धिवैशिष्ट्यञ्च स्वसामानाधिकरण्यावच्छिन्नस्वाव्यवहितोत्तरोत्पत्ति-कत्वसम्बन्धेन।

एवं सति लिङ्गविशेषानुपरक्तानुमितीच्छाकाले सिद्धिसत्त्वे अनुमितिर्न स्यादतः तल्लिङ्गकानुमितौ तदन्यमात्रलिङ्गकानुमितीच्छातिरिक्तानुमितीच्छायाः उत्तेजकत्वं स्वीक्रियते। तत्र कार्यकारणभावः तदन्यमात्रलिङ्गकानुमितीच्छातिरिक्तानुमितीच्छाविरहविशिष्ट-सिद्धिविशिष्टान्यानुमितिं प्रति तदन्यमात्रलिङ्गकानुमितीच्छातिरिक्तानुमितीच्छा-विरहविशिष्टसिद्ध्यभावः कारणमिति। अयमपि लिङ्गभेदनियन्त्रितः पक्षुतानुमित्योः कार्यकारणभावः।

अथवा आलोकलिङ्गकसिद्ध्यात्मकपरामर्शे सति धूमलिङ्गकानुमित्सया अनुमितिवारणाय तल्लिङ्गकानुमितिं प्रति सिद्धिकालीन-तल्लिङ्गकानुमितीच्छावि-रहविशिष्टान्यलिङ्गकानुमितीच्छायाः प्रतिबन्धकत्वं स्वीक्रियते। तत्र आलोकलिङ्गकानुमि-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तीच्छाविरहविशिष्टा, सिद्धिकालीना च या आलोकान्यलिङ्गकानुमितीच्छा, धूमेन वह्निमनुमिनुयामित्याकारिका, प्रतिबन्धकीभूतायाः तस्या एव सत्त्वेन आलोकलिङ्गकानुमितिर्न जायते।

अत्र लिङ्गभेदनियन्त्रितः अतिरिक्तः कश्चन प्रतिबन्धप्रतिबन्धकभावः। पक्षतानुमित्योः कार्यकारणभावस्तु अनुगत एक एव। उक्तप्रतिबध्यप्रतिबन्धकभावस्वीकारे धूमालोकोभलिङ्गकसिद्ध्यात्मक (परामर्श) दशायाम् आलोकलिङ्गकानुमितीच्छया उत्पन्नायाम् अनुमितौ व्यभिचारः। तद्यथा धूमलिङ्गकानुमितिप्रतिबन्धिकायाः सिद्धिकालीनधूमलिङ्गकानुमितीच्छा तदन्यमात्रलिङ्गकानुमितीच्छाविरहविशिष्टालोकलिङ्गकानुयितीच्छायाः सत्त्वेऽपि धूमङ्गिकानुमितेरुत्पादात्। तद्वारणाय सिद्धिकालीनतल्लिकानुमि तीच्छाविरहविशिष्ट विशिष्टान्यानुमितिं प्रति सिद्धिकालीनतल्लिङ्गकानुमितीच्छाविरहविशिष्टतदन्यमात्रलिङ्गकानुमितीच्छा प्रतिबन्धिकेति प्रतिबध्यप्रतिबन्धकभावः स्वीक्रियते।

अनुमितिभेदेन कार्यकारणभावभेदः–

अनुमितिर्द्विविधा। पक्षतावच्छेदकसामानाधिकरण्येन साध्यावगाहिनी, पक्षतावच्छेदकावच्छेदेन साध्यावगाहिनी चेति। तत्र पक्षतावच्छेदकसामानाधिकरण्येनानुमितिं प्रति सिद्धिमात्रं प्रतिबन्धकम्। तथाच पर्वतो वह्निमान् धूमादित्यत्र विशिष्यप्रतिबध्यप्रतिबन्धकभावः एवं भवति पर्वतत्वनिष्ठनिरवच्छिन्नावच्छेकताकविशेष्यतानिरूपित–वह्नित्वनिष्ठनिरवच्छिन्नावच्छेदकताकप्रकारताकनिक्षयः पर्वतत्वनिष्ठनिरवच्छिन्नावच्छेदकताभिन्नावच्छेदकत्वानिरूपको द्धेश्यतानिरूपितसंयोगत्वनिष्ठावच्छेदकताभिन्नावच्छेकत्वानिरूपकसंयोगपर्याप्तसंसर्गतानिरूपित वह्नित्वनिष्ठनिरवच्छिन्नावच्छेदकताकप्रकारताकनिश्चयः पर्वतत्वनिष्ठनिरवच्छिन्नावच्छेदकताभिन्नावच्छेकत्वानिरूपकविधेयताकानुमितित्वावच्छिन्नं प्रति प्रतिबन्धक इति।

''पर्वतो वह्निमान्'' इत्याकारकस्वरूपतः पर्वतत्वाद्यवगाहिसिद्धिदशायां जातित्वादिना पर्वतत्वाद्यवगाहिन्याः अनुमितेरुदयात् अवच्छेदकतायां निरवच्छिन्नत्वनिवेशः।

तादृशसिद्धिदशायां अधिकावगाहिन्याः 'पर्वतः सुन्दरवह्निमान्' 'सुन्दरपर्वतो वह्निमान्' इत्याद्यनुमितेरुत्पत्त्या पर्वतत्वादिनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपकत्वरूपं पर्वतत्वादिपर्याप्तावच्छेदकताकत्वं उद्देश्यतादौ निवेशितम्।

संसर्गतायां संयोगत्वपर्याप्तावच्छेदकताकत्वनिवेशनेन अवच्छेदकावच्छेदेनानुमितेः एतत्प्रतिबन्ध्यत्वापत्तिनिरासः। अवच्छेदकावच्छेदेनानुमितौ पक्षतावच्छेदकव्यापकसाध्य–

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रतियोगिकसंसर्गो भासते। अतस्तदीयसंसर्गतायाः संयोगत्वादि पर्याप्ताच्छेदकताकत्वं नास्ति।

पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति तु पक्षातावच्छेदकावच्छेदेन साध्यावगाहिसिद्धिरेव प्रतिबन्धिका। तथाच पर्वतत्वावच्छिन्नविशेष्यतानिरूपित पर्वतत्वव्यापकवह्निप्रतियोगिकसंयोगत्वपर्याप्तावच्छेदकताकसंसर्गतानिरूपितवह्नित्वावच्छिन्नप्रकारताकसाध्यनिश्चयः पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितपर्वतत्वव्यापक-वह्निप्रतियोगिकसंयोगत्वपर्याप्तावच्छेदकताकसंसर्गतानिरूपित वह्नित्वावच्छिन्न विधेयताकानुमितिं प्रति प्रतिबन्धकः। इत्येवं प्रतिबध्यप्रतिबन्धकभावद्वैविध्यात् कार्यकारणभाव द्वैविध्यम्।

प्रकारान्तरेण अनुमितिद्वैविध्यात् कार्यकारणभावभेदः–

पक्षविशेष्यकत्वसाध्यविशेष्यकत्वाभ्याम् अनुमितेर्द्वैविध्यं भवति। अत्र पक्षविशेष्यक-साध्यप्रकारकानुमितिं प्रति पक्षविशेष्यक साध्यप्रकारकसिद्धिरेव प्रतिबन्धिका। तुल्यन्यसायेन साध्यविशेष्यक पक्षप्रकारकानुमितिं प्रति साध्यविशेष्यक पक्षप्रकारकसिद्धिरेव प्रतिबन्धिका।

परन्तु अप्रसिद्धसाध्यकस्थले एव साध्यविशेष्यकानुमितेः उत्पादात् साध्यविशेष्यकानुमितिं प्रति साध्यप्रसिद्धिरेव प्रतिबन्धिका। इत्येवं प्रतिबध्यप्रतिबन्धकभावभेदेन पुनः कार्यकारणभावभेदः।

सिषाधयिषायां स्वविषयसिद्‌ध्यनुपहितत्वं विशेषणं देयम्। अन्यथा यत्र वह्निव्याप्यधूमवान् पर्वतो वह्निमान्-वह्निव्याप्यधूमव्याप्यवान् वह्न्यनुमितिः वह्निव्याप्यधूमानिश्र मदिष्टसाधनमित्याकारकं स्मरणात्मकं ज्ञानं, तदुत्तरं वह्न्यनुमितिः। वह्निव्याप्यधुमानुमितिश्चि मे जायतामिति इच्छाः ततः पर्वतो वह्निमान् वह्निव्याप्यधूमवाश्च इति समूहालंबनात्मकानुमितिः तत्र तदुत्तरं वह्न्युमित्यापत्तिः।

पर्यवसितकार्याकारणभावाः–

तदन्यमात्रलिङ्गकानुमितीच्छातिरिक्तानुमितीच्छाविरहविशिष्टसिद्धिविशिष्टान्य प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यता निरूपित प्रकृत साध्यतावच्छेदक-संसर्गतावच्छेदकपर्याप्तावच्छेदकताक संसर्गता निरूपित प्रकृतसाध्यतावच्छेदकाविच्छिन्न प्रकारताकानुमितिं प्रति तदन्यमात्रलिङ्गकानुमितीच्छातिरिक्तस्वविषयसिद्‌ध्यनु-पहितानुमितीच्छाविरहविशिष्टप्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकृतसाध्य-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तावच्छेदकधर्म-सम्बन्धावच्छिन्नप्रकारताकसिद्ध्यभावः कारणम्।

तदन्यमात्रलिङ्गकानुमितीच्छातिरिक्तानुमितीच्छाविरहविशिष्टसिद्धिविशिष्टान्य पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपित-पक्षतावच्छेदकव्यापकसाध्यप्रतियोगिक साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारताकानुमितिं प्रति तदन्यमात्रलिङ्गकानुमितीच्छातिरिक्त-स्वविषयसिद्ध्यनुपहितानुमितीच्छाविरहविशिष्ट-पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितपक्षतावच्छेदकव्यापकसाध्यप्रतियोगिकसाध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकावच्छिन्नप्रकारताकसिद्ध्यभावः कारणम्।

तदन्यमात्रलिङ्गकानुमितीच्छातिरिक्तानुमितीच्छाविरहविशिष्टसिद्धिविशिष्टान्य पक्षतावच्छेदकावच्छिन्नप्रकारतानिरूपितसाध्यतावच्छेदकसम्बन्धावच्छिन्नाधेयतात्व पर्याप्तावच्छेदकताकसंसर्गतानिरूपितसाध्यतावच्छेदकावच्छिन्नविशेष्यताकानुमितिं प्रति तदन्यमात्रलिङ्गकानुमितीच्छातिरिक्त-स्वविषयसिद्ध्यनुपहितानुमितीच्छाविरहविशिष्ट साध्यतावच्छेदकप्रकारकज्ञानाभावः कारणम्।

तदन्यमात्रलिङ्गकानुमितीच्छातिरिक्तानुमितीच्छाविरहविशिष्टसिद्धिविशिष्टान्य साध्यतावच्छेदकावच्छिन्नविशेष्यतानिरूपितपक्षतावच्छेदकव्यापकसाध्यप्रतियोगिक साध्यतावच्छेदकसंसर्गावच्छिन्नाधेयत्वावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारताकानुमितिं प्रति तदन्यमात्रलिङ्गकानुमितीच्छातिरिक्तस्वविषयसिद्ध्यनुपहितानुमितीच्छाविरहविशिष्ट साध्यतावच्छेदकप्रकारकज्ञानाभावः कारणमिति।

इति शम्।।

आकरग्रन्थः—

तत्त्वचिन्तामणिः
दीधितिः
पक्षतागादाधरीच।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शृंगार की अन्वर्थता और 'कुमारसम्भव' की परम्परा

स्व. आचार्य राममूर्ति त्रिपाठी

अनुसन्धानपरेयं प्रस्तुतिः। शृङ्गारस्यार्थः, माधुर्यं शृङ्गारस्य हृदयं तथा माधुर्यस्य उज्ज्वलरसस्य वा पराकाष्ठा शृङ्गारः इति निरूपयन् लेखकः काम- कलायाः त्रीन् बिन्दून् प्रतिपाद्य तत्सङ्घर्षेणैव आनन्दो जायते, स एव परमानन्दस्य प्रादुर्भावहेतुरिति विवृणोति।

महर्षि पाणिनि द्वारा प्रयुक्त टि–धु आदि कतिपय संज्ञाओं को छोड़ दें, तो संस्कृत वाङ्मय की अवान्तर विभिन्न शाखाओं में प्रयुक्त पारिभाषिक शब्द प्रायः अन्वर्थ होते हैं। एक बार संगीत मार्तण्ड पं. ओंकारनाथ ठाकुर के पास में बैठा था और यह जानकर कि अब उन्होंने अपना शुल्क दुगुना-तिगुना कर दिया है– पूछा– "पण्डितजी, अब इस चरम वय में ऐसा क्या हो गया कि आपने अपना शुल्क दुगुना-तिगुना कर दिया?" उन्होंने कहा– "मैंने अब तक संगीत या गान के प्रायोगिक पक्ष पर ही अपनी सम्पूर्ण चेतना केन्द्रित की है– उसका सैद्धान्तिक पक्ष भी है– जिसे समझकर प्रयोग से जोड़ना शेष है। यदि लोग मुझे गान के निमित्त बुलाते हैं और घण्टे-दो घण्टे का कार्यक्रम एक दिन देता हूँ– तो तदर्थ मुझे वर्षभर उतना समय देकर उसके योग्य अपने को बनाए रखना पड़ता है– और उसमें मेरा काफी समय जाया होता है। अब मैं उसके सिद्धान्त पक्ष पर कुछ काम करना चाहता हूँ।"

इस प्रसंग में उन्होंने अपना एक संस्मरण भी सुनाया। उन्होंने कहा कि एक बार अभ्यास के क्रम में सहसा आँसुओं की धारा फूट पड़ी और अनवरत घण्टों चलती रही। सभी लोग चिन्तित और वे स्वयं भी चिन्तित कि आखिर यह हो क्या गया? 'प्रणव भारती' में इस घटना का उल्लेख भी किया है। संस्कृत में रूपान्तर करते हुए मैंने उसे पढ़ा भी है। पण्डितजी ने बताया कि अब उसका

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रहस्य उन्हें ज्ञात हुआ। जिसके अभ्यास में आँसुओं का प्रवाह फूट चला था– वह बाईस श्रुतियों में 'करुणा' नाम की एक श्रुति का साक्षात्कार था और वह सब इसी का परिणाम था। इसके आधार पर मैं यह कहना चाहता हूँ कि संस्कृत वाङ्मय की अवान्तर शाखाओं में प्रयुक्त पारिभाषिक शब्द या संज्ञाएँ प्रायः अन्वर्थ होती हैं। उन-उन शास्त्रों के प्रणेता ऋषियों ने अपने अनुभव के साक्ष्य पर नामकरण किया है। गहरे डूबने पर ज्ञात होता है कि ये समस्त शास्त्र अन्ततः तत्त्वबोध पर्यवसायी हैं। व्याकरण जैसे शास्त्र के लिए कहा गया है–

"इयं हि मोक्षमाणानामजिह्मा राजपद्धतिः"

व्याकरण शास्त्र तत्त्वबोध चाहने वालों के लिए एक सरल राजमार्ग है। नन्ददास ने एक गोपी के विषय में कहा है–

जाने कोऊ बैठी गाय।
चाँद के सम हूवै पिय वने जाय।

अर्थात् लोग समझते हैं कि यह बैठकर गाना गा रही है, नहीं; तत्त्वतः वह नादब्रह्म के माध्यम से परमप्रिय परब्रह्म की ओर जा रही है। यह अकारण नहीं है कि साहित्यशास्त्र 'रस' सिद्धान्त को सर्वोच्च मानता है। इन ऋषियों का सारा व्यवहार परमार्थ से जुड़कर समन्वित होता चलता है। उनके व्यवहार और परमार्थ में एकान्विति होती थी। वे तपोमूर्ति थे।

सम्प्रति, मेरे समक्ष 'शृंगार' शब्द है– जिसका व्युत्पत्तिलभ्य अर्थ है– वह जो शृंग को पहुँचा है– अर्थात् सर्वोच्च है। शारदातनय ने 'भावप्रकाशन' में शृंग का अर्थ श्रेष्ठ ही किया है। काव्यशास्त्र में आचार्यों ने 'रस' को असंकीर्ण रूप से दो वर्गों में रखा है– दीप्ति और द्रुतकारी। कतिपय रस संकीर्ण प्रकृति के भी हैं। शान्त सभी रसों की प्रकृति है– अतः 'अष्टावेव रसाः नाट्ये' प्रायः सुनाई पड़ता है। शान्त शमसाध्य है और नट में वह सम्भव नहीं है। न सही नाट्य में परश्रव्य में 'शान्तोऽपि नवमो रसः' की ध्वनि सुनाई पड़ती है। कश्मीरी आचार्यों का इस पर बड़ा अभिनिवेश है। अस्तु, जो भी हो, यहाँ शृंगार की सर्वोच्चता का प्रसंग है– वह विचारणीय है। काव्यशास्त्र में शृंगार का दूसरा अर्थ महापाना विश्वनाथ ने 'मन्मथोद्भेद' भी किया है। शृङ्गमियर्ति,शृङ्गमृच्छति चेति शृङ्गारः।

(ii) शृङ्गं हि मन्मथोद्भेदः - साहित्यदर्पण

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(iii) भास्कररायमखी ने 'सौभाग्य भास्कर' में त्रिपुरा सम्प्रदाय के अनुसार लिदुर सुन्दरी को शृंगार रसचूर्णा–कहकर उसकी व्याख्या भी की है। शारदातनय ने 'भावप्रकाशनी में शृंग का अर्थ 'श्रेष्ठ' किया है।

परमार्थ व्यवहार का उल्टा है – पलट है। कबीर ने यों ही उलटवाँसी नहीं कही है। कठोपनिषद् भी कहती है–

कश्चिद् धीरः प्रत्यगात्मानमैक्षद्–
आवृत्तचक्षुरमृतत्वमिच्छन्।

जो साधक मृत्यु से अमरता की ओर जाना चाहता है– उसे आँख को उलटना पड़ता है। प्रकृति ने इन्द्रियों को बहिर्मुख औंधा कर रखा है– फलतः वे बाहर की ओर ही देखती है– भीतर की ओर नहीं–

पराञ्चि खानि व्यदधात् स्वयम्भूः
तस्मात्पराङ्पश्यति नान्तरात्मन्
कश्चिद् धीरः प्रत्यगात्मानमैक्षदावृत्त चक्षुरमृतत्वमिच्छन्।।

रसों में दीप्तिकारी (वीर, बीभत्स और रौद्र) की अपेक्षा द्रुतिकारी (शृंगार, करुण, शान्त) की विशेष महिमा है। पूर्ववर्ती में चित्त जल उठता है– परवर्ती में पिघल जाता है। व्यवहार में इन द्रुतिकारी रसों में संभोगशृंगार का स्थान सबसे नीचे है। आनन्दवर्द्धन और मम्मट–दोनों इस पर एकमत है – करुण विप्रलम्भ शृंगार की तरतमता में मतभेद है। संभोगगार का स्थान सबसे नीचे इसलिए है कि संभोगशृंगार में चित्त आलम्बन की ओर बहिर्मुख रहता है– अधिकाधिक विषयों से जुड़ा रहता है– अतः इस विषयाधिक्य के सम्पर्क से चित्त में काठिन्य की मात्रा अधिक रहती है– करुण और विप्रलम्भ में विषयों का वैसा अधिक सम्पर्क नहीं रहता– अतः द्रुति की मात्रा ज्यादा होती है– माधुर्य की मात्रा बढ़ती जाती है। शान्त में विषय सम्पर्क निःशेष हो जाता है– अतः वहाँ माधुर्य अधिक होता है। विषय के अ–सम्पर्क से काठिन्य का क्षरण और द्रवीभाव का आधिक्य होता है।

वस्तुतः शृंगार भी द्विविध है– शुद्ध और मलिन। अप्राकृत सौन्दर्य और अप्राकृत काम की समरसावस्था शुद्ध शृंगार है– प्राकृत सौन्दर्य और प्राकृत काम की साम्यावस्था मलिन शृंगार है।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(i) कालिदास का प्रस्थान प्रेम स्थान है– तो उसका गंतव्य है– शवल ब्रह्म से शुद्ध ब्रह्म या पूर्ण ब्रह्म।

(ii) नाट्यशास्त्र में लोक के धरातल पर शृंगार को स्त्री पुरुष के मध्य रति रति स्थानावेद कहा है, परमार्थ स्तर पर परमशिव सिसृक्षा समकाल स्त्री-पुरुष में द्विदल हो जाना है। सृष्टि इन्हीं के शृङ्गार की परिणति है। कुमारसम्भव में भी कहा गया है–

स्त्रीपुंसावात्मभागौ ते भिन्नमूर्ते, सिसृक्षया।
प्रसूतिभाजः सर्गस्य तानेव पितरौ स्मृतौ।। २/७१

सौन्दर्य एक ही है– वह अप्राकृत भाव से श्रीकृष्ण में और प्राकृत भाव से कामदेव में है। रसज्ञ सामाजिकगण निर्विशेष सामान्यात्मक ब्रह्मानन्द लाभ को रसचर्चा का चरम फल नहीं मानते – कारण, वहाँ नित्य नव-नव या विशेष का स्फुरण नहीं होता – एकरसता बनी रहती है। स्वायम्भुव आगम में कहा गया है–

ब्रह्मानन्दरसादनन्तगुणितो रम्यो रसो वैष्णवः।
तस्मात्कोटिगुणोज्ज्वलश्च मधुरः श्रीगोकुलेन्दो रसः।।

ब्रह्मानन्द रस में माधुर्य नहीं" – यहाँ तक कि वैष्णव रस में अर्थात् वैकुण्ठाधिपति परमात्मा रूप रस में भी – शान्त और दास्य के ऊपर गति न होने के कारण माधुर्य की सम्भावना नहीं है। माधुर्य एकमात्र भगवदानन्द रस में ही है। सख्य और वात्सल्य का अतिक्रम कर उज्ज्वल रस में ही माधुर्य की पराकाष्ठा है। अतः सविशेष भगवद्-भाव में आरूढ़ हुए बिना पूर्ण भाव से रस का आस्वादन नहीं हो सकता। यद्यपि विशिष्ट रस प्रकार और संख्या में सदा ही अनन्त हैं तथापि अनन्त होने पर भी इसकी स्थिति दो प्रकार की है – कभी रस-सामान्य में विशेष अन्तर्लीन रूप से शक्ति रूप में रहता है और कभी परिस्फुट रूप में रहता है।

इस प्रकार मैं यह कहना चाहता हूँ कि माधुर्य शृंगार का हार्द है और उसकी पराकाष्ठा शृंगार या उज्ज्वल रस की पराकाष्ठा है। जिस श्रीमद्भागवत के आधार पर गौड़ीय आचार्यों ने यह स्थापना की है– वह न केवल निगम कल्पतरु का गलित फल है अपितु आगम कल्पतरु का भी गलित फल है। पाञ्चरात्र आगम में जो कुसुमित होता है, वही श्रीमद्भागवत में परिपक्व रस से भरपूर फल के रूप में परिणत होता है। इसी प्रकार प्रत्यभिज्ञा सिद्धान्त भी आगम का (शैवागम)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सारभूत रस स्वरूप है। कालिदास इसी शैवागम के सारभूत प्रत्यभिज्ञा के निष्णात आचार्य हैं। प्रत्यभिज्ञा या त्रिक्‌दर्शन भी दास्यात्मक भक्ति को मानकर भक्ति के मूल तत्त्व को ही मान लेता है– पर केवल मूल को ही मानता हो, सो बात नहीं, भक्ति के चरम फल माधुर्य प्रेम को भी उच्छ्‌वास रूप में स्वीकार करता है। इस धारा में भी अद्वैत के वक्षस् पर द्वैत – भक्ति और ज्ञान की, चित् और आनन्द की, शिव और शक्ति – का सामरस्य है। यह रस तत्त्व ही ऐक्य और वैचित्र्य का पूर्ण सामञ्जस्य है।

इस प्रसंग में एक बात और। जिस प्रकार कोई अतिसुन्दर राजा अपने सामने के दर्पण में अपने ही प्रतिबिम्ब को देखकर उस प्रतिबिम्ब को 'मैं' समझता है, परमेश्वर (शिव) भी उसी प्रकार अपने ही अधीन आत्मशक्ति (पार्वती) को देखकर 'मैं पूर्ण हूँ' – इस प्रकार आत्मस्वरूप को जानते हैं। यही 'पूर्णाहन्ता' है। इस बोध से जो चमत्कार अनुभवगोचर होता है – वह चमत्कार की पूर्णाहन्ता का चमत्कार है। काम या प्रेम इसी का प्रकाश है। यही शिव-शक्ति-सम्मिलन का प्रयोजक और कार्यस्वरूप है– आदिरस अथवा श्रृंगार रस है। इसी रूप में मैं श्रृंगार को अन्वर्थ मानता हूँ। गद्यों की सन्तानें इसे नहीं समझ सकतीं। यह उज्ज्वल रस है।

इसी आलोक में हमें 'कुमारसम्भव' के श्रृंगार रस को देखना चाहिए। 'कुमारसम्भव' – काव्य है जो सभी विद्याओं का सरस निःस्यन्द माना जाता है। फिर भगवदनुग्रह पवित्रितवाक् कालिदास के परमाराध्य शिव और शक्ति के सम्मिलन का यह समुच्छ्‌वास है। इस पर आनन्दवर्द्धन की टिप्पणी है–

"महाकवीनामाप्युक्तदेवताविषयप्रसिद्धसंभोगश्रृंगार निबन्धनाद्यनौचित्यं शक्तितिरस्कृतत्वात् ग्राम्यत्वेन न प्रतिभासते यथा कुमारसंभवे देवीसंभोगवर्णनम्।"

(ध्वन्यालोक, तृतीय उद्योत)

नवनीत कोमलांगी यवनी का सेवन करने वाले पण्डितराज को भी कहना पड़ा कि जयदेव आदि ने उत्तम प्रकृतिक आश्रयों में जैसा संभोगश्रृंगार का वर्णन किया है– वह मत्त मतंगज द्वारा किए गए आलानमञ्जन की तरह मर्यादा का अतिक्रमण है। संभव है– "जयदेवादिभिस्तु" में आदि पद से उनका अभिप्राय कालिदास का भी है। यों तो आनन्दवर्द्धन और अभिनव गुप्त ने भी इस सन्दर्भ

CC-0. Nepal Sanskrit Academy, Kathmandu. Collection

में उन्हें 'उपरिचरित' तथा 'अचिन्त्यचरित' कहकर आक्षेप में संकोच भी किया है। बात केवल कालिदास में ही समाप्त नहीं होती, व्यवहार और परमार्थ में परमार्थ के स्तर पर शृंगार (संभोग) की अभिव्यक्ति करने वाले और-और रचनाकार है– उनकी एक परम्परा है– उनकी अभिव्यक्ति में कहीं से किसी विधि-निषेध अर्मल्य लक्षित नहीं होती– और जिस आश्रय-आलम्बन के मध्य यह माधुर्य (संभोग्मृंगार) व्यक्त होता है– वे रचयिता के परमाराध्य है– माता-पिता से भी अधिक श्रद्धेय। भट्टनायक ने उनके शृंगार में श्रद्धा-बुद्धि को प्रतिबंधक कहा है। आचार्य नन्ददुलारे वाजपेयी इसे असाहित्यिक दलील मानते हैं और कहते हैं कि रचयिता समुन्नत मनस्क होता है। पर यह लोक-स्तर के काव्य की बात है– परमार्थ स्तर पर जहाँ 'को विधिः को निषेधः' की मान्यता है– वहाँ साधारणीकरण की कोई सीमा ही नहीं है।

आलोचक आचार्यों को वहाँ ग्राम्यत्व प्रतीत होता है। यह दोष परिहार अलग है कि अव्युत्पत्तिकृत दोष शक्ति से दबा दिया जाता है और सहृदय पाठक को प्रतीत नहीं होता। क्या कालिदास अव्युत्पन्न थे– शास्त्र तो उनके श्वास-प्रश्वास में था। नाट्यशास्त्र की मान्यताएँ उनके दृश्य काव्यों में इतनी उदग्र होकर बोलती हैं कि साधारण पाठक भी सुनता है। ऐसे में आनन्दवर्द्धन का तर्क गले के नीचे उतरता नहीं। यही कालिदास अपने अन्य दृश्य-श्रव्य काव्यों में अनेक नायक-नायिकाओं की सौभाग्य-रात्रि का प्रसंग सम्भव होने पर भी 'कुमार-सम्भव' में वर्णित सौभाग्य-रात्रि तथा बाद में जिस प्रकार की ग्राम्यत्व-सुलभ वृत्ति का अनुभाव रस लेकर वर्णित करते हैं– वैसा अन्यत्र नहीं है। देखें–

शूलिनः करतलद्वयेन सा सन्निरुध्य नयने हृतांशुका।
तस्य पश्यति ललाटलोचने मोघयत्नविधुरा रहस्यभूत्॥
क्रिया सर्वापि सैवाना परं कामो न विद्यते

–उज्ज्वलनीलमणि

सुरतकालीन कार्यकलाप से चिह्नित पार्वती के नंगे शरीर को देखने में बड़ा मजा आता है– पार्वती अपने दोनों हाथों से जब शिवजी की दोनों आँखें बंद कर देती है तो वे तीसरी आँख खोलकर देखते ही देखते रहते हैं। पार्वती भी इतने रसावेश में है कि अधोवस्त्र की ग्रन्थि अनायास खुल जाती है। शिवजी पार्वती को कष्ट न हो – अतः धीरे-धीरे रति करते हैं। श्वसुरालय में नहीं, वहाँ से प्रस्थित

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

होकर अपनी आवास-भूमि की ओर जाते हुए मध्य में भी अनेक विश्राम स्थलों पर संभोग का आनन्द लेते हैं–

समदिवसनिशीरथं सङ्गिनस्तत्र शम्भोः,
शतमगमद्‌ऋतूनां सार्धमेका निशेव।
न तु सुरतरसस्यच्छिन्नतृष्णो बभूव,
ज्वलन इव समुद्रान्तर्गतस्तज्जलौघैः॥

पलकान्तर विरह भी दोनों को असह्य है। शिवजी संध्या-कर्म को अनिवार्य मानकर जब पार्वती से अलग होते हैं – तब पार्वतजी इतना नाराज हो जाती हैं कि वापस आने पर बात नहीं करतीं। दूसरी ओर–

स प्रियामुखरसं दिवानिशं हर्षवृद्धिजननं सिषेविषुः।
दर्शनप्रणयिनामदृश्यतामाजगाम विनयानिवेदितः॥

दिन-रात प्रियतमा के हर्षप्रद अंधेरों का रस पीने के इच्छुक शिवजी की ऐसी दशा हो जाती है कि विजया द्वारा दर्शनार्थ आए हुए अपने प्रियजनों का समाचार पाकर भी बाहर नहीं निकलते थे। इस प्रकार सुरत-सुख के प्रति उनकी तृष्णा कभी छिन्न होती ही नहीं थी– ठीक वैसे ही जैसे बड़वानल की आग समुद्र की अथाह जलराशि से भी शान्त नहीं होती। शिवजी के इस प्रकार पार्वती के साथ दिन-रात-क्रिया करते हुए सैकड़ों ऋतुओं को इस प्रकार बिता दिया जैसे वह एक रात्रि की ही अवधि हो।

यह वही कालिदास हैं जिन्होंने दुष्यन्त शकुन्तला के संभोग को 'मुखमुन्नमितं न चुम्बिनन्तु' – इस शालीन स्तर तक ही रखा है। चाहे अन–इन्दुमती हों, पुरूरवा–उर्वशी हों या मालविका-अग्निमित्र। सर्वत्र संभोगशृंगार का प्रसंग है – पर कहीं भीशृंगार का यह उद्दाम और उद्‌वेल ग्राम्य स्तर लक्षित नहीं होता। शिव-पार्वती के इस अविच्छिन्न सुत-युद्ध में अधोरेतस् संभोमृंगारियों की भाँति क्षरण नहीं हुआ। यह तो तब किया गया जब देवताओं की ओर से भेजे ग्रए कबूतर वेषधारी अग्नि ने प्रार्थना की।

ऐसी स्थिति में यही कहा जा सकता है कि यह ऊर्ध्वरेतस् का द्विधा विभक्त होकर आत्मरमण है– यही वह काम था जिसके लिए 'योगिनामग्रगण्य' शिव ने भी तपस्या की थी– यहाँ शिव समाधिस्थ हैं और ये व्यापार महोल्लास के व्यञ्जक हैं। इस संभोग तस्याः कर्त्र्याः स्वतन्त्रायाः भोग्यैकीकर एव सः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स एव भोगः सा मुक्तिः तदेव परमं पदम्।। लय की अर्थवत्ता इसी मुक्ति-मुक्ति प्रदान में है।

केनापि कामेन तपश्चचार

पार्वती की अरूपहार्य चारुता' को मन में रख किया जाने वाला अर्थवत्ता- पर्यवसायी तप इसी लक्ष्य की पूर्ति के लिए था। जब दोनों का लक्ष्य यही है - तो उस फल का वर्णन इस तन्मयता के साथ प्रतीक रूप में क्यों न हो? इस दृष्टि से सोचने पर तो यही लगता है कि 'कुमारसंभव' को अष्टम सर्ग तक ही होना चाहिए।

श्रृंगार की इस पारमार्थिक धरातल पर होने वाली अन्वर्थता की वार्ता को आगे बढ़ाते हुए जब हम जयदेव के गीत-गोविन्द की ओर बढ़ते हैं- तब इनके संभोग्श्रृंगार वर्णन का अनुभव और रति-प्रसंग के कार्यकलाप को और भी अधिक शास्त्रीय विधि-निषेध की परिधि का अतिक्रमण पाते हैं। पण्डितराज की प्रतिक्रिया देखी ही जा चुकी है। वहाँ तो कामवासना और क्षरण के सन्दर्भ भी आए हैं। ऐसे में यह प्रश्न सहज ही अनधिकारी आलोचकों से पूछा जा सकता है कि क्या ये रचयिता अपने आराध्य कीश्रृंगारिक वृत्ति को ग्राम्य स्तर तक ले जाना चाहते थे? क्या ये उन्मादग्रस्त और अविवेकी थे? रास का प्रसंग उच्छृंखल आयोजन है? गीत-गोविन्द की कई ऐसी पंक्तियाँ हैं जिन्हें एकान्त में पढ़ा तो जा सकता है, पर दूसरे को सुनाया नहीं जा सकता। देखें-

विगलितवसनं परिहृतरसनं घटयज घनमपिधानम्।
किसलयशयने पङ्कजनयने निधिमिव हर्षनिदानम्।।

श्रीकृष्ण के प्रति मानिनी राधा को अनुकूलन करती सखी कह रही है-"हे पङ्कजनयने, नवपल्लवरचित शय्या पर तुम स्वयं निर्वस्त्र या नंगी होकर बाधा पैदा करने वाली करधनी को भी स्वयं उतार दो और हर्षप्रद निधि रूप अपने जघन प्रदेश को समर्पित करो।" विपरीत रति या पुरुषायित प्रसंग तो प्रायः आता रहता है। अन्यत्र राधा-माधव-सम्मिलन के अवसर पर राधा स्वयं निवेदन करती हैं-

सरसघने जघने मम शम्बरदारणवारणकन्दरे।
मणिरसना भरणनि शुभाशय! वासयसुन्दरे।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जयदेव शृंगार को इस ढंग से व्यक्त कर चुके हैं। अपने आराध्य के संभोग-वर्णन में ऐसा क्या हो गया कि उसके प्रकाशन में आलोचक आचार्यों को ग्राम्यत्व-दोष तक दिखाई पड़ने लगा। उसके क्षालन में 'शक्ति' की दुहाई देनी पड़ी? जयदेव तो चार कदम और आगे बढ़ गए हैं। उन्होंने तो राधा को निर्वस्त्र, रसनाविहीन होकर जघन को अनावृत रखने तक का प्रस्ताव करा दिया। स्वयं राधा कह रही हैं– "हे भगवन्, आप मेरी सुन्दर कामदेवरूपी हाथी के निवासभूत कन्दरा के समान चिकनी और मोटी जाँघों को मणि, करधनी, वस्त्र तथा आभूषण से समलंकृत करें। ऐसे कितने विवरण ग्राम्यत्व दोष से भरे पड़े हैं। फिर भी जयदेव की भक्ति का भाव-सूत्र कहीं से विच्छिन्न होता प्रतीत नहीं होता। वे द्वादश सर्गों के अन्तर्भूत हर प्रबन्ध में पाठक को भक्ति-भाव के प्रति अगाह करते चलते हैं। देखें–

श्रीजयदेववचसि रुचिरे सदयं हृदयं कुरु मण्डने।
हरिचरण स्मरणामृतनिर्मितकलिकलुषज्वरखण्डने॥

अर्थात् श्री भगवान् के चरणों के स्मरणरूपी अमृत के द्वारा जिन्होंने कलि के पापरूपी ज्वर को विनष्ट कर दिया है– उन श्री जयदेव की वाणी को अलंकृत करने में अपने हृदय को सदय बनाएँ। उनकी दृष्टि में यह सारा संभोग का प्रकरण चरण-स्मरणामृत है।

संस्कृत भाषा से हटकर हिंदी भक्ति साहित्य में भी परमार्थ के स्तर पर आराध्य देव-देवी का संभोग-वर्णन इसी रंग का मिलता है। सूरसागर में भी भक्ति की और रूपों की अपेक्षाशृंगार के दोनों पक्ष - संभोग और विप्रलम्भ - औसतन अधिक अभिनिवेश से प्रस्तुत हुए हैं। एक पद बालकृष्ण से सम्बद्ध देखें–

नीवी गही यदुपतिराइ।
कर सरोज श्रीफल पर पड़ गए, त्यों जसुमति गह आइ।

इनसे पूर्व सूफी सन्त जायसी भी हैं– जहाँ पद्मावती और रत्नसेन को परमेश्वर और उपासक (माशूक और आशिक) के प्रतीक रूप में रखा गया और सातवीं मंजिल – वस्ल – पर संभोग-वर्णन इन्हीं रंगों में दिया गया है।

टूटे अंग अंग सब भेसा। छूटी माँग, मंग मये केक्षा।
कंचुकि चूर, चूर मइ तावी। टूटे तार, मोती छहरानी॥
धारी, टौण ससोनी टूटी। बाहूँ कंगन कलाई फूटी।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चंदन अंग छूट अस मेरी। वेसरि टूटि, तिल कंगा मेरी

—पदमाधन

चैतन्य सम्प्रदाय के गोस्वामी बन्धुओं द्वारा प्रणीत 'उज्ज्वल नीलमणि' भी शान्त, दास्य, सख्य, वात्सल्य से ऊपर माधुर्य भाव या उज्ज्वल रस का शास्त्रीय पक्ष रखते हुए कहता है—

गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः।

कारण, **क्रिया सर्वापि सैवात्र परं कामो न विद्यते।**

रसिक सम्प्रदाय की रचनाएँ अनधिकारियों के हाथ न पड़ जायँ – अतः उन्हें तिजोरियों में बंद करके रखा जाता है। इन सबको देखकर मेरा निष्कर्ष यही है किश्रृंगार व्यावहारिक काव्य या व्यवहार जगत् के औचित्य मण्डित काव्य एवं परमार्थ धरातल के औचित्य-अनौचित्य की पहुँच से ऊपर ऊर्ध्वतस्क आराध्यों का शृंगार – दोनों में अपनी अन्वर्थता पारमार्थिक स्तर पर ही प्राप्त करता है। यहश्रृंगार भोजराज, अग्निपुराण तथा शारदातनय जैसे काव्यशास्त्रियों केश्रृंगार से भिन्न प्रकृति का है। कालाध्यात्मक रसिक इन और ऐसी क्रियाओं के माध्यम से उस आन्तरिक महोल्लास की वर्णनमतिक्रान्त अभिव्यक्ति करता है। जो ऊपर के अनुभावों तक ही रह जाते हैं— वे अनधिकारी हैं।

शृंगार शब्द यौगिक भी है और रूढ़ भी। प्राकृत प्रसंग में योगशक्ति काम करती है और अप्राकृत प्रसंग में रूढ़ि। प्राकृत के अन्तर्गत लोक भी आता है और काव्य भी। लोक में काम शिव को अशिव भी बना सकता है— यदि शुक्र क्षुब्ध से उत्तेजित दशा में आकर असंयत ढंग से क्षरित हो जाय।

शृङ्गं हि मन्मथोद्भेदः तदागमनहेतुकः।
उत्तमप्रवृतिप्रायो रसः श्रृंगार इष्यते॥

शृङ्गम् ऋच्छति इति शृङ्गारः। शृंग का अभिप्राय है (कामुक युगल के उत्पीड़क) कामाविर्भावक। और शृंगार का अभिप्राय है— उसका जो इस प्रकार के कामोद्भेद से संभूत हो। इस रस के आलम्बन प्रायः उत्तम प्रकृति के ही प्रेमीजन हुआ करते हैं। (सत्यव्रत सिंह)

harmonizing both the configuration and content, and, secondly, replaced contents operate the conditioned variants of formal structure very accurately. In fact, in Anandavardhana's idealization of the terms explicated sequence forms almost an universal form within and outside the conceived formation and is an example of how theoretical principle could be motivated to understand the very basis of purported concrete universal. The event of Dhvani begins through modification of creative principle on account of intended conceptualization of primary models and categories and as we have seen Sabda constitutes an important step in establishing a method of correspondence for this purpose. The progress of Sabda as factor in reviving primitive rationality has certain important relative characteristics. For examples, it tends to revive the semantic configuration both on account of direct assertion and implied assertion hence brings about accumulation of contents in a prefixed and predetermined order obviously the consequence of creation of hierarchical situation in which authority of independence in generating a motive of transformation really becomes very unique. For the matter of that the intensive enactment of interacted propositions bring the whole circumstance of creation possible. There can be, at least, an authority of method involved in this. In the first place, approval of contents through organic sequencing of motive and linguistic codes places the value of configuration on the side of developed conjunction. This manner of approaching a full-scale completion of requirements attending the creation of an absolute is remarkable and noticeable. The intensity of presenting a scheme of modification has the reality of high imaginative perception for this reason when the contents of language are open via a series of divisions intending complete correlation or assortment, the ideal form is already imminent. The formal feature of content in such a projective inception of language contents is to be seen in the context of extension of concentration with a unity in intellection. The beginning of the situation is assured in a complete motivation of the intellectual function through a universal medium generated in the language content therefore performance of function of intellection is optimum in linguistic equivalent. The point is now substantially established that Dhvani has a definite function to induct a complete reorganization of elementary form obtained in language and experience hence each is rendered purer and purer till each is finally become exceptionally idealized. In the following verses, the conviction is carefully committed to the intensity of graduation of an object into event:

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

I wander thro' each charter'd street
Near where the charter'd Thames does flow,
And mark in every face I meet
Marks of weakness, marks of woe

In every cry of every man,
In every Infant's cry offear,
In every voice, in every ban,
The mind forg'd manacles I hear

How the chimney—Sweeper's cry
Every black'ning Church appalls;
And the ha less Solider's
Runs in blood down Palace walls.
ost thro' midnight streets I hear
How the youthful Harlot's curse
Blasts the new-born Infant's tear
And blights with plagues the Marriage hearse.

[William Blake, The Chimney Sweeper]

These verses intend a motive for interfunctional assortment of concentrated deviance generated through an implied inverse of the resolution hence classification of experience is proposed with a necessity of transformation at every turn of intensity. The poet urges the imminence of purity and rationality (wander) yet distributive and classificatory index of conjunction overturns the methods of inquisition via oppositional aberration (Cry/Man; Infant/Fear; Ban/hear; Church/ blackening; Solider wall; Marriage/plague). The strength of inquisition is primarily an important feature in upholding the validity of deferring the loss of ratiocination and for this reason 'every' turns out to be Vivakshita (the highest order of reasonableness) and accordingly the form of classification and the act of distribution are finally the synthesis of transformation of classificatory distribution into functional and conjunctive codes (for example, 'I wander' is rinci al instrument and attending conjunctions in the form of cry, man, infant, fear, voice, ban, hear, chimney-sweeper, appall church, blackening, Solider, Palace, Harlot, Marriage constitute the evidences in distributive deviance yet, on account of, assured principality, the final transfermotion is accomplished (mark in every face I meet/marks of weakness, marks of woe). The verses im licate a method of assertion through com osition of experiential situation for this reason every word is realized ('I hear') felt ('How the') and idealized ('But most'). Such a comprehensibility

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

is extraordinary and suggests a progression in the manner of Dhvani.

III

In structuralist poetics, on the other hand, the generative function is held to be situated in the contents, constructs and categories (syllables, words, letters, sentence, paragraph, thought, experience imagination and the like) for that matter, it suggests that the function of language is to put-up a definition for different relations and interrelations that are found to be existing as a rule in any given situation. For this reason, the position of language should be elevated so as to constitute a hierarchy. It is, almost, like saying that a house has relevance only in so far as it has a structure defined by the roof, the wall, the plinth, plaster, paint so on and so forth. Saussure extends this idea and suggests that conceptual effects in language must absolutely be created through a categorization in which speech and writing would be predominantly effective. For the purpose, language becomes heterogeneous mass of s eech or utterance and each utterance is specifically recorded through a definite sign system. The further division of writing would reveal that the word that has come to have its stay in the system of language only through its subscription to the largest body of ethical codes is to be called Langue. Similarly, the effect of linguistic ethics found in langue are issued through certain practical circumstances to be called Paroles and to inter ret the situation one can return to earlier example. The existence of room comes to be justified on account of the existence of wall, ceiling, plinth, painting and the like. Langue is almost like a room and parole is one of the attributes of the room like painting, laster so on and so forth. To sustain the meaning of parole, there must be a correspondence through the generation of exact value and approximate value in a word and subsequently each parole would give rise to independent sound system, and, on combination, these differentiated sound systems would bring about a concept for themselves. The manner in which each sound system comes to have its existence for the sake of a value or concept would be called sign and signifier. Prospective value of the sounds leading to the creation of concept would become signified. Each sign and each signifier and each signified will be in a state of modification till the final system emerges. The consequence so effected would become the subject of comprehension in the manner of long historical process of change, adjustment and modification and on this account signifier and signified will absolutely disperse themselves through synchronic (stationary) and diachronic (changing) features of the linguistic situation. When we look at the scheme of interpretation proposed by Saussure we find

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

that Saussure speaks of consistent, progressive, assorted and assured evolution of the content of language. There are two different ways in which we can approach an understanding of the situation. In the first place, the evolutionary contents create an enrichment of the linguistic forms and accordingly assign relative correspondence by confirming set of values for the appropriate sequence of the events accomplished through the modification of primordial contents. In the second place, the multiple cohesion of acquired contents constitute a methodology of progressive assertion hence these ensure a preparation of large-scale additive effect of an idealization of the whole situation. In this circumstance, the structuralist method would obviously include the following projective function for language :

A. Formative Contents

B. Primary Category of Synthesis

C. Primary Model of Convergence

D. Synthesis through Evolutionary Principle

In the formative orientation of the contents, the linguistic parts present a concentration of actual assertion and therefore the words, letter, syllables and the sentences are moved to a rather specific direction so as to create wholesome meaning. Interpretive consequence of formation of words and meaning is absolutely systematized through regular inversion in as much as linear correspondence between a concept motivated word and value situated meaning is first dispersed and only secondarily associated. Jakobson, for example, observes of the situation :

> ***The supremacy of poetic function over referential function does not Obliterate the reference but makes it ambiguous The double sensed message find correspondence in a split addresser and besides in a s lit reference.***
>
> [Linguistics & Poetics]

The function of presentation forms a continuity and obtains a qualitative value yet reorganization of value does not command a sequence in either individual or multiple assertion. Jakobson, therefore, finds a worth in recruiting interactive terms for movement of content for the sake of conjunction. It must be understood that displacement of content towards medium and context is approved through the principle of reassertion at coordinates obtained at the beginning hence throughout the spatial motion conducted by the contents. is

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

comprehended other hand.

In Dhvani, on the other hand, intentional inference is concentrated in organization of qualitative excellence of synthesis of both the words and meanings via inter-differentiation of constituents like letters and syllables. To this extent, the intensity of artistry is maximum Anandavardhana intends the formation of effective attitude for the sake of conformity of ideal fact to ideal content:

रक्षक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत्।
अपृथग्यत्ननिर्वर्त्यः सोऽलङ्कारो ध्वनौ मतः॥

(II, 15-16,58)

It would mean that transformation of actual content into preferred content would presuppose a conditioned equivalent through wholesomeness of emotive as well as linguistic forms accordingly words, letters, syllables, sentence would obtain absolute totality of enrichment by reci rocal purification. In structuralist system, the quality and action of synthesis is

Implicit and apropriately assorted through conjunction and association. The movement of the content along morphological or semantic margins tend to develop a value-unit in realistic/forms in the moving content and attract realized figures lying in both vertical and horizontal direction for this reason, the scale of association generates a cyclical intensity to resolve an artistic emotion into its assertive form. Saussure considers the fact through inquisitive perception and states:

> ***Language is a system of independent terms in which the value of each term results solely from simultaneous presence of the others.***

[Course, 114]

Saussure is emphasizing the equality of relative terms holding a virtue of measurable proportion for the sake of addition, and for that matter, acquisition of equivalent becomes definitely a normative event created in the language. The act of inception in language has a formative approval therefore each unit (let us say a letter or syllable) acquirs a figure or preposition only because of the fact that its primitive and present injunction carries de novo conceptual equivalent.

The consequence of addition purports a necessity of preferential, motivated and effective condition of addition and all the minor and major variants of syllabic and structural function of a word or a sentence

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

should subsume an authority of predominance. It is, with this motive, in structuralist poetics, ideational formation is inclined towards an achievement of strength in meaning. Jakobson could merit the logic of intention by appropriately intending a sequence of conviction and sequence of judgement for the evolving word:

> ***The poetic function projects the principle of equivalence from the axis of selection into the axis of combination.***

[Linguistics & Poetics, 39]

The Presumptive effect of reinvention of the meaning will have a more firm and more actual interpretation should the classification of intensity of artistic function be achieved along the lines of expressi ve contents, context and the medium, the convergence of perceived and received interaction amongst the units would almost be concretized:

असंलक्ष्यक्रमोद्दयोतः क्रमेण द्योतितः परः।
विवक्षितभिद्येयस्य ध्वनेरात्मा द्विधा मतः।।2।।

(II, 2-3, 40)

The intention of enrichment, act of assertion and the manner of indicating ideal conditions of reorganization are some of the imminent situations through which utility of exact poetic content is substantiated. The precise meaning, for that matter, will have two fold associative functions in that it will generate higher structure of concentrated significance (विवक्षित) and lower structure of marginal significance (अभिधेय). Anandvardhana includes the possibility and truth of reception of contents through acquired and generative evolution hence the creation of ideal artistic situation would obviously be a realistic motive.

IV

In structuralist tradition, the content mutation of signifier by an observer and the object displaces the strength of enrichment by an equal margin as it was felt and observed by primitive association, for this reason, quality of conjunction is appropriately purposive and exceptionally active. This is the way to invite attention to the fact that intensity of contents dislocate the principal virtue of correspondence to establish an act of complete transmutation.

The empirical condition of the assertion are evident in the following poetical verses:

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ग्रोवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
पश्चार्धेन प्रविष्टः शरतपतभयाद् भूयसा पूर्वकायम्।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रे प्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रदाति॥ 7॥

(Kalidas, Abhijnansakuntalam Act 1)

Supposed indivisibility of expanding sign inverts the position of event and resolution hence each has a maximum time to enrich itself. The king, in the above verses appears as a fact of temporal addition to the truth while fawn that is running chiefly merits as a surplus motive of infinites and, on that account, the poet is finding superabundance of movement, motion displacement yielding strength to their binary opposites. For example:

ग्रीवाभङ्गाभिराम मुहुरनुपतति स्यन्दने दत्तदृष्टिः/पश्चार्धेन प्रविष्टः शरतपतनभयाद् भूयसा पूर्वकायम्।

Suggest, that appearance (of a fawn) and reality (the pursuit of fawn by the king ending hopelessly in the disappearance of a fawn) are unequal yet could create the truth (श्रमविवृतमुखभ्रंशिभिः) by mutual division (व्यातत्वाद्धियति, स्तोकमुण्र्या) The fact draws the attention as to how the natural intersection is forthrightly conceived through both combination and selection, for example,

ग्रीवाभङ्गाभिराम (A) = मुहुरनुपतति (A^a)

शरतपतनभयाद्भूयसा

(fawn) Aa पूर्वकायम (Ab)

A (truth of association)



A^b (king)

It must be understood that intra transmutation of a truthful perception projects convergence through syntagametic forms, for example (the neck of a fawn forming exemplary site for possible efforts in the pursuit of hunting) and yields to the terms of meaning throug disappearance, loss of beginning inception of a new event, association for greater action through the following scheme :

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ग्रीवाभडगाभिराम (A) = मुहुरनुपतति (A^a)
शरतपतनभयाद्भूयसा (A^b)
श्रमविवृतमुखभ्रंशिभि: (A^c)
बहुतरं (A^d)
स्तोकमुर्व्यां प्रयाति (A^e)Z

ग्रीवाभङ्गाभिराम is a principality of noteworthy signification consecutively effective in its associative parts, for this reason, the process of evolution through syntagametic and paradigmatic figuration in the manner of $A=A^a+A^b+A^c+A^d$ . . . . An) and [$A = A^a A^b A^c A^d A^e$] become actually affirmative.

V

In Dhvani system and the Structuralist poetics, the condition of transformation is basically and mainly generated through cognition, correlation, proposition, modelisation and the positional changes of the primary models and primary categories. In Dhvani, the entire scheme of change of an object into event is accomplished through the creation of categories by conjunction and universalisation, specific concentration, contextual modelisation and content specific reorganization leading to the creation of concrete universals. While on the other hand, in Structuralist poetics, the scheme opted for resolution lays an emphasis on rediscovery of pre-existing contents, models and categories and in that way creates unique assertive position. As for as aspects of poetic comprehension and conceptualization is concerned, we can have greater affinity and correspondence between the systems in that the comprensibility of an artistic situation suggested by Dhvani and Structuralist poetics could be finally summed up by quantifying the coordinates obtained in the functional categories they give rise to. In Dhvani, for example, the universalization of synthesis by complete transformation of the categories is obtained in the following manner.

$$\Sigma = a^n + b^n + c^n + d^n \ldots Z^n$$

Where (Σ) is the absolute of synthesis and independent variables in the form of a, b, c, d, ...z open up a possibility of complete emichment (n) till infinity Similarly, in Structuralist poetics, the function of modification of content is suggested by the following equation

$$\delta = a' + b' + c' + d'$$

Here the synthesis and change of an object into event is primarily rooted in the discovery of first universal and practically, at that, the process of refinement converges to yield the results.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

VI

The generation of nature, form, and function of resolution of the categories in Dhvani and Structuralist poetics intend a variation in the manner of causative rationalistion and speculative intention of the participating models and categories. In Dhvani, the configuration of the resolution of object into event is universalized through a greater and larger association with the attending variables (for exam le, let us say, Bhava, corresponds to complete linguistic modification while in Structuralist poetics, the principles of evolution of language into meaning is best felt and described in the speculative semiosis of linguistic and emotive forms. This, of necessity, would constitute the structure of affinity between the procedural enrichment of form and content in these two systems.

1. Indian critical tradition lays an em hasis on gradual, cumulative and assorted evolution of language into meaning hence in Dhvani the configuration of evolution is conceived along the attributive excellence of the categories. It is obviously an intentional/rational/ s eculative benefit to the poet who could workout the scheme of division and association within the system and outside the system. Bhava, for example, o ts for an emichment in nearly all the em irical categories beginning with Sthayibhava, Vibhava, Anubhava, Sancaribhava, Sabda, ada and Vakya. Once the rocess of evolution begins, it acquirs both simultaneous and invented share. For further discussion see.

Dhvnyaloka of Anandavardhana. Ed. K.Krishnamoorthi (Motilal Banarasidass: New Delhi, 1985)

Locana of Abhianavagu ta. Ed. Jagannath athak. (Benares: Chowkhambhas Sanskrit Sansthan, 1960)

Kavyaprakash of Mamata. Ed. G.N. Jha (New Delhi: Bhantiya Vidya Bhavan, 1922)

Abhijnansakuntalam of Kalidas, Ed. M.R. Kale. (New Delhi: Motilal Banarasi class, 1966.)

Sahityadarpan of Vishwanath. Ed. Pandit Salgram Sastri. (Benares / Delhi: Motilal Banarasidass, 1955)

Kavyamimamsa of Rajsekhar. Ed. Kedarnath Sarma. (Patna: Bihar Rashtrabhasa Parishad, 1955)

Vakyapadiya of Bhartrhari. With the Commentary Ambakarti by. Raghu natha

Sarma, Part I, II and III. (Varanasi: Sanskrit Vishwavidyalaya, 1951)

1. European structuralist poetics confirms a motive for an exact, systematic and appropriate configuration of language and meaning through their content(s) and medium. In languages, it is believed that the method of reaffirmation, interaction, injunction and conjunction qualify a term of

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

correspondence and reappear by the virtue of positional/cognitive relationship between signifier and signified For a further discussion on the subject sec.

Roland, Barthes. 'Action Sequence' Patterns of Literary style, ed. J. Strelka, (Pennsylvania State Univ. Press, 1971), pp. 5-14.
———. Elements of Semiology, (Ca e, 1967.)
———. Style and its Image, in Literary style: A sym osium, ed. S. Chatman, (Oxford, News York.)
———. To write: An Intransitive Verb, in The Languages of Criticism and the sciences of Man, ed. R. Macsey and E.Donato. (John Hopkins press, Baltimore, 1970), pp. 130-145.
B. Bloch. Outline of Linguistic Analysis, (Waverly, Baltimore, 1942.)
Jame A. Bvon From Symbolism to Structuralism: Levi- in a Literary Tradition, Blackwell, (Oxford, 1972.)
Noams Chomsky, As ects of the Theory of Syntax, (MIT, Campbridge, Mass, 1965.)
———Syntactic Structures, Mouton, (The Hague, 1957.)
Roman Jakobson. The Grammatical Texture of a Sonnet from Sir Philip Sidney's 'Arcadia', in Studies in Language Literature in Honour of M.Schlauch, (Polish Scientific Publishers Warsaw, 1966), pp. 165-73.
———Linguistics & Poetics, in Style in Lanuage, ed. T. Sebok, (MIT Press, Cambridge, 1960), pp. 350-77.
———Selected writings, Mouton, The Hague, Vol I: Phonogical studies 1962; Vol II Word and language, 1924.
Fredric Jameson. The Prison House of Language. A Critical Account of Structuralism and Russian Formalism (rinceton University Press, 1973.)
Jacques Derrida of Grammatology, (Minuit : Paris. 1967)
———of Dissemination, (Sevil: Pais)
———The writing and Difference, (Seufil : Paris, 1967)
———Margins of Philoso hy, (Minuit : Paris, 1972)
Michel F ocault The Archeology of knowledge. (Patter : Tavistock, 1972.)
Ferdinand de Saussure : The Course in General Linguistics (London: Fontana)
The Complete Poetry of William Blake. Ed. With Introd. Robert Sillimen Hillyer (New York: The Modem Library, 1941)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

correspondence and reception by the virtue of positional/relative relationship between signifier and signified. For a further discussion on the subject see.

Fowler, Roger, "Again, Sequence," Essays of Literary style, vol. I, [illegible], (Pennsylvania State Univ. Press, 1971), pp. [illegible].
——— Elements of [illegible] (O.U.P., 1967).
——— "[illegible] to [illegible] in Literary style: A new [illegible], ed. [illegible] (Chatman, Oxford, New York).
——— [illegible]: An [illegible] Note", in The Language of Criticism and the sciences of Man, ed. R. Macksey and E. Donato, (John Hopkins [illegible], 1970), pp. [illegible].
[illegible], [illegible] of Linguistic Analysis, (Poetry, Baltimore, 1972.)
[illegible], [illegible] Symbolism in [illegible] Text" in [illegible] ([illegible]), Blackwell, (Oxford, 1962).
[illegible] of the Theory of Syntax, (MIT, Cambridge, [illegible]).
——— [illegible] Structures, Mouton, (The Hague, 1957).
[illegible], The Grammatical Texture of a Sonnet from Sir Philip [illegible] in Studies in Language Literature in Honour of [illegible], Scientific Publishers, Warsaw, 1966), pp. [illegible].
——— Linguistics & Poetics, in Style in Language, ed. T. Sebeok, (MIT Press, Cambridge, 1960), pp. [illegible].
——— Selected writings, Mouton, The Hague, Vol. I, Phonological studies 1962; Vol. II Word and language, 1971.
Fredric Jameson, The Prison House of Language: A Critical Account of Structuralism and Russian Formalism (Princeton University Press, 1972.)
[illegible], Of Grammatology, (Minuit: Paris, 1967)
——— Dissemination, (Seuil, Paris).
——— The Voice and Phenomena, (Seuil, Paris, 1967).
——— Margins of Philosophy, (Minuit, Paris, 1972).
Michel Foucault The Archaeology of Knowledge, (Paris: Tavistock, 1972.)
Ferdinand de Saussure, The Course in General Linguistics, (London, Fontana)
The Complete Poetry of William Blake, Ed. With an Introduction, Hilliar (New York, The Modern Library, 1941)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रिक्थ:

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कौण्डभट्टविरचिता
न्यायपदार्थदीपिका

सम्पादकौ
डॉ. हरेराम त्रिपाठी
श्री रामसुदर्शन मिश्र
सहसम्पादक:
श्री कृष्ण मुरारी मणि त्रिपाठी

CC-0. Nepal Sanskrit Academy, Kathmandu Collection





प्रथमान्तिमपृष्ठयोः मूलपाण्डुलिपिः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भूमिका

आस्तिकदर्शनेष्वन्यतमं वैशेषिकदर्शनं विद्यते। तत्र द्रव्यगुणकर्मसामान्य–विशेषसमवायाः एते षड्भावपदार्थाः सप्तमः अभावश्चेति सप्तपदार्थाः भवन्ति। यद्यपि पुरुषार्थचतुष्टयेषु मुख्यः पुरुषार्थः मोक्षो विद्यते। तस्य प्राप्तिः षड्भावपदार्थानां साधर्म्यावैधर्म्याभ्यां[१] तत्त्वज्ञानात् भवति। अत एव षड्भावपदार्थानां सर्वप्रथमं साधर्म्यमुच्यते। वैशेषिकसूत्रस्य भाष्यकारः प्रशस्तपादाचार्यो वदति षड्भावपदार्थानां साधर्म्यन्तु (समानो धर्मो येषां ते सधर्माणः तेषां भावः साधर्म्यम्) अस्तित्वम्, अभिधेयत्वम्, ज्ञेयत्वञ्च[२] भवन्ति। अस्तित्वशब्दस्यार्थः स्वरूपमिति वस्तूनां स्वासाधारणरूपमेव अस्तित्वपदार्थः। तच्च द्रव्यादिषड्पदार्थेषु तिष्ठति। अभिधेयत्वशब्दार्थः अभिधानम्, अर्थात् शब्दात् कथनस्य क्षमता, तदेवापि वस्तुनः स्वरूपमेव ज्ञेयत्वं नाम ज्ञानविषयत्वम्, तच्चापि वस्तुनः स्वरूपमेव[३] भवति। उदयनाचार्यमते अस्तितत्वं नाम विधिमुखप्रत्ययविषयत्वम्[४]। विधिमुख–प्रत्ययशब्दार्थस्य अनुसन्धानकरणे सति स्थूलदृष्ट्या भावत्वप्रकारकज्ञानमेव लभ्यते। तथा च द्रव्यगुणकर्मसामान्यविशेषसमवायेष्वन्यतमेषु पदार्थेषु भावत्वप्रकारकज्ञानविषयत्वं तिष्ठति। अतः लक्ष्येषु लक्षणगमनात् नाव्याप्तिः अथ च अलक्ष्ये अभावे नातिव्याप्तिः तच्च भावत्वप्रकारकज्ञानविषयत्वाभावात्। यदि भावत्वमेव अस्तित्वस्य स्वरूपं तदा तस्य निर्वचनं न कर्तुं शक्यते। यतो हि कस्यचिद् पदार्थस्य अस्तित्वं यदि तस्य भावत्वरूपमभविष्यत् तर्हि "घटाभावोऽस्ति इति वाक्यात् जायमानं घटाभावस्य अस्तित्वं घटाभावस्य भावत्वस्वरूपं स्यात्। तन्न समीचीनमिति। प्रशस्तपादाचार्येण अस्तित्वस्य द्रव्यादिषड्भावपदार्थानां साधर्म्यं स्वीक्रियते। फलतः यः धर्मः अभावे तिष्ठति स च न अस्तित्वपदार्थः इति। अतः अस्तित्वपदार्थः न विधिमुखप्रत्यय–विषयत्वमिति। अपि तु प्रतियोग्यनपेक्षनिरूपणत्वमिति। द्रव्यतः आरभ्य समवायपर्यन्तं षड्भावपदार्थाः प्रतियोगिनः अपेक्षां विनैव ज्ञानस्य विषयाः भवन्ति। परन्तु अभावपदार्थः प्रतियोगिनः अपेक्षां कृत्वा ज्ञानस्य विषयो भवति। इति चेन्न प्रमेयमिति ज्ञाने षड्भावपदार्थानामिव अभावोऽपि विषयो भवति। अतः अस्तित्वपदार्थः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रतियोग्यनपेक्षनिरूपणत्वमित्यपि न भवितुमर्हति। अस्तित्वपदार्थं प्रकाशकारो वदति समवायभिन्नत्वे[५] सति गुणत्वशून्यत्वे सति निर्विकल्पकविषयत्वमिति। उक्तनिर्वचनानुसारं समवायभिन्नत्वविशिष्ट गुणत्वशून्यत्वविशिष्टनिर्विकल्पकज्ञाना–विषयत्वविशिष्टसविकल्पकज्ञानविषयत्वाभाव एवास्तित्वमिति। उक्तास्तित्वपदार्थः विशिष्टाभावरूपो विद्यते। विशिष्टाभावस्य कृते कस्यचिद् विशेषणस्य अभावः वा विशेष्यस्य अनुपस्थितिरेव पर्याप्तं भवति। उक्तस्थले समवायगुणत्वनिर्विकल्प–कज्ञानविषयतासु कस्यचिदेकस्य विद्यमानत्वादेव सविकल्पकज्ञानविषयत्वाभावस्य सत्त्वात् विशिष्टाभावः भवितुमर्हति। उक्तास्तित्वपदार्थे समवायभिन्नत्वपदानुपादाने समवाये गुणत्वशून्यत्वेन निर्विकल्पकज्ञानाविषयत्वेन सहैव सविकल्पकज्ञानविषयत्वस्य सत्त्वात् सविकल्पकज्ञानविषयत्वाभावस्वरूपस्य अस्तित्वस्य तत्रासत्त्वाद–व्याप्तिर्सम्भवति। गुणत्वशून्यत्वपदानुपादाने ज्ञानेच्छाकृत्यादीनां सविषयकानां गुणानां विषयाविशेषितज्ञानं न भवति। अर्थात् विषयसम्बन्धरहितं तेषां गुणानां ज्ञानं न भवति। अतः ज्ञानेच्छाकृत्यादीनां गुणानां निर्विकल्पकज्ञानाविषयत्वं सिद्धमेव। तत्र समवायभिन्नत्वमपि विद्यते, उभयविशेषणयुक्तत्वात् सविकल्पकज्ञानविषयत्वस्वरूपस्य विशेष्यस्य ज्ञानादीनां सत्वात् विशेषणविशिष्टविशेष्याभावस्वरूपस्य अस्तित्वस्यासत्त्वादव्याप्तिः तत्रापि भवितुमर्हति। निर्विकल्पकज्ञानाविषयत्वस्यानुपादाने द्रव्यमात्रेऽव्याप्तिर्दुर्वारैव। अतः प्रकाशकारमते समवायभिन्नत्वे सति गुणत्वभिन्नत्वे सति निर्विकल्पकज्ञानाविषयत्वे सति सविकल्पकज्ञानविषयत्वाभावत्वमस्तित्वस्य लक्षणं भवति। उक्तास्तित्वलक्षणस्य विशेषपदार्थेऽव्याप्तिर्दुर्वारैव, यतो हि वैशेषिकसिद्धान्तानुसारं विशेषस्य अतीन्द्रियपदार्थत्वात् निर्विकल्पकविषयत्वं तत्र न सम्भवति। अतः उक्तलक्षणं समीचीनं न प्रतिभाति। अत्र रुचिदत्तः उक्तवान् अतीन्द्रियभिन्नत्वे[६] सति गुणत्वाभावसमानाधिकरणत्वे सति सविकल्पकमात्रविषयभूतपदार्थविभाजकोपाधिशून्यत्वमस्तित्वस्य लक्षणमिति। सूक्तिटीकाकारनये भावत्वविशिष्टस्वरूपसत्त्वमेव अस्तित्वस्य स्वरूपमिति। सेतुटीकारनये अभावाविशेष्यकज्ञानविशेष्यत्वमेव अस्तित्वमिति। न्यायलीलावतीकारनये सत्तासम्बन्धबुद्धित्वमेव अस्तित्वस्य लक्षणं भवति। अस्मिन् मते आरोपानारोपोभयसाधारणरूपेणैव सत्तासम्बन्धबुद्धिरेव अस्तित्वस्य स्वरूपमिति। प्रशस्तपादभाष्ये षड्भावपदार्थानां साधर्म्यमभिधेयत्वं विद्यते तस्य तात्पर्यमुदयनाचार्यैरुक्तमभिधानयोग्यता, तच्च शब्दार्थस्य सङ्गतिरूपः सम्बन्ध एव। किरणावलीकारनये ज्ञेयत्वं नाम ज्ञानयोग्यता[७] इति। ज्ञानयोग्यता तु ज्ञाप्यज्ञापकभावरूपः सम्बन्ध एव भवति। अर्थात् स्वजनकत्वसम्बन्धेन ज्ञानवत्त्वमेव ज्ञेयत्वमिति। 'पदस्यार्थः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पदार्थः' इति व्युत्पत्त्याऽभिधेयत्वम् पदार्थसामान्यलक्षणम् इति अन्नंभट्टः[८]। अर्थत्वम् अभिधेयत्वम् तच्च शब्दशक्यत्वम् अभिधा। न्यायनये ईश्वरेच्छाशक्तिः वा इच्छाशक्तिः, तन्निरूपितपदनिष्ठविशेष्यतायाः परम्परया निरूपिता या विषयित्व–सम्बन्धावच्छिन्ना प्रकारता तदाश्रयत्वं पदार्थस्य लक्षणमिति। प्रशस्तपादाचार्येण षड्भावपदार्थानामभिधेयत्वं ज्ञेयत्वमस्तित्वञ्च लक्षणमुक्तम्। परन्तु विश्वनाथपञ्चाननभट्टाचार्येण सप्तपदार्थानां ज्ञेयत्वमभिधेयत्वप्रमेयत्वादिकञ्च[९] साधर्म्याणि उक्तानि। अन्ये तु स्वाश्रयविषयतासम्बन्धेन प्रमात्वमेव पदार्थानां साधर्म्यम् प्रमात्वञ्च सद्विषयकत्वम्, अर्थात् विषयितासम्बन्धेन सद्विशिष्टत्वम्, सत्त्वञ्च वस्तुत्वम्, तथा च वस्तुत्वमपि पदार्थानां साधर्म्यं भवति।

वैशेषिकदर्शने षड्भावपदार्थेषु वा सप्तपदार्थेष्वन्यतमः पदार्थः द्रव्यमिति। गुणाः कर्माणि च समवायसम्बन्धेन द्रव्येषु तिष्ठन्ति।[१०] अवयविद्रव्याणि स्वावयवेषु[११] द्रव्येषु, सामान्यन्तु द्रव्यगुणकर्मस्सु, विशेषाः नित्यद्रव्येषु, समवायस्तु द्रव्यगुणकर्मणामनुयोगिनां, द्रव्यगुणकर्मसामान्यविशेषाणां प्रतियोगिनां सम्बन्धः। सोऽयं अनुयोगित्वप्रतियोगित्वसम्बन्धाभ्यामुभयत्र तिष्ठति। अतः षड्भावपदार्थेषु द्रव्यस्य प्राधान्यात् गुणादीनामुपजीव्यत्वाच्च द्रव्यस्य निरूपणं प्रथमपदार्थत्वेनोपलभ्यते। प्रशस्तपादाचार्यानुसारेण द्रव्यत्वजातिः यत्र विद्यते तद्द्रव्यम्। एवमन्येऽपि द्रव्यत्वसाधकयुक्तयः सन्ति।

१. स्वस्मिन् समवेतं द्रव्यं प्रति यत्कारणं भवति तद्द्रव्यम्।[१२]

२. गुणाः यत्र तिष्ठन्ति तद् द्रव्यं भवति।[१३]

३. क्रियाः यत्र तिष्ठन्ति तद् द्रव्यमिति।

४. यत् न कार्येण विनाश्यते नापि कारणेन तद्द्रव्यमिति।[१४]

५. गुणसमानाधिकरणपदार्थविभाजकधर्मः द्रव्यत्वरूपः तद्वद् यत् भवति तद् द्रव्यमिति।

अत एव प्रशस्तपादाचार्यानुसारं द्रव्यत्वसम्बन्धः द्रव्यस्य लक्षणम्। स्वात्मनि अन्यारम्भकत्वं, गुणवत्त्वं, कार्य्यकारणाविरोधित्वम्, अन्त्यविशेषवत्त्वम् वा द्रव्यस्य लक्षणमिति।

"द्रव्यत्वजातिमत्त्वं[१५] गुणवत्त्वं वा द्रव्यसामान्यलक्षणमिति दीपिकायामुक्तं विद्यते। तथा च समवायसम्बन्धेन द्रव्यत्वजातिमत्त्वं वा समवायसम्बन्धेन गुणवत्त्वं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्रव्यस्य लक्षणमिति। ''उत्पन्नं सत् द्रव्यं क्षणं निर्गुणं निष्क्रियञ्च तिष्ठति'' इति सिद्धान्तादुत्पत्तिकालीनद्रव्ये समवायेन गुणस्याभावात् तत्राव्याप्तिरूक्तलक्षणस्य सम्भवति। अत एव दीपिकाकारः वदति ''ननु गुणवत्त्वं न द्रव्यसामान्यलक्षणम्, आद्यक्षणे उत्पन्नविनष्टद्रव्ये चाव्याप्तेः'' पुनः लक्षणान्तरं प्रदर्श्य उक्ताव्याप्तेः निराकरणं तैः क्रियते। गुणसमानाधिकरणसत्ताभिन्नजातिमत्त्वं द्रव्यस्य लक्षणमिति।[१६] यथा श्यामगुणस्य अधिकरणे घटे विद्यमाना या सत्ताभिन्ना द्रव्यत्वजातिः तादृशजातिमत्त्वस्य उत्पत्तिकालीने घटात्मकद्रव्ये सत्त्वात् भवति लक्षणसमन्वयः न कुत्रापि अव्याप्तिदोषः सम्भवति। यद्वा गुणवद्वृत्तिसत्तासाक्षाद्व्याप्यजातिमत्त्वं[१७], समवायसम्बन्धावच्छिन्नकार्यतानिरूपित तादात्म्यसम्बन्धावच्छिन्नकारणता–वच्छेदकजातिमत्त्वं वा द्रव्यस्य लक्षणमिति।[१८]'' क्रिया गुणवत् समवायिकारणमिति द्रव्यलक्षणमि[१९]ति वैशेषिकसूत्रकारोऽपि वदति। क्रियाश्च गुणाश्च विद्यन्ते अस्मिन् इति क्रियागुणवत् अर्थात् क्रियावत्त्वं, गुणवत्त्वं वा समवायिकारणत्वं द्रव्यस्य लक्षणं भवति। उत्पत्तिकालीने घटे गुणस्याविद्यमानत्वात् गुणवत्त्वस्यार्थः क्रियते शङ्करमिश्रेण गुणात्यन्ताभावविरोधित्वं[२०] द्रव्यस्य लक्षणमिति। कर्मवद्वृत्तिपदार्थविभाजकोपाधिमत्त्वं वा स्वजन्यसंयोगवत्त्वसम्बन्धेन क्रियावत्त्वं वा स्वजन्यविभागवत्त्वसम्बन्धेन क्रियावत्त्वं द्रव्यस्य लक्षणं विवृत्तिकारैरुक्तम्[२१]। उपस्कारमते द्रव्यस्यान्यानि लक्षणान्यपि सन्ति।

१. संख्यावत्त्वं[२२] द्रव्यस्य लक्षणं वा संख्यासमानाधिकरणसत्तासाक्षात्–व्याप्यजातिमत्त्वम्। परिमाणवत्त्वं, पृथक्त्ववत्त्वं, संयोगवत्त्वं, विभागवत्त्वं वा द्रव्यस्य लक्षणम्। अज्ञातकर्तृकटीकादिशा प्रागभावाधिकरणत्वं[२३] प्रध्वंसाधिकरणत्वं तस्य लक्षणम्। अज्ञातकर्तृकमते अन्यान्यपि लक्षणानि भवन्ति। कार्याश्रयत्वं, संख्याश्रयत्वं, परिमाणाश्रयत्वं, संयोगाश्रयत्वं, विभागाश्रयत्वं वा द्रव्यस्य लक्षणमिति। एतानि लक्षणान्यपि उपस्कारे प्रतिपादितानि सन्ति। माधवाचार्योऽपि द्रव्यत्वजातिमत्त्वमेव द्रव्यस्य लक्षणं स्वीकरोति। परन्तु अस्मिन् मते द्रव्यत्वं नाम ''गगनारविन्दसमवेतत्वे[२४] सति, नित्यत्वे सति गन्धासमवेतत्वमिति। समवायेन गुणवद्वृत्तिसत्तासाक्षाद्व्याप्य जातिमत्त्वं, गुणत्वकर्मत्वभिन्नत्वे सति सत्तासाक्षाद्व्याप्या या जातिः तादृशजातिमत्त्वं[२५] वा द्रव्यसामान्यस्य लक्षणम्। इदं द्रव्यमिदं द्रव्यम् इति प्रतीत्या द्रव्यत्वजातेः सिद्धिर्भवतीति वक्तुं न शक्यते यतो हि हालिकादीनां घृतादिषु द्रव्यत्वजातेरग्रहात् सकलद्रव्यसाधारणतया द्रव्यत्वजातेः सिद्धि न सम्भवति इति चेन्न। 'कार्यसमवायि–कारणतावच्छेदकतया,[२६] संयोगस्य, विभागस्य वा समवायिकारणतावच्छेदकतया तत्सिद्धेः'' इति विश्वनाथपञ्चाननभट्टाचार्यैरुक्तम्''। यत्र समवायेन कार्यं तत्र

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तादात्म्येन द्रव्यमित्यस्ति नियमः। तथा च समवायसम्बन्धावच्छिन्न कार्यत्वावच्छिन्न कार्यता निरूपित तादात्म्यसम्बन्धावच्छिन्ना या द्रव्यनिष्ठा समवायिकारणता सा किञ्चिद् धर्मावच्छिन्ना कारणतात्वात् यथा घटनिष्ठ कार्यता निरूपित या दण्डनिष्ठा कारणता सा दण्डत्वावच्छिन्ना तथैव द्रव्यनिष्ठा कारणता किञ्चिद्धर्मावच्छिन्ना तत्र कारणतायाः यः अवच्छेदको धर्मः तदेव द्रव्यत्वमिति। यतोहि निरवच्छिन्नायाः कारणतायाः असम्भवात् या या कारणता सा सा किञ्चिद्धर्मावच्छिन्ना इति सामान्यव्याप्तिर्भवति। अथवा समवायसम्बन्धावच्छिन्ना संयोगत्वावच्छिन्ना संयोगनिष्ठकार्यता निरूपिता तादात्म्यसम्बन्धावच्छिन्ना द्रव्यनिष्ठा या समवायिकारणता, सा किञ्चिद्धर्भावच्छिन्ना कारणतात्वात् घटनिष्ठकार्यता निरूपित दण्डत्वावच्छिन्ना कारणतावत्। तत्र यः द्रव्यनिष्ठकारणतायाः अवच्छेदको धर्मः तदेव द्रव्यत्वमिति। यद्वा समवायसम्बन्धावच्छिन्नविभागत्वावच्छिन्न विभागनिष्ठकार्यता निरूपिता या तादात्म्यसम्बन्धावच्छिन्ना द्रव्यनिष्ठा कारणता सा किञ्चिद्धर्मावच्छिन्ना तत्र कारणतायाः यः अवच्छेदको धर्मः तदेव द्रव्यत्वमिति अनया रीत्या द्रव्यत्वजातेः सिद्धिः भवति इति। न च नवद्रव्यातिरिक्तं द्रव्यं तमो विद्यते नीलरूपवत्त्वात् कर्मवत्त्वाच्च। गन्धरहितत्वात् न पृथिव्यां, नीलरूपवत्त्वात् न जले, तेजसि, वायौ, मनसि च तस्यान्तर्भावो भवितुमर्हति। क्रियावत्त्वात् आकाशकालदिगात्मसु न तस्यान्तर्भावो भवितुमर्हति, अतः दशमं द्रव्यं तमः इति वाच्यम्। नीलं तमश्चलतीति प्रतीतिस्तु भ्रान्तिरूपा। तमस्तु प्रौढप्रकाशकतेजःसामान्याभाव एव। अतः नवैव द्रव्याणि भवन्ति इति।

कोण्डभट्टविरचितायाः न्यायपदार्थदीपिकायाः मूलपाण्डुलिपिः रघुनाथमन्दिरपुस्तकालयजम्मूतः लब्धा। अस्य ग्रन्थस्य अन्या अपि पाण्डुलिपयः सरस्वतीभवनपुस्तकालये (सं.सं.वि.वि, वाराणसी) वर्तन्ते। तासां संख्याः सन्ति। ग्रन्थाङ्काः ३०६१७, ३११३२, ३२६३६, ३४२५५, ३१०३६, ३१४८२, ३११३३, ३२६२२, ३४०२५, १४११६, १५३८८, १३५३० इत्यादयः सन्ति। सरस्वती भवनपुस्तकालये विशेषतः पूर्णाः पाण्डुलिपयः बहव्यः सन्ति। वैशेषिकदर्शनस्य प्रकरणग्रन्थः इयं न्यायपदार्थदीपिका वर्तते। न्यायस्यापि समन्वयोऽत्रोपलभ्यत इति। द्रव्यादिषड्भावपदार्थानां समवायाभावपदार्थस्यापि सरलनिरूपणं अत्रानायासेनैवोपलभ्यते वर्तते। भूमिकायां पदार्थस्य द्रव्यस्य च सामान्यं स्वरूपं लक्षणञ्च मया प्रतिपादितं विस्तारभयात्संक्षेपेणैव निरूपणमात्रं गुणादीनां लक्षणं न निरूपितम्। तत् सर्वं एव ग्रन्थस्यास्य सानुवादे हिन्दीभाषान्तरकरणे सर्वं निरूपितमिति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य सर्वविधविकासा–नामुन्नायकानां श्रद्धेयानां प्रो. वाचस्पति उपाध्यायमहोदयानां पद्मवच्चरणयोः नमस्काराञ्जलिं समर्पयामि। एते सर्वदा विद्यापीठस्याध्यकानामध्ययनाध्यापने ग्रन्थलेखने च प्रेरयन्ति। तदनन्तरं राष्ट्रिय–संस्कृत–संस्थानस्य कुलपतिवर्यान् श्रद्धेयान् प्रो. राधावल्लभत्रिपाठिनः प्रति कृतज्ञतां ज्ञापयामि प्रणमामि च।

यतो हि एते सततं नूतनग्रन्थाविष्करणे दक्षाः सत्प्रेरकाश्चापि सन्ति। एतेषां महोदयानां सत्प्रेरणया मयेदं कार्यं सम्पादितमिति। राष्ट्रिय–संस्कृत– संस्थानस्य सहायककुलसचिवाः (शोध एवं प्रकाशन) श्री परमानन्दवत्समहोदयाः ममाग्रजाः ''संस्कृतविमर्शः'' इति पत्रिकायां लघुग्रन्थप्रकाशनाय सत्प्रेरिताः इति। तदर्थं वत्समहोदयान् प्रति कार्तज्ञ्यं सूचयामि नमस्करोमि चेति।

संदर्भाः

१. द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां पदार्थानां वैधर्म्यतत्त्वज्ञानं निःश्रेयसहेतुः प्रशस्तपादभाष्यम्, पृ. १५, प्रशस्तपादभाष्यम्, सम्पादक श्री दुर्गाधर झा, १९९७, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी।

२. षण्णामपि पदार्थानामस्तित्वाभिधेयत्वज्ञेयत्वानि, तदेव, पृ.सं. ४१।

३. न्यायकन्दलीटीका – अस्तित्व स्वरूपवत्वम् षण्णामपि साधर्म्यम् यस्य वस्तुनः यत् स्वरूपं तदेव तस्यास्तित्वम्, पृ.सं. ४१, तदेव।

४. अस्तित्वं विधिमुखप्रत्ययविषयत्वम्। प्रतियोग्यनपेक्षनिरूपणत्वमिति यावत्। हिन्दी टीका सहित किरणावली, पृ.सं. २१६, अनु. प्रो. गौरीनाथ शास्त्री, १९८०, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी।

५. व्याप्यसमवायित्वे गुणत्वशून्यत्वे च सति सविकल्पकमात्रविषयत्वम् भावत्वम्। प्रकाश पृ.सं. १३७–१३८।

६. अत्र वदन्ति अतीन्द्रियभिन्नगुणत्वाभावसमानाधिकरणसविकल्पकमात्रवेद्यपदार्थविभाज–कोपाधिशून्यत्वे तात्पर्यम्। मकरन्द, पृ. १३८।

७. ज्ञेयत्वं ज्ञानयोग्यता – किरणावली, पृ.सं. २१६।

८. तर्कसंग्रहदीपिका, पृ.सं. ६।

९. न्यायसिद्धान्तमुक्तावलीयुक्ता कारिकावली, पृ.सं. ६७, 'सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते'।

१०. गुणवत्त्वं क्रियावत्त्वं द्रव्यस्य लक्षणं दीपिका, पृ. सं.

११. अवयवावयविनोः, गुणगुणिनोः, क्रियाक्रियावतोः, जातिव्यक्त्योः, विशेषनित्यद्रव्ययोः सम्बन्धः समवायः तर्कभाषाप्रत्यक्षखण्डे कारणप्रकरणम्।

१२. स्वात्मन्यान्यारम्भकत्वम् प्रशस्तपादभाष्यम्, पृ. सं. ५४।

१३. गुणवत्त्वम् तदेव, पृ.सं. ५४।

१४. कार्यकारणाविरोधित्वम्, पृ. सं. ५४।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१५. (क) दीपिका नीलकण्ठीबालप्रियासहिता, पृ. सृ. ३१।
(ख) सिद्धान्तचन्द्रोदय, पृ. सं.
(ग) पदकृत्यम्, पृ.सं.
(घ) लघुबोधिनी, पृ.सं.
(ङ) वाक्यवृत्तिः, पृ.सं.
(च) विरला, पृ.सं.
१६. दीपिका नीलकण्ठीबालप्रियासहिता, पृ. सं. ५२।
१७. न्यायसिद्धान्तमुक्तावली किरणावली टीका, पृ.सं. ३५।
१८. न्यायसिद्धान्तमुक्तावली किरणावली टीका, पृ.सं. ३५।
१९. वैशेषिकसूत्रम् (उपस्कारविवृत्तिभाष्यसहितम्), पृ.सं. ३२।
२०. वैशेषिकसूत्रम् (उपस्कारविवृत्ति–भाष्यसहितम्), पृ.सं. ३२।
२१. तदेव, पृ.सं. ३३।
२२. तदेव, पृ.सं. ३३, उपस्कार टीका।
२३. वैशेषिकसूत्रम् अज्ञातकर्तृकटीकासहितम्, पृ.सं. ६, मिथिला शोध संस्थान, दरभंगा।
२४. सर्वदर्शनसंग्रहः औलूक्यदर्शनम्, पृ.सं. ३४७।
२५. न्यायसिद्धान्तमुक्तावली किरणावलीटीका, पृ.सं. ३५।
१५. सर्वदर्शनसंग्रहः औलूक्यदर्शनम्, पृ.सं. ३४७।
२६. न्यायसिद्धान्तमुक्तावली किरणावलीटीका, पृ.सं. ३५।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न्यायपदार्थदीपिका

श्रीमत्सिद्धिकरं कान्तं रमोरमणात्मकम्।
दयासिन्धुं चिदानन्दं सितासितमुपास्महे।। १।।

इह खलु चतुर्थपुरुषार्थहेतुभूतमात्मतत्वं ज्ञानमामनन्ति।। तच्च पदार्थतात्वनिर्णयाधीनमिति पदार्थतात्वमत्र विविच्यते।। तत्र प्रमितिविषयः पदार्थः। स द्विधा भावोऽभावश्च भावाः षडेव द्रव्यगुणकर्मसामान्यविशेषसमवायभेदात्। तत्र द्रव्यत्व जातिमद्गुणाश्रयो वा द्रव्यं तच्च पृथिव्यप्तेजोवाय्वाकाशकालदि–गात्ममनोभेदान्नवधा।। तत्रपृथिवीत्व जातिमती गन्धवती वा पृथिवी मणिमुक्तावज्रादा–वप्यनुद्भूतो गन्धोऽस्त्येवेति न तत्राव्याप्तिः। तद्भस्मनिगन्धोपलम्भेन तत्रापि गन्ध कल्पनात्। अथवा गन्धवत्त्वं गन्धसमानाधिकरणजलावृत्ति जातिमत्त्वम्। गन्धसमानाधिकरणद्रव्यत्वादिकमादाय जलादावतिव्याप्तिवारणाय जलावृत्तीति। एतेन नाना गन्धवदारब्धपदार्थस्य निर्गन्धत्वपक्षेऽपि न तत्राव्याप्तिः। (तादृश) तत्र पृथिवीत्वसत्त्वात्। सा च पृथिवी द्विधा। नित्याऽनित्या च। परमाणुरूपा नित्या। कार्यरूपा त्वनित्या। यदिदं जालसूर्यमरीचिस्थं सर्वतः सूक्ष्ममुपलभ्यते र्तत्र्यणुकम्। तस्य षष्ठोंऽशः परमाणुः तद्धि त्रिभिर्द्व्यणुकैरारभ्यते द्वाभ्यां परमाणुभ्यां च द्व्यणुकमिति स्वीकारात्। कार्यरूपा च त्रिधा। शरीरेन्द्रियविषयभेदात्। शरीरं तु अंत्यावयविभोगायतनम् भोगनियामकमिति यावत्। तत् पञ्चधा। शुक्लशोणिताभ्यां विनैवादृष्टविशेषोपगृहीत पृथिवी जन्यं जरायुजमण्डजं स्वेदजमुद्भिज्जञ्च। आद्यं वसिष्ठादेः। गर्भावरकश्चर्मविशेषोजरायुः तज्जं मानुषादिः अण्डजं पक्ष्यादिः। स्वेदजं लिक्षायूकादिः। पृथिवीं भित्वा जायमानं वृक्षाद्युद्भिज्जम् इन्द्रियं घ्राणम्। तच्च गन्धतद्गतजाति तदभावानामेव ग्राहकम् नासाग्रवृत्तिः तत्पार्थिवमेव। रूपादिषु पञ्च सुगन्धस्यैवाभिव्यञ्जकत्वात्। कुङ्कुमगन्धाद्यभिव्यञ्जकतैलवत्। सक्तुरसनवशराव–गन्धाभिव्यञ्जकजलेऽतिव्याप्तिवारणाय एवकारः। विषयाः पुष्पादयः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अप्त्वजातिमत्यः शीतस्पर्शवत्यो वाऽऽपः ता अपि द्विविधाः। नित्या अनित्याश्च। परमाणुरूपा नित्याः। कार्यरूपा अनित्याः। ता अपि शरीरेन्द्रियविषयभेदात् त्रिधा। शरीरं वरुणलोके। तत्तु पार्थिवावयवमेलनात्करकावत् अदृष्टविशेषाद्वा घनीभूतं दृढं सद्भोगोपयोगि इन्द्रियं रसनम्। तच्च रसतद्गतजातितदभावानामेव ग्राहकम् जिह्वाग्रवृत्तिः तदाप्यमेव। रूपादिषु पञ्चसु रसस्यैवाभिसञ्ज्ञकं लालावत् रसस्यैवाभिव्यञ्जकत्वात् जलमाधुर्यव्यञ्जकंहारीतक्यामलकादौ व्यभिचारवारणाय एवकारः। तयोः कषायाम्लतया पटरञ्जकद्रव्यरूपविशेषाभिव्यञ्जकत्वात्। विषया गङ्गाद्याः।

तेजस्त्वजातिमदुष्णस्पर्शवद् वा परप्रकाशकरूपवद्वा तेजः। नित्यमनित्यञ्च, परमाणुरूपं नित्यम्। कार्यरूपमनित्यम्। तदपि त्रिधा। शरीरेन्द्रियविषयभेदात्। शरीरमादित्यलोके। इन्द्रियं चक्षुः। तच्च रूपतज्जातितद्वद्द्रव्यतद्गतजातिगुणकर्मणां ग्राहकम्। कृष्णताराग्रवृत्तिः तत्तैजसमेव। रूपादिषु पञ्चसु रूपस्यैव अभिव्यञ्जकत्वात् आलोकवत्। पूर्ववद्रीतक्यामलकादौ व्यभिचारनिराकरणार्थम् एवकारः। ननु रूपवान्परमाणुश्चक्षुषा कुतो न गृह्यते। चाक्षुषप्रत्यक्षे विषयद्रव्यगतं महत्त्वं हेतुः। परमाणौ तन्नास्तीति चेत्तर्ह्याकाशादयः कुतो न गृह्यन्ते। विषयगतं रूपं महत्त्वं चेति द्वयम्।

तप्तवारिस्थं तेज उष्मा वा कुतो न गृह्यते। उच्यते द्रव्यचाक्षुषप्रत्यक्षे विषयगत–उद्भूतरूपं महत्त्वं च कारणम्। परमाणुर्न महान् आकाशो न रूपवान्, तप्तवारिस्थं तेजश्च, नोद्भूतरूपवत्। तद्रूपस्यानुद्भूतत्वात्। एवं चाक्षुषप्रत्यक्षे विषयगत उद्भूतस्पर्शोपि हेतुः। बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे एव महत्त्वरूपस्पर्शानां लाघवाद्धेतुत्वात्। तथा प्रदीपादिप्रभायां रूपमात्रं गृह्यते। तेन तदाश्रयद्रव्यमनुमीयत इति सिद्धान्तः। प्रभाशब्दोपि तद्रूपवाचक एवेत्याहुः। नन्वेवमपि अन्धकारस्थो घटोऽपि गृह्यते। द्रव्यचाक्षुषे आलोकसंयोगोऽपि हेतुरिति चेन्न। चक्षुरूपस्य सुवर्णरूपस्य वा अन्धकारेऽपि संयोगसत्वादिति चेन्न। द्रव्यप्रत्यक्षे उद्भूतानभिभूतरूप–वदालोकसंयोगस्यापि हेतुत्वात्। चक्षुरूपस्योद्भूताभावात्। सुवर्णरूपस्याभिभूतत्वात् तत्संयोगेऽपि न प्रत्यक्षम्। विषयश्चतुर्धा भौमदिव्यमौदर्यमाकरजञ्च। पार्थिवमात्रेन्धनं तेजो भौममग्न्यादिः। अविन्धनं तेजो दिव्यं विद्युदादिः। उभयेन्धनमौदर्यम्। भक्षितान्नस्य पीतजलस्य च पचनात्। प्रखानिजमाकरजम् सुवर्णादिः।

ननु सुवर्णं न तेजः परप्रकाशकरूपविरहात् उष्णस्पर्शाभावाच्चेति चेन्न। अभिभूतरूपस्पर्शयोस्तत्र स्वीकारात्। पीतरूपवन्तः पार्थिवभागास्तत्र मिलिताः सन्तीति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तदीयरूपस्पर्शाभ्यां तयोरभिभवः सम्भवत्येव। सजातीयग्रहणकृतमग्रहणं ह्यभिभवः। तारशब्दान्मन्दस्येव।।

मीमांसकास्तु। पीतरूपवद् द्रव्यान्तरमेवमूचिरे। तन्न द्रव्यान्तरकल्पने गौरवात्। अन्ये तु हरिद्रादिवत्पीतरूपवत्वात्पृथिव्येव सुवर्णमित्याहुः। तन्न अत्यन्तानल–संयोगाद्भस्मापत्तेः। वायुत्ववान्नीरूपस्पर्शवान्वा वायुः। सोऽपिद्विधा। नित्योऽनित्यश्च। परमाणुरूपो नित्यः। कार्यरूपोऽनित्यः। सोऽपि शरीरेन्द्रियविषयप्राणभेदाच्चतुर्धा। शरीरं वायुलोके पिशाचादीनाञ्च। इन्द्रियं त्वक् सकलशरीरव्यापकम्। मिडानाड्यां तत् सत्वेपि तन्मनोयोगस्य स्वप्नजनकत्वात्तदा स्वप्नज्ञानमेव न त्वाचादिः। पुरीतत्येव परं नास्ति। अतः तस्यां मनः प्रवेशे ज्ञानशून्या सुषुप्तिर्भवति ज्ञानमात्रे त्वङ्मनोयोगस्य हेतुत्वेन तदानीं तदभावाज्ज्ञानाभावोपपत्तेः। तत्तु वायवीयमेव। रूपादिषु पञ्चस्विति। अङ्गसङ्गसलिलशैत्याभिव्यञ्जकपवनवत्। ए लादौ जलस्पर्शव्यञ्जकेव्यभिचारवारणाय एवकारः। तच्चोद्भूतस्पर्शतज्जातितद्भावोद्भूतरूपस्पर्शवद्द्रव्यतद्गतगुणतज्जाति–तदभावानां ग्राहकम्। अत उद्भूतरूपाभावात् तप्तवारिस्थं तेजो रूपाभावाद्वायुश्च त्वचा न गृह्येते। किन्तु तत्स्पर्शमात्रं गृह्यते तदाश्रयत्वेन वायुरनुमीयत इति सिद्धान्तः। एवं प्रदीपवज्रचन्द्रादिप्रभापि न त्वचा गृह्यते। उद्भूतस्पर्शाभावात्।

मीमांसकास्तु उद्भूतस्पर्शवद्द्रव्यं त्वचो ग्राह्यं लाघवात् न तु रूपमपि तत्र प्रवेश्यं गौरवात्। अतो वायुरपि स्पार्शनप्रत्यक्ष एव। अत एव वायुं स्पृशामीत्यनुभवः। अन्यथा घटादेः स्पर्शो गृह्यते तेन द्रव्यमनुमीयत इति वक्तुं शक्यत्वात्किमपि द्रव्यं स्पार्शनप्रत्यक्षं न स्यात्। किञ्च चक्षुषा रूपं गृह्यते घटादितदाश्रयत्वेनानुमीयत इत्यपि स्यात्। तथा च द्रव्यमतीन्द्रियमेव स्यात्। एवं महदुद्भूतरूपवद्द्रव्यं चक्षुर्योग्यम्। अतः प्रदीपचन्द्रादिप्रभापि चक्षुर्ग्राह्यैवेत्याहुः। विषयस्तु वृक्षादिकम्पजनकः। प्राण पञ्चधा। प्राणापानव्यानोदानसमानभेदात्। शब्दाश्रय आकाशः। स च तत्कार्यस्य शब्दस्य सर्वत्रोपलम्भात् विभुः। लाघवादेकोनित्यश्च। श्रोत्रं तदीयमिन्द्रियम्। अदृष्टविशेषो–पगृहीतकर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रम्। बधिरस्यादृष्टविशेषाभावान्न श्रोत्रमस्ति। कालिक परत्वानुमेयः काल। स चैकोऽपि वर्तमानातीतभविष्यक्रियोपाधि–वशाद्वर्त्तमानादिसंज्ञां लभते। पाकपठनादिक्रियावशात्पाचकपाठकादिव्यपदेशवत्।

दिगेका नित्या दैशिकपरत्वापरत्वासाधारणं कारणम्। स चेन्द्राग्नियम–निर्ऋतिवरुणवायुकुबेरेशानब्रह्मानन्तरूपोपाधिवशात् पूर्वादिभेदेन दशसंज्ञां लभते। एतौ दिक्कालौ जगद्धेतूजगदाधारौ च। इहेदानीं करोमीत्यनुभवात्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आत्मत्वसामान्यवान् ज्ञानाश्रयो वा आत्मा। विभुर्नित्यश्च। स द्विधा। जीवेश्वरभेदात्। सुखाद्याश्रयोऽहं प्रत्ययवेद्यो जीवः। नन्वहं गौरः अहं जानामीति समानोपलम्भाद् गौरादिरूपवति ज्ञानसुखाश्रयतासिध्यतीति देह एवात्मा स्यात्। न च शरीरं नात्माज्ञानशून्यत्वात् तदपि शरीरं ज्ञानं शून्यं पार्थिवत्वाद् घटवदित्यनुमानात्सिध्यतीति वाच्यम्। घटस्य केवलपार्थिवत्वाज्ज्ञानशून्यत्वेऽपि भूतसमुदायात्मकत्वाच्छरीरस्य ज्ञानवत्त्वसम्भवात्। केवलचूर्णादौ रागाभावेऽपि चूर्णपर्णादिसमुदाये ताम्बूले रागोत्पत्तिवत्। अहं ज्ञानवानिति प्रत्यक्षबोधेनानुमानस्य शरीरे ज्ञानाभावासाधकत्वाच्च। वह्निरनुष्णः कृतकत्वात् घटवदित्यनुमानवत् स्वीयचक्षुश्च देह एवात्मेति चार्वाकाः। एवं काणोऽहं बधिरोऽहम् इति इन्द्रियधर्मसामानाधि–करण्यादिन्द्रियाण्येवात्मेति अपरे वदन्ति। तत्कथं नित्यो विभुरात्मेति सङ्गच्छेत इति चेन्न। शरीरेन्द्रियाणामनित्यत्वेनात्मत्वासम्भवात्। न चात्माप्यनित्य एवास्तु। कृतहानाकृताभ्यागमप्रसङ्गाद्धर्माधर्मशास्त्रवैय्यर्थ्यापत्तेः। किञ्च कश्चिदुत्पत्तिमारभ्यैव रूपभाग्यादिमान् नान्य इति नियमायादृष्टविशेषो हेतुर्वाच्यः। स चैतज्जन्मनि न सम्पादित इति तत्सम्पादकजन्मान्तरयोगादात्मसिद्धिः। अनेकजन्मयोगिनश्च नित्यतैव नाशकाभावात्। न च स्वतन्त्र ईश्वर एव स्वेच्छावशात् स्वसृष्टप्राणिष्वेवं करोति कुलाल इव स्वनिर्मितिघटेषु क्वचिद् दुग्धयोगं क्वचिन्मूत्रपुरीषयोगमिति वाच्यम्। अचेतन इव चेतने तथा व्यवहारे वैषम्यनैर्घृण्यप्रसङ्गात्। दृश्यते च कुलालादेरेव घटादिवत्पुत्रेषु न निमित्तक तथा व्यवहारे वैषम्यादिप्रयुक्ता निन्देति। न चायं नित्यः परमाणु रूप एवास्तु। सकलशरीरव्यापिसुखदुःखाननुभवप्रसङ्गात्। परमाणुरूपज्ञानादेस्तद्धर्मस्याप्रत्यक्षत्वापत्तेश्च। स च प्रति शरीरं भिन्नः। सुखदुःखादियौगपद्याद्वैचित्र्याच्च। अन्यथा परकीयसुखदुःखानुन्धानप्रसङ्गाच्च। हस्तपादादिभेदस्येव शरीरभेदस्याप्रयोजकतयाऽननुसन्धानप्रयोजकत्वात्। जातिस्मराणानां जन्मान्तरीयार्थस्मरणा नापत्तेश्चेति दिक्।

दुःखासमानाधिकरणज्ञानवान् नित्यज्ञानाश्रयो वा ईश्वरः। स च सकलकार्यकर्तृत्वेन सिध्यतीति वक्ष्यते। आत्मतद्गुणादिप्रत्यक्षकरणं मनः। तच्च परमाणुपरिमाणं प्रतिपुरुषं भिन्नम्। यत्र यत्रेन्द्रिये संयुज्यते ततस्ततो ज्ञानमुत्पद्यते। अतो युगपदनेकेन्द्रियैर्ज्ञानाभावोपपत्तिः। अन्यथा युगपद्रूपशब्दादिग्रहणोपपत्तौ व्यासङ्गान्न ज्ञानमित्यनुभवानापत्तेः। तथा च गौतमसूत्रम् युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति। अत एव मनो विभु निःस्पर्शद्रव्यत्वात् आकाशवदिति मीमांसकोक्तमपास्तम्। अवधानिनान्तु अभ्यासविशेषात्प्रेरणया झटिति मनसि क्रियया तत्तदिन्द्रियैर्योगाज्ज्ञानक्रमिकत्वेऽपि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यौगपद्याभिमानमात्रम्। नन्वन्धकारोऽपि निस्पर्शत्वात् क्रियावत्वाद्विलक्षणरूपवत्वाच्च पृथिव्यादिभ्यो भिन्नं दशमं द्रव्यमस्तीति कथं नवैव द्रव्याणीति चेन्मैवम्। तस्य रूपवद्द्रव्यत्वे चक्षुषाग्रहणं न स्यात्। द्रव्यचाक्षुषमात्रे उद्भूतानभिभूतरूपवदालोकसंयोगस्य हेतुत्वात्। न चक्षुर्गोलकवृत्तितामसेन्द्रियान्तरादन्धकारग्रहः। इन्द्रियान्तरकल्पने गौरवात्। किं चान्धकारसमनियत–आलोकाभावोऽवश्यमभ्युपेयः। तथाच तेनैवारोपितनील–रूपेणान्धकार इति व्यवहारसम्भवान्न द्रव्यान्तरं तमः अतिगौरवात्। तस्मादुद्भूतानभिभूत–रूपवदालोकाभावसमूहस्तमः।

गुणत्वजातिमन्तो गुणाः। ते च रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्व–संयोगविभागपरत्वापरत्वं गुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्म–संस्कारशब्दाश्चतुर्विंशतिरेव। तत्र रूपत्वजातिमद्रूपम्। पृथिव्यादित्रयवृत्तिः। शुक्लपीतहरितरक्तकृष्णकपिलचित्रभेदात्सप्तधा। तदवान्तरजातयस्त्वसंख्याताः। तत्र शुक्लभास्वरं तेजसि। परप्रकाशतावच्छेदकजातिविशेषो भास्वरत्वम् तद्वद्भास्वरं। शुक्लमेवाभास्वरम् अपाकजमप्सु। षड्विधमचित्रं पाकजं पृथिवीपरमाणौ। स सप्तविधमप्यपाकजमेव पृथिवीद्व्यणुकादौ। तत्रावयविरूपं प्रत्यवयवरूपं कारणम् एवं रसादावपि।

मीमांसकास्तु एकैका एव नीलपीतरूपादिव्यक्तयो नित्याश्चोत्पाद्यमान–घटादौ घटत्वादिवत्संसृज्यत इति रूपवान् घट इत्यादिप्रतीतिः घटादिनाशे च व्यक्त्यन्तरे घटत्वादिवदेव वर्तत इत्याहुस्तन्न। एवं हि घटत्वादिवज्जातित्वापत्तेः।

नित्यमेकमनेकसमवेतत्वं सामान्यमिति तल्लक्षणयोगात्। इष्टापत्तौ नीलनीलतरादिव्यवहारानापत्तेः। न हि भवति गोतरगोतम इति। किञ्च नीलद्रव्यस्य पाके न रक्ततादर्शनस्थले पूर्वनाशस्याकामेनाप्यभ्युपेयत्वान्न किञ्चिदेतत्। रसत्वजातिमद् रसः पृथिवीजलवृत्तिः। मधुराम्लकटुतिक्तकषायलवणभेदाद् षोढा। मधुरोऽपाकजोऽप्सु। षड्विधोऽपि पाकजः पृथिवीपरमाणौ। द्व्युणाकादावपाकजः।

गन्धत्वजातिमान् गन्धः। पृथिवीमात्रवृत्तिः। जलादौ तु उपष्टम्भकभाग एव लोहितस्फटिक इतिवत्प्रतीयते। अत एव पुष्पाद्युपरिसमागतवायुना पुष्पाद्यवयवा एवानीयन्त इति सिद्धान्तः। नन्वेवं पुष्पादेः सच्छिद्रताकसूर्यादेः परिमाणशून्यता च स्यादिति चेन्न। भोजकादृष्टवशात्पुनर्भागानां पूरणाभ्युपगमात्। क्वचित् कर्पूरादौ तथात्वस्येष्टत्वात्। सुरभिरसुभिश्चेति द्विधा। सोऽपि पाकजः परमाणौ द्व्यणुकादावपाकजः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्पर्शत्वजातिमान् स्पर्शः। पृथिव्यादिचतुष्टयवृत्तिः। शीतोष्मानुष्माशीत–भेदात् त्रिधा। शीतोऽप्सु। उष्मस्तेजसि। अनुष्माशीतः पृथिवीवाय्वोः। वायावपाकज एव। पृथिवीपरमाणौ पाकजः। पृथिवीद्व्यकादावपाकजः। कोमलकठिनचित्र–भेदादनेकधा। ननु कथं रूपस्पर्शाविव चित्रावुदाहृतौ। रसगन्धयोरपि हरीतक्यादौ चित्रयोर्द्दर्शनात्। न च तत्र नानारससमुदाय एव भासते षड् सा हरीतकीति व्यवहारादिति वाच्यम्। रूपस्पर्शयोरप्येवमापत्तेः। चित्ररूपवति अत्र श्यामंमत्र रक्तमित्याद्यनुभवाद् व्यवहाराच्चेति चेदुच्यते। न तावन्नीलपीतारब्धे नीलं सम्भवति। समवायेन नीलं प्रति स्वाश्रयसमवेतत्वसम्बन्धेन नीलेतरस्य प्रतिबन्धकत्वात्। अन्यथा पीतावच्छेदेनापि नीलापत्तेः। नापि परस्परप्रतिबन्धादुभयोरसम्भवेन नीरूपमेवास्त्विवति वाच्यम् अतीन्द्रियतापत्तेः। विषयगतोद्भूतरूपस्य प्रत्यक्षहेतुतायाः प्रागभिहितत्वात्। तस्मान्नीलपीतादिभिर्विलक्षणमेव चित्रं तत्र जन्यत इति युज्यते। एवं स्पर्शोऽप्यवधेयम्। गन्धरसयोस्त्वस्वीकारेऽपि न क्षतिः। तयोः प्रत्यक्षाहेतुत्वात्। केचित्तु चित्ररसगन्धावपीच्छन्ति। तत्तु वर्धमानादिष्वनादृतम्। ननु रूपादयः पृथिवीपरमाणावेव पाकजा इति कथं सङ्गच्छताम्। आपाकनिक्षिप्तघटादावपि पूर्वनाशापरोत्पत्त्योरनु–भवसिद्धत्वादिति चेत् सत्यम्। घटमध्येऽपि पाकजरूपाद्यनुभवसिद्धम्। तच्च तत्र अग्निसंयोगं ज्ञापयति। अग्निसंयोगस्यैव पाकत्वात्। तथा च वह्न्यभिघातात्तत्र परमाणुपर्यन्तं घटावयवतदवयवानां विभागः। ततः परस्परसंयोगनाशः। ततो विशकलितेषु तन्तुषु पटनाशवदसमवायिकारणनाशाद्द्रव्यनाशे स्वतन्त्राः परमाणवः प्रच्यन्ते। तत्र कदाचित् समानादग्निसंयोगादेकजातीयं विलक्षणाच्च परस्परविलक्षणं रूपमुत्पद्यते। पुनर्भोगादृष्टसहकृत ईश्वर एव सृष्ट्यादाविव द्व्यणुकादिक्रमेण पूर्ववदेव तादृशरेखोपरेखासंस्थानवत् करोति। तथा च परमाणुरूपात् द्व्यणुके ततस्त्र्यणुक इति क्रमेण कुलालनिर्मित घट इव तत्रापि रूपाद्युत्पत्तिरिति भवति। परमाणावेव पाकजरूपं रसगन्धस्पर्शा न द्व्यणुकादाविति। घटादावेव पाकाभ्युपगमे कठिनघटादिमध्यभागे वह्न्यप्रवेशान्मध्ये पूर्वरूपादिनाशः नवीनोत्पत्तिर्न स्यातामिति काणादाः। नैयायिकास्तु घटादयः सच्छिद्राण्येव द्रव्याणि। कथमन्यथा भाण्डान्तर्गतोदनादिपाकः कथं वा तन्मध्यवर्त्तिजलस्पन्दनश्रवणे तथा च तद् द्वारा प्रविष्टवह्निना मध्येऽपि पाकसम्भवाद् गौरवग्रस्तनिष्प्रमाणकपूर्वनाशनबीनोत्पत्तिकल्पनं तदुत्पादनायेश्वरे भारं च न सहते। तथा च तन्मते घटादावपि पाकजं सिद्ध्यति। ननु संयोगस्योभयनिष्ठत्वाद् घटादावपि वह्नावपि रूपरसादयः कुतो न भवन्तीति चेत् सत्यम्। समवायेन पाकजरूपं प्रति पृथिवीत्वेन हेतुत्वात् वह्नेस्तेजस्त्वात्। ननु मतद्वयेप्यग्निसंयोगादेकस्माद्विलक्षणाभिन्नाश्च रूपादयः कथम्। प्रागभावभेदादिति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चेन्न। तस्य वैलक्षण्याप्रयोजकत्वात्। अन्यथा घटानामपि पटादिवत्परस्परवैलक्ष्यण्यानापत्तिरिति चेन्न। रूपवति घटे रूपान्तरानुत्पत्तेः रूपं प्रति रूपं प्रतिबन्धकमिति सर्वसिद्धम्। एवं रसादावपि। तथा च प्रतिबन्धकाभावरूपतत्तदभावकारणभेद-वैलक्षण्याभ्यां भेदवैलक्ष्ण्ये द्वित्वत्रित्वादिजद्व्यणुकत्र्यणुकाणुत्वहस्वत्व-दीर्घत्वमहत्वेष्वप्येवमेव भेदादिः। केचित्वग्निसंयोगभेदमाहुः। तेषामणुत्वादौ गतिश्चिन्त्या। इदमेव पृथिवीत्वजातौ प्रमाणम्। ननु स्पर्शपाकजत्वे किं मानम्। नहि रूपरसादिवत्पाकोत्तरस्पर्शान्तरमनुभूयते। न च चाण्डालस्पर्शनिषेधगोब्राह्मणस्पर्श-विहितविध्यनुपपत्त्या तत्सिद्धिरित्याचार्यैरूक्तं युक्तम्। तत्र स्पर्शपदस्य संयोगपरत्वात्। अन्यथा गङ्गास्पर्शविधिकर्मनाशाजलस्पर्शनिषेधानुरोधाज्जलेऽपि दीपाग्निस्पर्शनिषेध-परमेश्वरार्त्तिक्यदीपस्पर्शविधेरनुरोधात्तेजसि तत्सिद्ध्यापत्तेरिति चेन्न। पूर्वं कठिनस्य पाकेन कोमलतायाः पूर्वं कोमलस्य पाकेन काठिन्यस्य चानुभवसिद्धत्वेन रूपादिवत् पाकजत्वसिद्धेः। न च काठिन्यकोमलत्वे संयोगविशेषौ चाक्षुषत्वापत्तेः। एते रूपरसगन्धस्पर्शा उद्भूतानुद्भूतभेदाद द्विधा उद्भूतत्वं जातिस्तदभावोनुद्भूतत्वमिति प्राञ्चः। अनुद्भूतत्वं जातिस्तद्भावोद्भूतत्वमिति मणिकारः।

संख्यात्वजातिमती संख्या। एकत्वद्वित्वबहुत्वभेदात्त्रिधा। सकलद्रव्यवृत्तिः। तत्रावयवगतैकत्वेनावयविन्येकत्वं जन्यते। द्वित्वादौ तु विशेषः घटद्वये चक्षुरादिसंयोगे सति तत्रायमेकोऽयमेक इति अपेक्षाबुद्ध्या द्वित्वोत्पत्तिरनन्तरं द्वित्वद्वित्वत्वनिर्विकल्पकं ततः सविकल्पकमनन्तरमिमौद्वाविति प्रतीतिर्भवति। तत्र घटद्वयं वृत्त्येकत्वद्वयसमवायि-कारणम्। अपेक्षाबुद्धिर्निमित्तकारणम्। द्वौ घटौ समवायिकारणे एवं बहुत्वेऽपि अपेक्षाबुद्धिनाशाद् द्वित्वादिनाशः। अत एवापेक्षाबुद्धिः क्षणत्रयस्थायिनी। अन्यथा द्वित्वविशिष्टप्रत्यक्षायोगात्। तद्भिन्नज्ञानेच्छाप्रत्यत्नादयस्तु द्विक्षणस्थायिन एवेति सिद्धान्तः। परमाणुद्व्यणुकादिगतद्वित्वत्रित्वादेर्भगवदपेक्षाबुद्ध्योत्पन्नस्य च निमित्तकारणा-दृष्टनाशान्नाशः। नन्वयमेक इत्यादित्रयादिविषयापेक्षाद्वयोः द्वित्वं त्रिषु त्रित्वमित्यादिनियमः कुतस्तद्वैपरीत्यस्य दुर्वारत्वात् समवायिकारणादिसाम्ये कार्यं वैलक्षण्यं वा कथम्। न चैकत्वे द्वयं द्वित्वे त्रयं त्रित्वे हेतुरिति वाच्यम्। एकत्वे द्वित्वाद्यभावाद् द्वित्वोत्पत्तेः प्राग् द्रव्येऽपि तदभावात् द्वित्वे द्रव्यद्वयं हेतुरित्यस्याप्यसम्भवात्। न च प्रागभावादेस्तदुपपत्तिरिति आचार्योक्तं युक्तम्। तस्य वैलक्षण्याप्रयोजकत्वात् अन्यथा कार्यं वैलक्षण्यात् कारणवैजात्यकल्पनोच्छेदापत्तिरिति चेत्। उच्यते केवलापेक्षाबुद्ध्या द्वित्वं द्वित्वसहितायाः त्रित्वं तत्सहितया च चतुष्ट्वमित्यभ्युपगमात्। द्वित्वं द्वयोरेव कुत इति चेत्। तत्रैव तत्प्रागभावसत्वादिति गृहाणु परिमाणत्ववत्परिमाणम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सकलद्रव्यवृत्ति तच्चतुर्विधम्। अणुमहद्दीर्घह्रस्वभेदात्। तत्रोत्कृष्टाणुत्वह्रस्वत्वे परमाणुमनसोर्नित्ये अपकृष्टे द्व्यणुके एव महत्वदीर्घत्वे उत्कृष्टे नित्ये आकाशादौ विभुत्व शब्दवाच्ये। अपकृष्टे जन्येतरतमभावेन त्र्यणुकादौ स्त: विल्वादामलकमण्विति व्यवहारस्तु अपकृष्टमहत्त्वात् गौण:। एवं प्रांशोर्वा मनो ह्रस्व इत्यपि अपकृष्टदीर्घत्वाद् गौण:।

तत्र द्व्यणुकपरिमाणं परमाणुद्वित्वसंख्यायोनि:। द्व्यणुकगतबहुत्वात्त्र्यणुके महत्वम्। घटादौ च कपालमहत्वं क्वचित् क्वचिद् बहुत्वसंख्याविलक्षणमहत्वे हेतु:। तूलपिण्डपरिमाणविशेषे अवयवप्रचय: कारणम्। स च प्रशिथिल: संयोग:। घट: पटात्पृथगिति अनुभवसिद्ध पृथक्त्वत्वजातिमत्पृथक्त्वम्। तदपि संख्यावदेव सर्वद्रव्यवृत्ति:, एक पृथक्त्वद्विपृथक्त्वादिभेदेनानेकधा। अवयवगतैकपृथक्त्वा-दवयविन्येकपृथक्त्वमुत्पद्यते रूपं रसात् पृथगिति तु भिन्नत्वात् गौण: प्रयोग:। ननु भेदेनैव घट: पटात्पृथगिति व्यवहारोपपत्तौ पृथक्त्वाख्यगुणे किं मानमिति चेत्। अत्राचार्या: अन्यारादितरर्त्ते इति व्याकरणसूत्रेण पृथक्त्ववाचकपदयोगे विधीयमान-पञ्चम्यनुरोधेन तत्स्वीकारात्। महाभाष्ये अन्य इत्यर्थग्रहणमभ्युपेत्य तदर्थवाचकेतरादि-पदयोगेऽपि पञ्चमीसिद्धेस्तस्य सूत्रे प्रत्याख्याततत्वात्। भेदस्यान्यपदार्थत्वेन विवक्षणे च तद्वाचकपदयोगाद् विशेषाद् घटादन्यो विलक्षण इत्यादाविव घटो नेत्यत्रापि पञ्चम्यापत्ते:।

संयुक्तावित्यनुभवसिद्धसंयोगत्वजातिमान्संयोग:। सर्वद्रव्यवृत्ति: स त्रिविध:। अन्यतरकर्मज: उभयकर्मज: संयोगजश्च निष्क्रियस्य स्थाणो: क्रियावता पक्षिणा सह आद्य:, मल्लयोर्मेषयोर्वा द्वितीय:। अङ्गुलितरूसंयोगात्कायतरूसंयोगोऽन्त्य:। सोऽयं संयोगो द्विनिष्ठ: घटपटौ संयुक्ताविति प्रत्ययात्। घटे पटस्य पटे घटस्यान्य एव संयोग:।।

अन्यथा घट: पटसंयुक्त इतिवत् घटो घट संयुक्त इत्यपि प्रतीत्यापत्ते:। तथाचैकवृत्येव संयोग इति मीमांसका:।

घटपटौ विभक्ताविति प्रतीतिसिद्धविभागत्वजातिमान् विभाग:। सकलद्रव्य-वृत्ति:। संयोगज: हिमवद्विंध्यौ विभक्ताविति प्रयोगस्तु संयोगाभावयोगाद् गौण:। शेषं पूर्ववत् परत्वजातिमत्परत्वम् तद् द्विविधम्। कालिकं दैशिकं च। आद्यं जन्यद्रव्ये एव द्वितीयं मूर्त्त एव। इयत्तावछिन्नपरिमाणं मूर्त्तत्वमुच्यते तदाश्रयो मूर्त्तम्। तथाहि युवस्थविरपिण्डयोरयमस्माद्बहुतरतप नपरिस्पन्दाश्रय:। अयमस्मादल्पतपनपरिस्पन्दाश्रय

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति बुद्ध्या परत्वापरत्वे जन्येते। तयैव अयमस्मात् पर इति।

अयमस्मादपर इति धीरुत्पद्यते एतदेव ज्येष्ठत्वम्। कनिष्ठत्वञ्च तत्र तपनक्रियायाः पुरूषे सम्बन्धघटको महाकालोऽभ्युपेयते। एवं व्यवहितसन्निकृष्टयो पिण्डयोरयमस्मात् स्वल्पतरसंयुक्तः संयोगवान्। अयमस्माद्बहुतरसंयुक्तसंयोगवानिति ज्ञानाद्दैशिके परत्वापरत्वे जन्येते। तयोरेवायमपरोऽयं पर इति धीरुत्पद्यते तत्र तावद्देशसंयोगसंक्रामिका महादिगभ्युपेयते।

गुरुत्वत्वजातिमद् गुरुत्वम्। प्रथमपतनासाधारणकारणम्। पृथिवीजलवृत्तिः। अतीन्द्रियं पतनानुमेयमित्युदयनाचार्याः। अधोदेशावच्छेदेनप्रत्यक्षमेव तदिति लीलावतीकारः। द्रवत्वत्वजातिमत्त्वं द्रवत्वम्। पृथिव्यादित्रयवृत्तिः। तद् द्विविधम् सांसिद्धिकं नैमित्तिकं च। तत्र स्वाभाविकं जले करकादौ चादृष्टविशेषात् घनीभावात् प्रतिबन्धकमात्रम्। वस्तुतोऽस्त्येव क्षणोत्तरमुपलम्भात्। लाक्षासुवर्णादावग्निसंयोगनिमित्ता–ज्जायमानमन्त्यम्।

स्नेहः संग्रहरूपकार्यानुमेयो गुणः जलमात्रवृत्तिः। घृततैलादावुपष्टम्भक–जलभागगतः।

बुद्धित्वजातिमती बुद्धिः। सा द्विधा स्मृतिरनुभवश्च। स्मरामीत्यनुभव–सिद्धिजातिमती स्मृतिः। सा च पूर्वानुभवजन्यसंस्कारजेति वक्ष्यते। अनुभवामीत्यनु–भवसिद्धजातिविशेषोऽनुभवत्वम् इत्येके। अनुमित्यादावनुभवामीत्यप्रतीतेः प्रत्यक्ष एव तथानुभवाच्चानुभवसिद्धम् अनुभवत्वं प्रत्यक्षमेव। प्रकृते तु स्मृतिभिन्नज्ञानत्व–मेवानुभवत्वम् इत्यपरे सेयं बुद्धिर्द्विधा। मिथ्या प्रमा च। असद्विषयिणी मिथ्या। शुक्ताविदं रजतमिति बुद्धौ शुक्तिरजतत्वयोः प्रसिद्धयोरलीकस्यैव समवायस्य विषयीकरणादिति वाचस्पतिमिश्राः। आचार्यादयस्तु असतोभानासम्भवाच्छुक्तौ प्रसिद्धरजतत्वस्येव तत्समवायस्यरोप एव मली मिथ्यात्वम्। घटे रूपमित्यस्य वारणाय विशेष्यावृत्तीति नोक्तम्। असम्बद्धत्वं तु तत्र नास्तीति नातिव्याप्तिः। सा त्रिधा संशयविपर्ययतर्कभेदात्। एकस्मिन् धर्मिणि विरोधविषयकनानार्थावमर्शः संशयः। यथास्थाणौ स्थाणुर्वा पुरुषो वायमिति। अत्र पुरुषत्वं तत्सम्बन्धश्च तत्र नास्तीति भवत्यसद्विषयत्वम्। स चायं त्रिधा साधारणधर्मदर्शनजोऽसाधारणधर्म्मजोविप्रतिपत्तिजश्च स्थाणुपुरुषसाधारणोत्वदर्शनज आद्यः। नित्यानित्येभ्योव्यावृत्तं शब्दत्वादिदर्शनजः शब्दो नित्योऽनित्यो वेति द्वितीयः। वादिविरुद्धवाक्याज्जायमानस्ततो द्रव्यं वेत्यादितृतीयं प्रतियोगिव्यधिकरणतदभाववति तत्प्रकारको निर्णयो विपर्ययः यथा शुक्ताविदं रजतमिति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रजतत्वाभाववत्यां शुक्तौ तन्निर्णयोऽयं भवत्येव। व्याप्यारोपप्रयुक्तोव्यापकारोपस्तर्क:। यथा यदि निर्वह्निं स्यान्निर्धूमं स्यादित्यादि:। वह्न्यभावो व्याप्यस्तदारो–पप्रयुक्तोव्यापकधूमाभावारोपो नास्ति। स्वप्नस्तु संशयविपर्ययात्मकं स्मरणमेव। दोषवशात्तदिति स्थाने इदमिति ग्रहणमिति नैयायिका:। वैशेषिकास्तु तर्कस्याहार्यविपर्ययत्वात्तं पृथग्गणयन्त: संशयविपर्यय स्वप्नानध्यवसायभेदेना–विद्याचतुर्धेत्याहु:। मन: संयोगजं ज्ञानं स्वप्न:। अविदितवरपदार्थदर्शनात्किमेतदिति धीरनध्यवसाय:। न चायं संशय: नानाकोट्यनुल्लेखात्। प्रमा च यथार्थानुभव:। अबाधितार्थविषयं ज्ञानं यथार्थम्। स्वविषयसम्बन्धेन विशेषणवद्विशेष्यविषयकत्वमित्यर्थ:। तथा च रक्त: पट इति परम्परया प्रमा न समवायेन। सा च प्रमाप्रत्यक्षात्मिकैवेति चार्वाका:। अनुमितिरपीति कणादाप्तसुगता उपमितिरपीति न्यायैकदेशिन:। शाब्दपीति नैयायिका:।। अर्थापत्तिरपीति प्राभाकरा:। अनुपलब्धिरपीति भाट्टा:। सांभवैतिह्यरूपापीति पौराणिका:। एतादृशप्रमाकरणं च प्रमाणम्। करणत्वं चासाधारणकारणत्वम्। असाधारणत्वं च व्यापारवत्त्वम्। तथा च चक्षुरादिकमेव प्रत्यक्षादिकरणम् इत्येके। आचार्यास्तु अव्यवधानेन कार्योत्पादकत्वमसाधारणत्वं तथा च चक्षु:संयोगादिकं प्रत्यक्षे करणम्। लिङ्गपरामर्शरूपं तृतीयं ज्ञानमेवानुमितावित्याहु:। कारणत्वं चानन्यथासिद्धनियत पूर्ववृत्तित्वम्। यथा घटे दण्डत्वादे: दैवादागतरासभस्य तन्तुरूपस्य च वारणाय क्रमेण पदत्रयमिति प्राञ्च:। वस्तुतस्तु नियतपदं न देयमेव रूपवद्रासभस्यान्यथासिद्धत्वेनैव वारणात् अन्यथासिद्धत्वं चावश्यकल्प्यमानपूर्ववर्त्तिन एव कार्यसम्भवे तत्सहचरितत्वं रासभसत्वेऽपि दण्डचक्रादेरावश्यकत्वात्तैरयमन्यथासिद्ध एवेति तत्वम्। तथा च प्रमाकरणं चार्वाकमते एकं निर्विकल्पकं च वैशेषिकाणां द्वयमित्यादि: सिद्ध्यति। तथा हि साक्षात्करोमीति प्रतीतिसाक्षिकजातिविशेषवज्ज्ञानं प्रत्यक्षम्। तद्द्विधा नित्यमनित्यं च। नित्यं भगवत: तत्सर्वविषयं प्रमा च। अनित्यं जीवानां तद्द्विधा। सविकल्पकम् निर्विकल्पकं च। घटोऽयं दण्डीत्यादिशब्दाभिलापयोग्यं विशेषणविशेष्यवैशिष्ट्यावगाहि वा- सविकल्पकम्। तत्कारणत्वेन कल्प्यमतीन्द्रियं विशिष्यशब्दाभिलापयोग्यं वैशिष्ट्यानवगाह्यम्। तद्यथा दण्डीपुरुष इति ज्ञाने दण्डो विशेषणं पुरूषो विशेष्य: संयोग: सम्बन्ध इति तदवगाहितज्ज्ञानं सविकल्पकम्। तद्दण्डज्ञानमन्तरेण नोत्पद्यत इति दण्डज्ञानजन्यम्। यथा सुप्तोत्थितस्य जायमाने घट इति ज्ञाने घटत्वं विशेषणं घटो विशेष्य: समवाय: सम्बन्ध इति तदवगाहितत्सविकल्पकघटत्वं ज्ञानजन्यं वाच्यम्। तत्कारणीभूतं ज्ञानं चानुभवाना–स्पन्दत्वादतीन्द्रियं निर्विकल्पकमभिधीयत इति। नास्तिकास्तु निर्विकल्पकमेव प्रमा स्वलक्षणवस्तुविषयत्वात्। तच्च सूर्यादिवत्स्वप्रकाशं न तु घटादिवत्परं प्रकाश्यम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सविकल्पकं न प्रमा। अलीकघटत्वाद्यवगाहित्वात् बन्ध्या पुत्र इति ज्ञानवदित्याहुः। तन्नेति वक्ष्यते। तच्च प्रत्यक्षं पश्यामि जिघ्रामि आस्वादे स्पृशामि शृणोमि मनसा सुखं साक्षात्करोमीति प्रतीतिसाक्षिकचाक्षुषत्वादिजातिषट्कभेदात्षोढा। तत्करणं चक्षुरादिः तैर्विषये गृह्यमाणे विषयेण सह सन्निकर्षावान्तरव्यापाराः। ते च संयोगसंयुक्त– समवायसंयुक्तसमवेतसमवायसमवायसमवेतसमवायविशेषणताज्ञानलक्षणा– सामान्यलक्षणायोगजधर्मलक्षणा चेति नव। षडाद्याः लौकिकाः। अन्ये त्रयोऽलौकिकाः। तत्र मनसा जायमाने अहमित्यात्मप्रत्यक्षे मनः करणम्। आत्मप्रत्यक्षं फलम् आत्ममनः संयोगो वान्तरव्यापारः। सम्बन्ध इति यावत् अन्ये तु तज्जन्यस्तज्जन्यजन– कोऽवान्तरव्यापारः। भवति चात्ममनः संयोगो मनोजन्यस्तज्जन्यज्ञानजनकश्चेति व्यापारः। न चाजन्ये शब्दसमवाये अव्याप्तिः। तस्य व्यापारत्वास्वीकारात्। शब्दस्यैव स्व प्रत्यक्षे व्यापारत्वात्। यद्वा श्रोत्रमनः संयोग एव शब्दस्य तदत्यन्ताभावादेश्च प्रत्यक्षे व्यापारः। तस्य श्रोत्रजन्यत्वात् प्रत्यक्षजनकत्वाच्चेति वदन्ति। सुखादिग्रहे संयुक्तसमवायः मनः संयुक्ते आत्मनि सुखस्य समवायात् सुखसमवेतसुखत्वादिग्रहे संयुक्तसमवेतसमवायः। एवं घटादिग्रहे चक्षुषः स्पर्शनस्य वा संयोगः। रूपादौ संयुक्तसमवायः। रूपत्वादौ संयुक्तसमवेतसमवायो द्रष्टव्यः। द्रव्यप्रत्यक्षमात्रे इन्द्रियसंयोगस्य शब्देतरद्रव्यसमवेतग्रहे संयुक्तसमवायस्य तत्समवेतग्रहे तृतीयस्य हेतुत्वस्य सामान्यतः स्वीकारात्।

ननु चक्षुषो गोलकविशेषरूपस्य घटादिसंयोगः प्रत्यक्षबाधितः। कथमासत्तिरिति चेन्न। तत्तद्गोलकाधिष्ठितानामिन्द्रियाणामतीन्द्रियाणामभ्युपगमात्। गोलकादिरूपत्वे चासम्बन्धग्राहकत्वमभ्युपेयम्। तथा च पृष्ठभागीयाः पुरोवर्तिनो भित्यादिव्यवहिताश्च पदार्था गृह्येरन् व्यवधानं प्रतिबन्धकमिति चेन्न। भित्यादिपरभागस्थितानां पदार्थानां परावृत्यदर्शने पृष्ठदेशे स्वस्य च प्रत्यक्षं न स्यात्। तत्पुरुषीयतत्कालीनप्रत्यक्षं प्रत्येव प्रतिबन्धकत्वकल्पने चातिगौरवम्। तस्मादावश्यकमतीन्द्रियमिन्द्रियम्। नन्वेवं शाखाचन्द्रमसोस्तुल्यकालग्रहणं न स्यात्। किञ्च नेत्रोन्मीलने प्रहराद्यवधिसूर्यचन्द्रग्रहणार्थं विलम्बापत्तिः चक्षुषस्तावद्दूरंगमनकल्पनादिति चेन्न। अतिलाघवादतिशीघ्रं तावद्दूरगमनाद्विशेष्याग्रहस्याश्रुतद्रव्यादप्रतीतेश्चोपपत्तेः। तदुक्तम् अचिन्त्यो हि तेजसो लाघवातिशयेन वेगातिशयः। यत् प्राचीनाचलचूडावलंम्बिन्येव भगवतिमयूषमालिनि भवनोदरेष्वालोक इत्यभिमानो लोकानामिति दिक्।

समवायेन शब्दग्रहः, श्रोत्रसमवायस्य शब्दे सत्वात्। शब्दत्वकत्वादिग्रहे समवेतसमवायः। विशेषणतयाऽभावग्रहः। शब्दो नास्तीति श्रोत्रे शब्दाभावस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विशेषणतास्त्येव। भूतलरूपादौ घटाभावग्रहे चक्षुःसंयुक्तविशेषणतासंयुक्त–समवेतविशेषणतेत्यादिः द्रष्टव्यम्। कवेः काव्यरचनामूलभूते विशिष्टज्ञाने मनसा जायमाने विशकलितपदार्थस्मरणरूपं न सन्निकर्षः। अन्यथा तत्र सन्निक–र्षाभावेनातीन्द्रियातीतानागतपदार्थवैशिष्ट्यज्ञानासम्भवात्। घटत्वसामान्य–लक्षणप्रत्यासत्त्यप्यनागतव्यवहितसकलज्ञानोत्पत्तौ सामान्यं प्रत्यासत्तिः। अन्यथा एतादृशो घटपदवाच्य इत्येकत्र बोधिते सर्वत्र घटे तद्ग्रहो न स्यात्। क्षणमात्रम् ऋषिस्तस्थौ सुप्तमीन इव ह्रद इत्याद्यभियुक्तोक्त्या योगिभिः सर्व साक्षात्कारात्तत्रान्त्या। योगाभ्यासेन जातौ दृष्टविशेषयोगजधर्म इत्युच्यते।।

।। **अथानुमानं निरूप्यते**। अनुमिनोमीत्यनुभवत्वजातिविशेषवत्यनुमितिः।। तत्कारणमनुमानम्। तच्च ज्ञायमानं लिङ्गमिति प्राञ्चः। तथाहि यद्धर्मावच्छिन्न–समानाधिकरणा यावन्तो यत्साध्यतावच्छेदकविशिष्टसमानाधिकरणास्तत्साध्य–सामानाधिकरण्यविशिष्टधर्मत्वं व्याप्तिः। तदाश्रयोधूमादिर्लिङ्गम्। तस्मिल्लिङ्गे यत्र धूमस्तत्र सर्वत्र वह्निरिति भूयोदर्शनात् धूमत्वावच्छिन्नधूमसमानाधिकरणाः सर्वे महानसत्वादयो वह्नित्वावच्छिन्नवह्निसमानाधिकरणास्तादृशवह्निसामानाधिकरण्य–विशिष्टधूमत्ववान्धूम इति व्याप्तिज्ञानम्प्रथमञ्जायते। ततोऽपूर्वपर्वतादौ धूमदर्शनन्द्वितीयञ्ज्ञानं जायते। ततो वह्निव्याप्यधूमवानयमिति तृतीयज्ञानमुत्पद्यते। तदेव लिङ्गपरामर्शः। तत्र लिङ्गपरामर्शत्वेन परामृश्यमानलिङ्गत्वेन वा कारणतेत्यत्र विनिगमकाभावादुभयमपि द्वारद्वारिभावेन हेतुः। लिङ्गङ्करणम्परामर्शो द्वारं व्याप्तिज्ञानन्तु परामर्शे विशेषणज्ञानत्वेनोपयुज्यते। ततो यम्पर्वतो वह्निमानिति साध्यवह्नि–विशिष्टज्ञानरूपानुमिति र्भवतीति। मणिकारास्तु अतीतानागतलिङ्गेनापि अनुमितिदर्शनान्न लिङ्गस्य करणत्वङ्किन्तु व्याप्तिज्ञानङ्करणम्परामर्शो व्यापार इत्याहुः। स्मरणात्म–कपरामर्शादसन्निकर्षहेतुकेप्यनुमितौ तत्र व्याप्तिज्ञानस्य पूर्वपरामर्शतज्जन्यसंस्कारै–र्व्यवधानान्न करणत्वं सम्भवतीति संस्कारसाधारणपरामर्शजनकत्वेनैवानुमिति–करणमिति नव्याः। जनकत्वं हि कारणत्वं तच्चान्यथासिद्धनियतपूर्ववृत्तित्वं पूर्ववर्त्तित्वञ्च प्रागभावावच्छिन्न समयवृत्तित्वम्। अतिगौरवग्रस्तमिति नैतेन रूपेण कारणता। किन्तु मन एवानुमितिकरणम् परामर्शो व्यापारः। उक्तञ्च प्रमेयभाष्ये स्मृत्यनुमित्यादिकरणत्वेन मनः साधितमिति नव्याः। ज्ञानत्वेनैवानुमितिकरणता। परामर्शविशेषकारणमिति नातिप्रसङ्ग इत्यपि केचित्। न च व्याप्तिग्रहे सति महानस एवानुमीयतां वह्निव्याप्यधूमवानयमिति परामर्शस्य तत्रापि सम्भवादिति वाच्यम्। पक्षताया अस्यानुमितिहेतुत्वात्। अनुमितीच्छाभावविशिष्टसाध्यनिर्णयाभावो हि पक्षता। महानसादौ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चानुमितीच्छाविरहसहित एव साध्यनिर्णयोस्तीति न पक्षता। तत्रैवानुमितिर्भवत्विति इच्छायां पक्षतासम्पत्तये अनुमितीच्छाभावविशिष्टेति विशेषणम्। तथा च पुरुषे सत्यपि दण्डाभावान् दण्डिपुरुषाभाववत् साध्यनिर्णये सत्यपि इच्छाविरहरूपविशेषणा–भावात्तादृशनिर्णयाभावरूपा पक्षता भवति। साध्यसंदेहः पक्षता तदुक्तं भाष्येनानुपलब्धेन निर्णीतेऽर्थे न्यायः प्रवर्त्तते अपि तु संदिग्धेऽर्थे इति मते च तत्रानुमितिर्न्न स्यादिति। तन्न युक्तं किन्तु धूमो वह्नि व्याप्यो धूमवान् पर्वत इति ज्ञानद्वयमेव हेतुरस्तु। कुतः परामर्शोऽपीति मीमांसककन्दलिकारयोर्मतम्। धूमो वह्निव्याप्यः आलोकवान् पर्वत इति ज्ञानादप्यनुमानापत्तेः धूमे व्याप्तेः आलोके पक्षधर्मतायाश्च ज्ञानसत्वात्। न चैकत्र हेतौ तदुभयावगाहिज्ञानं करणमिति वाच्यम्। धूमो वह्निव्याप्यः द्रव्यवान् पर्वत इति ज्ञानादप्यनुमित्यापत्तेः द्रव्यत्वेन धूमस्यैव पक्षवृत्तित्वाभावात् न चैकेन धूमत्वेन रूपेण व्याप्तिपक्षधर्मताज्ञाने हेतूवह्निव्याप्यवान्पर्वत इति आप्तवाक्यज–परामर्शादनुमित्यनापत्तेः। तस्मात्परामर्श एवावश्यकः। सोऽयं परामर्शाव्याप्तिज्ञानक्रमेण स्वस्यैव यत्रोत्पन्न अनुमितिरपि स्वस्यैव तच्चार्थानुमानम्। यत्र तु स्वयंबुध्वा शब्देन परं बोधयति तत्परार्थानुमानम्। तत्र प्रतिज्ञाहेतूदाहरणोपनयनिगमनाख्याः पञ्चावयवाः। तत्र पर्वतो वह्निमानिति साध्यविशिष्टपक्षबोधकं वचनं प्रतिज्ञा कुत इत्याकांक्षाशमकं धूमादिति पञ्चम्यन्तं लिङ्गवचनं हेतुः। धूमोऽस्तु वह्निर्मास्तु इत्याशंकाशमकं यत्र धूमस्तत्रवह्निर्यथा महानस इत्यादिसव्याप्तिकं दृष्टान्तवचनमुदाहरणम्। हेतूदाहरणाभ्यां पर्यवसितव्याप्तिविशिष्टपरामर्शजनकं तथा चायं वह्निव्याप्यधूमवानयमिति पक्षे साध्योपसंहाररूपं तस्मात्तथेति वाक्यं निगमनम्। एतदेव प्रतिज्ञोपदेश–निदर्शनानुसन्धानप्रत्याम्नायशब्देन वैशेषिकैरूच्यन्ते। अपदेशे हेतुः। शेषं क्रमेण ज्ञेयम्। मीमांसकास्तु त्रय एवावयवाः प्रयोज्याः। उदाहरणं तास्तदाद्या इत्याहुः। न च परार्थानुमाने शाब्दबोधात्मक एव साध्यनिर्णयो नानुमितिरिति वाच्यम्। वादिवाक्यस्याप्रामाण्यशंकास्कन्दितत्वेन निर्णयाजनकत्वात्। पञ्चावयवपूर्त्यनन्तरं मनसा बाधकाभावप्रतिसन्धाने सति वादिकारित व्याप्तिज्ञानादिवशान्मानस परामशोत्तरमनुमित्यभ्युपगमादिति दिक्। तदिदं लिङ्गत्रिविधम्। केवलान्वयिकेवल–व्यतिरेकि–अन्वयव्यतिरेकिभेदात्। तत्र वृत्तिमदत्यन्ताभावाप्रतियोगी साध्यसाधको हेतुः केवलान्वयी। यथेदं वाच्यं ज्ञेयत्वाद्द्रव्यत्वादित्यादिः। अनवगतसाध्यसाधनसहचारो हेतुः केवलव्यतिरेकि यथा आकाशः पृथिव्यादिसर्वेभ्यो भिद्यते शब्दवत्त्वादिति अत्र शब्दस्य पृथिव्यादिभेदे साहचर्यं न क्वापि दृष्टं किन्तु यत्रेतरत्वं तत्र शब्दो नास्तीति इतरभेदाभावशब्दाभावयोरेव सामानाधिकरण्यमवगतम्। अतो व्यतिरेकयोः साध्याभावहेत्वभावयोरेव व्याप्तिग्रहात्केवलव्यतिरेकि। न च शब्दे हेतौ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्याप्त्यग्रहादितरभेदव्याप्यशब्दवानयमिति परामर्शासम्भवेन कथमत्रानुमितिरिति वाच्यम्। ययोरभावयोर्व्याप्तिर्विना बाधकं तयोरपीति तर्कसहकृतमनसा हेतावपि साध्यव्याप्तिग्रहणं परामर्शसम्भवात्। यद्वा साध्याभावव्यापकाभाव प्रतियोगि हेतुमानयमित्येव व्यतिरेकिणि परामर्श:। ततोऽनुमितिं यत्र साध्यहेत्वोस्तदभावयोश्च व्याप्तिर्गृह्यते सोऽह्यन्वयव्यतिरेकी। यथा यत्र धूमस्तत्र वह्निर्यत्र वह्न्यभावस्तत्र धूमाभाव इतिं उभयत्र सहचारग्रहाद्धूम–सहचरिता: सर्वे वह्निसहचरिता वह्न्यभावसहवरिता: सर्वे धूमाभावसहचरिता इति ग्रहाद्धूमादि: तद् व्याप्तिबोधनप्रकारस्तु प्राचीनैरुक्त:

अन्वये साधनं व्याप्यं साध्यं व्यापकमिष्यते।
साध्याभावोन्यथा व्याप्यो व्यापकसाधनात्यय:।
व्याप्यस्य वचनं पूर्वं व्यापकस्य तत् परम्।
एवं परीक्षिता व्याप्ति: स्फूटीभवति तत्त्वत॥

इति तत्रान्वयव्यतिरेकिणि पक्षधर्मत्वं सपक्षे सत्वं विपक्षाद्यावृत्तिरबाधित–विषयत्वमसत्प्रतिपक्षत्वञ्चेति पञ्चरूपाणि अपेक्षितानि। केवलव्यतिरेकिणि सपक्षाभावात्तद्भिन्नानि चत्वारि। केवलान्वयिनि विपक्षाभावाद्विपक्षव्यावृत्तिभिन्नानि चत्वारि तत्र प्रागुक्तपक्षतावान्पक्ष: पर्वतादि:। निर्णीतसाध्यहेतुसहचारक: सपक्ष: निर्णीतसाध्याभावको विपक्ष:। विषय: साध्यं तस्या बाधितत्वं बाधाभावो यस्य हेत्वोस्तत्त्वम्। सत्प्रतिपक्ष: साध्याभावसाधको हेतुस्तदभावोऽसत्प्रतिपक्षत्वम्। एतादृशरूपशून्या हेतुवद्भासमानत्वाद् हेत्वाभासा: स चासिद्धविरुद्धानैका–न्तिकप्रकरणसमबाधिता: पञ्च। तत्रासिद्धस्त्रिधा। आश्रायासिद्ध: स्वरूपसिद्धो व्याप्यत्वासिद्धश्च:। यत्र पक्षतावच्छेदकं पक्षे नास्ति स आद्य: यथा गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत्। अत्र पक्षतावच्छेदकं गमनीयत्वं प्रसिद्धे अरविन्दे तन्नास्तीत्याश्रयासिद्धत्वम्। पक्षे हेतु स्व रूपाभाव: स्वरूपासिद्ध:। यथा जलं रसवत् गन्धवत्वादिति। व्याप्त्याभाववान् व्याप्यत्वासिद्ध:। यथा पर्वतो वह्निमान्नीलधूमादिति। अत्र नीलत्वस्य व्यर्थत्वं न व्यर्थविशेषणत्वात् तदवछेदेन व्याप्त्यभावाद्व्याप्यत्वासिद्धे:। साध्य व्यापकाभावप्रतियोगी हेतुर्विरुद्ध:। वह्निमान् ह्लदत्वात् गगनाद्वेति यथा। व्यभिचार्यनैकान्तिक:। प्रतियोगिव्यधिकरण–साध्याभाववद्वृत्तित्वम्। साध्यासमानाधिकरणधर्मसमानाधिकरणत्वम्। वा व्यभिचार:। तद्वान् व्यभिचारी। स त्रिधा। साधारणो असाधारणोऽनुपसंहारी च। विपक्षवृत्ति: साधारण:। यथा पर्वतो धूमवान्वह्नेरिति। विपक्षे अय: पिण्डे वह्निरस्त्येव। सपक्षविपक्ष व्यावृत्तोऽसाधारण: यथा शब्दो नित्य शब्दत्वादिति। सपक्षे गगने विपक्षे घटादौ च

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हेतुर्नास्त्येव। अतो व्यतिरेकव्याप्त्या साध्यतदभावसाधनत्वाविशेषात्संदेहोपादकत्वात् दूषणमयम्। अवृत्तिसाध्यसाधकोऽनुपसंहारी। आकाशवान्धूमादिति यथा। तुल्यबलसाध्याभावसाधकहेत्वन्तरसहितः सत्प्रतिपक्षः। यथा शब्दो अनित्यः कृतकत्वात् घटवत्। शब्दो नित्यो व्योमैक गुणत्वात् परिमाणादित्यत्र पक्षे साध्याभावनिर्णयो–बाधस्तथाविधो बाधितः। उत्पत्तिकालीनो घटो गन्धवान् पृथिवीत्वादिति। तत्र प्रमाणान्तरेण गन्धाभावनिर्णयाद्बाधितः।। एतेषां सत्प्रतिपक्षासाधारणौ विशेषाग्रहणदशायामेव हेतोराभासत्वापादकत्वादनित्यदोषौ। साक्षादनुमितिप्रतिबन्धकौ स्तः। यदा तु तर्कादिना प्रमाणान्तरेण व्याप्त्याद्ये कत्र निर्णीतं बाधाभावश्चास्ति तदा दोषज्ञापनाच्च। शेषास्तु नित्यदोषाःबाधान्ये व्याप्त्यादिविघटकाश्चेति तज्जनकज्ञानविघटकत्वेन दोषा इति नैयायिकाः। वैशेषिकास्तु विरुद्धासिद्ध संदिग्धास्त्रयो हेत्वाभासाः। विरुद्धासिद्धसंदिग्धमलिङ्गकाश्यपो ब्रवीदिति भाष्यात्। अनेनासिद्ध–विरुद्धसंदिग्धानध्यवसितानामनपदेशत्वमुक्तं भवतीत्यपि भाष्याच्चत्वारो वा। तत्रासिद्धश्चतुर्धा। उभयासिद्धोन्यतरासिद्धः स्वरूपासिद्धोऽनुमेयासिद्धश्चशब्दः नित्यः सावयवत्वादित्यादाः। कार्यत्वादिति द्वितीयः। बाधितः तृतीयः। विरुद्धः प्रागुक्त एव साधारणोप्यनैकान्तिकः साध्यतदभावसहचारेणोभयसंदेहजनकत्वात् संदिग्धः। शब्दो नित्यः शब्दत्वादित्यनध्यवसितः साधारणधर्मदर्शनविप्रतित्योरेव संशयजनकत्वेनास्य प्राचीनेनान्तर्भावादित्याहुः। हेत्वाभासानामेकज्ञानेऽन्यस्याज्ञानेऽनुमान दूषणसम्भवात्। सर्वेऽपि स्वान्तंत्र्येण दूषणानि तेन क्वचित् क्वचित् सम्मीलनेऽपि नैकेना–परान्यथासिद्धः शंक्या व्यभिचारोन्नायकत्वेन परम्परोपयोगान्न हेत्वाभासान्तरमु–पाधिः यद्धर्मविशिष्टसाध्यव्यापकत्वं तद्धर्मविशिष्टसाधनाव्यापकत्वं च तदत्र क्षणम्। अस्तीदं धूमवान्वह्नेरित्यत्रार्द्रेंधने भवति हि द्रव्यत्वविशिष्टो यत्र धूमस्तत्रार्द्रेन्धनम्। द्रव्यत्वविशिष्टो यत्र यत्र वह्निस्तत्रतन्नास्तीति द्रव्यत्वविशिष्टसाध्यव्यापकं तद्विशिष्ट–साधनाव्यापकं च। एवं गर्भस्थो मित्रातनयः श्यामः मित्रातनयत्वात्पूर्वोत्पन्नवदित्यत्र शाकपाकजत्वमुपाधिः। अत्रापि मनुष्यत्वावच्छिन्नं यत्र यत्र श्यामत्वं तत्र शाक पाकत्वं मनुष्यत्वावच्छिन्नं यत्र यत्र मित्रातनयत्वं तत्र तत्र शाकपाकजत्वं च नास्तीति भवति लक्षणसमन्वयः। एवं वायुः प्रत्यक्षः प्रमेयत्वादित्यत्रापि वह्निर्द्रव्यत्वावच्छिन्न–साध्यव्यापकं तदवच्छिन्नसाधनाव्यापकमुद्भूतरूपवत्त्वमुपाधिरित्यलं पल्लवेन। ननु अनुमानं न प्रमाणम्। नाप्यनुमितिः प्रमान्तरा यत्र धूमस्तत्र वह्निरिति बहुशो दर्शनाद् धूमवतानेन पर्वतेन प्रीयेण वह्निमता भाव्यमिति सम्भावनात एवानुमिति–कार्यनिर्वाहादिति चेन्न।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वह्निमनुमिनोमीत्यनुभूयमानजातिविशेषस्य तदाश्रयानुमितेस्तत् कारणत्वेनानु–भूयमानपरामर्शस्य चापलपितुमशक्यत्वात्। तत्रैव प्रवृत्या विषयलाभे सति जातं ज्ञानं प्रमेति प्रमात्वग्रहाच्च। विना बाधकं तदन्यथात्वस्य कल्पयितुमशक्यत्वादिति दिक्। उपमिनोमीत्यनुभवसिद्धजातिविशेषवत्युपमितिस्तत्करणमुपमानम्। तत्त्रिधा। सादृश्यविशिष्टपिण्डज्ञानं वैधर्म्यविशिष्टपिण्डज्ञानमसाधारणधर्मविशिष्टपिण्डज्ञानञ्च। तद्यथा गवयादिशब्दः क्वचित् शक्त इति जानता कीदृगगवय इत्यारण्यके पृष्टे गोसदृशो गवय इति तेन निवेदिते कालान्तरे अरण्यं गतस्य तत्पिण्डदर्शनाद् सदृशोऽयं पिण्डः। एतादृशश्च गवयशब्दार्थ इत्याप्तेनोक्तं तस्मादयं गवयशब्दवाच्य इत्युपमितिर्जायते। तत्र गोसदृशोऽयं पिण्ड इति सादृश्यविशिष्टपिण्डज्ञानं करणम्। वाक्यार्थस्मरणमवान्तव्यापारः। उपमितिः फलम्। एवं कीदृशोऽश्व इति पृष्टे गवादिश्च द्विशफः स्वल्पपुछश्चनेति आप्तोत्कानन्तरं तत् पिण्डदर्शनादयं द्विशफः स्वल्पपुछवदिति ज्ञानादाप्तवाक्यार्थस्मरणोत्तरमयमश्वशब्दवाच्य इत्युपमितिज्ञानम् उत्पद्यते। तत्र वैधर्म्यविशिष्टपिण्डज्ञानं करणं वाक्यार्थस्मरणं व्यापारः शक्तिज्ञानं फलम्। एवं कीदृश उष्ट्र इति प्रश्ने कण्टकाशी अतिदीर्घग्रीव इत्याप्तवाक्यस्मरणोत्तरं कालान्तरे तद्धर्मविशिष्टपिण्डदर्शनाद्वाक्यार्थस्मरणे सति उष्ट्र शब्द वाच्योऽयमिति वाच्यवाच–कभावग्रहो भवति। सोऽयमुपमितिफलम्। तद्धर्मविशिष्टधर्मिप्रत्यक्षं करणम्। वाक्यार्थस्मरणं व्यापारः। एवं कीदृशौषधी सर्पविषहन्त्रीति प्रश्ने नकुलदंष्ट्राधृतेत्याद्युत्तरिते कालान्तरे नकुलदंष्ट्रायामोषधिविशेषदर्शने सति एतादृशी सर्पविषहन्त्रीति ज्ञानमुत्पद्यते। तत्रैतादृशविषहन्त्रीति ज्ञानं फलं वाक्यार्थस्मरणमवान्तरव्यापारः। नकुलदंष्ट्राधरण–रूपासाधारणधर्मविशिष्टपिण्डज्ञानं करणमित्यूत्ह्यम्। एवं चोपमानत्वावच्छेदेन शक्तिग्राहकत्वमिति प्रतारणं परास्तम्। न चाप्तवाक्यस्मरणाच्छाब्दबोध एवास्तु कुतः पृथगुपमानाभ्युपगम इति वाच्यम्। शरीरवृत्यश्वत्वोष्ट्रत्वादिजातिविशेषरूपेण शब्दाच्छक्तिबोधासम्भवात्। सादृश्यमवच्छेदकीकृत्य वाक्यस्य बोधकत्वात्। उपमिनोमीत्यनुव्यवसायाच्चेति नैयायिकाः। वैशेषिकास्तु अयं गवयशब्दो वाच्यः गोसदृशत्वादित्यनुमानात्तद्ग्रहः। आप्तवचनाच्च तथा व्याप्तिग्रहात्। उपमिनोमीत्यनु–व्यवसायश्च संदिग्धः। सत्वे वा अनुमितित्वव्याप्यमेव तदस्तु तथा च न पृथक् प्रमाणमित्याहुः।

शब्दात्प्रत्यमीत्येनुभवसिद्धशाब्दत्वजातिमती शाब्दी। तत्करणं शब्दप्रमाणं तथाहि। घटं नय पटमानयेत्यादि प्रयोज्यप्रयोजकं वाक्यं श्रुत्वा एव बालस्यावापोद्वापाभ्यां घटपटादिव्यवहारं पश्यतस्तद्व्यवहारेण तदीयं ज्ञानमनुमितस्तज्जनकत्वेनान्वयव्यतिरे–

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

काभ्यां शब्दमवगच्छतोऽसम्बद्धस्याबोधकत्वात् सम्बन्धोऽस्तीत्यनुमितिर्भवति स च सम्बन्धः शक्तिरुच्यते। एवमुपमानात्कोषादिभ्यस्तदनन्तरमन्यत्रापि तद्ग्रहः एवं घटादिपदग्रहे सति गृहीतशक्तिकपदात्पदार्थोपस्थितावाकांक्षायोग्यतादिसहकारिव–शाच्छाब्दप्रमा जायते। सा फलम्। पदान्येव ज्ञायमानातिकरणानि पदज्ञानं वा करणं पूर्ववत्। पदजन्यपदार्थोपस्थितिरवान्तरव्यापार इति ज्ञातव्यम्। ननु गवादिपदानां वृद्धव्यवहारेण सन्निहितगवि शक्तिग्रहेऽपि देशान्तरीयापूर्वगोबोधः कथम्। तत्र शक्त्यग्रहात्। शक्तिग्रहस्य कारणत्वाभावेऽन्यथागोशब्दादश्वबोधापत्तिरिति चेन्न। सामान्यलक्षणप्रत्यासत्त्या सकलगोव्यक्तेः शक्तिग्रहसमय एवोपस्थितौ सर्वत्रैव जात्यादिविशिष्टे तद्ग्रहेणादोषात्। तथा चन्यायसूत्रम् व्यक्त्याकृतिजातयस्तु पदार्थ इति। एकवचनेन विशिष्टे शक्तैक्यं सूचयति।

मीमांसकास्तु गोत्व एव शक्तिः तदाश्रयत्वेन लक्षणया व्यक्तिबोध इत्याहुः। गव्येव शक्तिर्न तु गौरवात्। नापि गोत्वे एव शक्तिर्गविगोत्वेऽपि लक्षणेति युक्तम्। गामानयेत्यत्रैव वृत्तिद्वयकल्पने गौरवात्। न चैवं गोपदाद् गोत्वबोधो न स्यादिति शक्यम्। अकार्यत्वेऽपि घटत्वस्य कार्यतावच्छेदकत्वात्कार्यत्वसम्बन्धेन दण्डात् घटोपस्थितौ घटत्वभानवदशक्यत्वेऽपि शक्यतावच्छेदकत्वाच्छब्दादुपस्थितिसम्भवादिति वैयाकरणाः। नन्वेवमपि गौः शुक्लेत्यादौ पदार्थयोरभेदरूपोऽन्वयो न बुध्यते तत्र शक्त्यभावात् अशक्यस्याप्युपस्थितौ घटादिरपि तत्र बुध्येतेति चेत् सत्यम्। अशक्यस्याप्यन्वयस्याकांक्षायोग्यतावशात् भानसम्भवात् तथाहि यत्पदं यत्पदार्थेन सह यादृशान्वयबोधजनकं तत्पदस्य तेन समभिव्याहारस्ततो बोधे आकाङ्क्षा। घटादिपदं विरुद्धविभक्तिरहितप्रातिपदिकार्थेन सहाभेदान्वयमेव बोधयति। द्वितीयाद्यर्थकर्मत्वादिभिः सह निरूपकत्वमाश्रयाश्रयिभावं वा अतस्तादृशपदसमभि–व्याहारो भवत्याकाङ्क्षा एतज्ज्ञानं च कारणम्। घटपदं द्वितीयाद्यर्थेन सहस्वार्थभेदान्वयबोधकमिति ज्ञानवतो वैयाकरणस्य तथान्वयबोधात्। अन्यस्याभावाच्च एवं योग्यता एकपदार्थे अपरपदार्थस्य प्रकृतसंसर्गवत्त्वम्। तेन पयसा सिञ्चतीति योग्यम्। पयसि सेककरणतासत्त्वात्। वह्निना सिञ्चतीति न योग्यं तत्र सेककरणत्वाभावात्। देवदत्तो गौरित्यत्र देवदत्ते स्वामित्वरूपसम्बन्धसत्वाद्योग्यतापत्तेः प्रकृतेत्युक्तम्।

तथा च प्रकृतवाक्ये यः प्रतिपाद्यः सम्बन्धस्तद्वत्त्वमित्यर्थः स चात्राभेदः स च नास्तीति न तद्योग्यम्। एवमासत्तिः पदजन्यपदार्थोपस्थितिरेव अतः प्रत्यक्षेण तण्डुलदर्शनात् पचतीत्येवोक्ते तण्डुलं पचतीति न बोधः। पदाव्यवधानमासत्तिरिति प्राचीनमत्तं न युक्तम् गिरिर्भुक्तमाग्निमान् देवदत्तेनेत्यत्र योजनयान्वयबोधानापत्तेः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

योजनावाक्यादेवान्वयबोध इति चेन्न। प्रथमवाक्यस्य काव्यादौ योजनासापेक्षस्याबोधकत्वप्रसङ्गात्। योजनावाक्यं च तात्पर्यग्राहकत्वेन प्रकरणादिवदुपयुज्यते। एवं चाकाङ्क्षा योग्यतासत्तिवशात् पदार्थानां परस्परविशेषणविशेष्यावगाहिविशिष्ट–शाब्दबोधसम्भवान्नानुपपत्तिरितिदिक।

मीमांसकास्तु कार्यान्विते पदानां शक्ति:। तथाहि प्रयोज्यप्रयोजक–योरानयननयनादिव्यवहारं पश्यतो बालस्यानयननयनादिकार्यत्वेन ज्ञात्वाहं प्रवर्त्ते। एवमभयमपि तथात्वेन ज्ञात्वा प्रवृत्तस्तज्ज्ञानं च शब्दादिति शब्दस्तद्विशिष्टे शक्त इति प्रथमं शक्तिग्रहात्। तथा च कार्यतासामान्यस्य सर्वशब्दादवगमेऽपि विशेषतस्तदुपस्थितिं विना बोधपर्यवसानाभावादबोधकत्वमेव तच्छून्यानामर्थ–वादवाक्यवेदान्तवाक्यानामित्याहु:।

वेदान्तितस्तु अन्विते पदानां शक्तिरित्यन्वयांशे बोधोपपत्ति: न तु कार्यत्वांशे सर्वपदानां शक्ति: तस्य विशेषतस्तद्बोधकपदादेवोपस्थितिसम्भवेन व्यर्थगौरवग्रासात्। अत: कार्यत्वांशं विनापि मोक्षरूपमहाप्रयोजनवदात्मस्वरूपबोधकत्वाद्वेदान्ता: प्रमाणमेवेत्याहु:। पदानां पदार्थेष्विव वाक्यस्य संसर्गरूपेऽन्वये शक्ति:। अत एव तस्य वाक्यार्थ इति किं वदन्ती संगछत इति वैयाकरणा:। व्युत्पादितं चास्माभिर्मतान्तरनिराकरणपूर्वकमेतन्मतं वैयाकरणभूषणे। नन्वेवमपि गङ्गायां घोष इत्यत्र गङ्गापदात्तीरप्रत्यय: कथम्। तत्र गङ्गापदशक्त्यभावादिति चेत् सत्यम्। लक्षणरूपवृत्त्यन्तरात्तदुपस्थिते:। अथ केयं लक्षणा उच्यते शक्यसम्बन्धो लक्षणा गङ्गापदशक्त्या गङ्गाप्रवाह: तत्सम्बन्धस्तीरेऽस्त्येव तथा च स्वशक्यप्रवाहसंयोगरूप–सम्बन्धेन गङ्गा पदात्तीरोपस्थिति:। स्वशक्येन सहनियमरूपा व्याप्तिरेव लक्षणा। तदुक्तम् अभिधेया विना भूते प्रवृत्तिर्लक्षणोच्यत इति मीमांसका:। तन्न मञ्चा: क्रोशंतीत्यत्र मञ्चपदस्य मञ्चस्थपुरुषे लक्षणा न स्यात्। मञ्चपुरुषयोर्व्याप्त्यभावात्। एवं यष्टी: प्रवेशयेत्यत्रापि द्रष्टव्यम्।

वैयाकरणास्तु गङ्गादिपदानां तीरादौ शक्तिरेव सर्वेषां पदानां प्राय: सर्वत्रैव शक्ते:। लक्षणा च स्वतन्त्रवृत्तिर्नाभ्युपैयेत्याहु:। प्रपञ्चितं चैतद्वैयाकरणभूषणे ननु केयं शक्ति:। अभिधानामकं पदार्थान्तरं सङ्केतग्राह्यमिति मीमांसका:। सिद्धान्तस्तु घटपदाद् घटो बोद्धव्य इति ईश्वरेच्छारूप: सङ्केत: शक्ति: सा च पूर्वोक्तरीत्या वृद्धव्यवहाराद् ग्राह्यवृद्धानां तद्वृद्धेभ्य इति सृष्ट्यादौ ईश्वरात्तद्ग्रह इति। आधुनिकपुत्रादिषु सङ्केतितदेवदत्तादिपदे च पित्रादिसङ्केतात् ग्राह्या। द्वादशेह्नि पितानाम कुर्यादिति शास्त्रसिद्धत्वात्तत्रापि सास्त्येवेति दिक्। एवं शब्दाच्छाब्दबोधे तात्पर्यज्ञानमपि हेतु:।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्यथा सैन्धवमानयेत्यत्र भोजनप्रकरणे लवणतात्पर्यग्रहे सति अश्वबोधप्रसङ्गात् न च शुकबालादीनां तात्पर्याभावेन तदुच्चरितशब्दाद् बोधो न स्यादिति वाच्यं तत्रापीश्वरतात्पर्यसत्त्वात्। तच्च तात्पर्यं वेदे मीमांसान्यायगम्यं नियतम्। लोके तु वक्तुरिच्छाधीनमनियतम् तदा कस्मादेव शब्दात् श्लेषादिवाक्येष्वनेकार्थबोधः यथा श्वेतो धावतीत्यादौ। नन्वेवमपि

गच्छ गच्छत्वितिवेत्कान्तपन्थानः सन्तु ते शिवाः।
ममापि जन्म तत्रैव भूयार्यत्रगतोभवान्।।

इत्यत्र त्वद्गमने सति वियोगान्मे प्राणहानिरिति प्रतीतिः कथमिति चेत्। व्यञ्जनाख्यवृत्यन्तरात्तद्बोध इत्यालङ्कारिकाः। एवं गतोस्तमर्क इत्युदासीनवाक्येपि नानाविधास्तत्तत्पुरुषीयबोधा एवमेव सङ्गच्छन्तेति।

दार्शनिकास्तु अनुमितिरूपाः लक्षणया शब्दाद्वा ते बोधो सम्भवतीति व्यजनारव्यवृत्यन्तरकल्पनां न सहन्ते। नन्वेवमपि भाषाशब्देभ्यः कथमर्थबोधः तत्र शक्तिलक्षणयोरभावादिति चेन्न तैः संस्कृतस्मरणं ततो बोध इत्यभ्युपगमात् इति केचित् संस्कृतस्मरणं ततो बोध इत्यभ्युपगमात् इति केचित् संस्कृतकथमप्यविदुषां बोधान्नैवम्। किन्तु तेष्वेव शक्तिभ्रमाद् बोध इति नव्याः। संस्कृतवद्भाषा शब्दा वाचका एवेति वैयाकरणमतं तु भूषणेऽस्माभिः प्रपञ्चितम्। एवं च भाषाव्यावृत्तं वृत्तिमत्त्वमेव साध्यक्त्वमिति मीमांसकादिमतम्। अर्थविशेषे व्याकरणव्युत्पाद्यत्वं तदिति तु नैयायिकाः साधनेव प्रयुञ्जीतेति वचनसिद्धं पुण्यजनकत्वं तदिति वैयाकरणा इत्यलम्पल्लवेन। नन्वेवमपि पदज्ञानमेव न सम्भवति। वर्णसमूहः पदं वर्णाश्च क्रमिकाद्विक्षणिकाश्च तथा च द्वितीयवर्णोच्चारणसमये पूर्वनष्ट इति कथं समुदायज्ञानम्। यत्तु प्रत्येकं तत्तद्वर्णैऽर्नुभवोत्तरम् ते समूहालम्बनरूपं सकलवर्णस्मरणमेव पदज्ञानमिति। तन्न एवं सति तत्र क्रमाभावात् सरोरसः जराराजनदीदीनेत्यादावविशेषप्रसङ्गादिति चेत्। उच्यते प्रथमं श्रोत्रे घकारज्ञाने सति तदुत्तरमकारज्ञाने जायमाने स्वाव्यवहितोत्तरत्वसम्बन्धेन पूर्वो वर्णो विशेषणतया भासते ततष्टकारे घकार–विशिष्टोऽकारो विशेषणम्। सोऽपि पूर्वद्वय विशिष्टः स्वोत्तरस्मिन्निति भवति पदज्ञानम्। तस्मात्पदार्थोपस्थितिस्तत उक्तप्रकारेण पुनः पदान्तरज्ञानं ततस्तदर्थोपस्थितौ तयोः परस्परम् अन्वयबोधः। पुनः पदान्तरज्ञानं ततः पदार्थोपस्थितौ तस्याप्यन्वयबोध इत्येवं क्रमेण अवान्तरवाक्यार्थज्ञानपूर्वको महावाक्यार्थबोध इति राजपुरप्रवेशन्यायेन केचनाहुः। तदुक्तम् तद्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते तेन तेनान्वितः स्वार्थः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पदैरेवावधार्यत इति तु बोध्यम् (इदं तु बोध्यं लाक्षणिकं नानुभावकं तत्तदर्थविषयकशाब्दबोधं प्रति वृत्या तदुपस्थापकपदज्ञानत्वेन हेतुगौरवाच्छक्ति–लक्षणान्यतरस्य वृत्तित्वात् शक्त्यातदुपस्थापकपदज्ञानत्वेन हेतुत्वे लाक्षणिकपदजबोधव्यभिचारः स्यादिति तत्तदर्थविषयकशाब्देतरान्वयप्रतियोग्यु–पस्थापकपदज्ञानत्वे हेतुत्वं वाच्यम्। उपस्थापकत्वं च शक्त्या इत्थं च गङ्गायां घोष इत्यत्र तीर बोधस्तीरान्वयप्रतियोग्युपस्थापकाधारत्ववाचकसप्तमीज्ञानादेवेति निष्कर्षः।) अन्ये तु सर्वेषां पदानां प्रथमं प्रत्यक्षं ज्ञानात् सर्वपदा॰ समूहालम्बनस्मरणं ततस्तदर्थानामपि समूहालम्बनरूपोपस्थितौ सत्यां पुनः प्रथममेव महावाक्यार्थबोधः। खले कपोतन्यायेवेत्याहुः। सोऽयं शाब्दबोधश्चतुर्धा विशेष्ये विशेषणं तत्र विशेषणान्तरमित्येकः। रक्तदण्डवानिति यथा पुरुषे दण्डः तत्र रूपं विशेषणं। विशिष्टस्य वैशिष्ट्यावगाह्यन्यः यथा रक्तदण्डवानित्यत्रैव रक्तत्वविशिष्टस्य दण्डस्य वैशिष्ट्यबोधे एकत्र द्वयमिति न्यायेनान्यः। दण्डी कुण्डलीदेवदत्त इति यथा। एकविशेषणविशिष्टे विशेषणान्तरवैशिष्ट्यावगाह्यपरः। खड्गीशूर इति यथेति विस्तरस्तु गाथान्तरादवधेयः।।

।। अर्थापपमीत्यनुभवसिद्धजातिविशेषवत्यर्थापत्तिस्तत्कारणमर्थापत्ति–प्रमाणम्। तच्चानुपपत्तिज्ञानम्। तथाहि देवदत्ते पीनत्वं दिवा भोजनाभावं च जानतो रात्रिभोजनज्ञानं जायते। तंन्न प्रत्यक्षात् सन्निकर्षाद्यभावेनानुपलम्भात्। नानुमानात् तस्या सम्भवात् अयं रात्रि भोजी पीनत्वादित्यस्यादि वा मात्रभुञ्जानेऽपि व्यभिचारित्वात् दिवा अभुञ्जानत्वे सति पीनत्वादित्यत्र दृष्टान्ताभावेन व्याप्त्यग्रहादनुमित्ययोगात् तस्माद्दिवा अभुञ्जानस्य पीनत्वान्यथानुपपत्या रात्रिभोजनज्ञानं जायते सेयमर्थापत्तिरिति प्राभाकराः। देवदत्तो रात्रि भोजी दिवा अभुञ्जानत्वे सति पीनत्वात् यत्र रात्रिभोजनाभावस्तत्र दिवा अभुञ्जानत्वे सति पीनत्वाभाव इति व्यतिरेकिणैव निर्वाहान्न पृथगर्थापत्तिः प्रमाणमिति वैशेषिकनैयायिकादयः।। ।। अनुपलब्ध्या जानामीत्यनु–भवसिद्धजातिविशेषवत्यनुपलब्धिकरणमनुपलब्धिः। सा चोपलब्धेर्निर्णयात्मकज्ञान–स्याभावः। तथाहि वस्तुतो घटाभाववति घटोऽस्तीति भ्रमसमये घटाभावेन सह सन्निकर्षे सत्यपि तज्ज्ञानं नोत्पद्यते। अतस्तत्र घटानुपलब्धिः करणं तदभावान्न तत्र ज्ञानम्। चक्षुरादिकं चाधिकरणादिग्रहणार्थमनुपलब्धेर्योग्यतासम्पादनार्थं चोपयुज्यते योग्यता च यद्यत्र घटः स्यात् उपलभ्येतेति तर्कसम्पतिरेवेति भाट्टाः। एतादृश्यनुपलब्धिः प्रत्यक्षसहकारिण्येवातो नानुपलब्धिः प्रमाणान्तरम्। पृथक् प्रमाणान्तरकल्पने गौरवादिति नैयायिकादयः। वस्तुतो घटवति घटाभावनिर्णये सति घटचक्षुःसंयोगे सत्यपि घटज्ञानानुत्पत्तेरभावानुपलब्धेरपि भावग्रहहेतुतापत्तिः। न चेष्टापत्तिरपि सिद्धान्तात्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रमाणाभावाच्च विवेचितं चैतदन्यत्र तस्मान्नानुपलब्धिः सहकारिणी न वा प्रमाणान्तरमिति तत्त्वम्। सम्भावनया जानामीति प्रतीतिसिद्धजातिमती साम्भवी तत्करणं सम्भवः। यथा ब्राह्मण इति श्रुते विद्यायाः शतं सन्तीत्युक्ते दशादिसंख्यायाः प्रतीतौ (सम्भवः)। अज्ञातकर्तृकं प्रसिद्धं वाक्यमैतिह्यम्। गङ्गेयं मथुरेयं वेदीयति ज्ञानमैतिह्यादेव अन्यस्याप्रसरादिति पौराणिकाः। ब्राह्मणविद्या भविष्यतीति चोत्कटकोटिकः संशय एव शते दशे इति त्वनुमानम्।

तथा व्याप्तिज्ञानवतामेव ज्ञायमानत्वात् ऐतिह्यं च प्रमाणं च शब्द एव। अन्यथा प्रमाणमेव नेति दार्शनिकाः। एतादृशचेष्टयेत्थमर्थो बोद्धव्य इति सङ्केतित चेष्टातो बोधस्थले च तथा शब्दोपस्थितिस्ततो बोधः शाब्द एव। अन्यथात्वेतादृश्या चेष्टयानुमानमेवेति न हस्तनेत्रादिचेष्टातो बोधानुरोधाच्चेष्टाया अपि पृथकप्रमाणत्वमपीति तान्त्रिकाः।। तदेतैः प्रमाणैर्जायमाना बुद्धिरनित्यैव मानसप्रत्यक्षा च जानामीति मनसानुभवात् प्राभाकरास्तु सर्वा बुद्धिः स्वप्रकाशत्रितयविषयिणी च आत्मा स्वात्माविषयश्चेति त्रयं घटमहं जानामीति सर्वज्ञानानुभवात्। ज्ञानस्य परप्रकाश्यत्वे तदपि परप्रकाश्यं तदपि परप्रकाश्यमित्यज्ञायमानज्ञानस्वीकारादन्धपरं परानिद्राद्यभावो वा स्यादित्याहुः। भाट्टास्तु ज्ञानेन विषये ज्ञातता जन्यते, ज्ञातो घट इत्यनुभवात्, धात्वर्थक्रियाजन्यफलशालित्वेन घटं जानातीत्यादौ कर्मत्वमप्येवमेव सङ्गच्छते, तथा च तया ज्ञानमनुमीयते घटो ज्ञानविषयो ज्ञाततावत्त्वादिति, एवं चातीन्द्रियं ज्ञानमित्याहुः। एवं स्वप्रकाशविधया ज्ञाततया वा ज्ञाने गृह्यमाणे तद्गतं याथार्थ्यरूपप्रामाण्यमपि गृह्यते, ज्ञानग्राहकसामग्री ग्राह्यत्वरूपस्वतस्त्वस्य तत्राभ्युपगमात् इति। मीमांसकाः। नैयायिकास्तु एवं सति जातं मे ज्ञानं प्रमा नवेति संशयानुपपत्तेर्नेदं युक्तं, किन्तु मनसा ज्ञानं गृह्यते पुनर्विषयलाभोत्तरं जातं ज्ञानं प्रमाफलवत्प्रवृत्तिजनकत्वादित्यनुमानात्तद्ग्रहं मीमांसकानामर्थविसम्वादप्रयुक्ता प्रामाण्यग्रहवत् अन्यथा तस्यापि स्वतो ग्राह्यत्वापत्तिश्च इति ज्ञानग्राहकविशेषग्राह्यत्वरूपं परतः प्रामाण्यमाहुः। भक्तिश्रद्धादयोऽपि बुद्धिभेदाः। तत्राराध्यत्वेन ज्ञानं भक्तिः। वेदबोधितफलावश्यं भावनिर्णयः श्रद्धेत्यन्यत्र विस्तरः। सुखत्वजातिमद्धर्म्ममात्रजन्यतावच्छेदकजातिमद्वान्निरूपाधिप्रेमास्पदं वा सुखं तच्चतुर्विधम्। वैषयिकं मानोरथिकमाभ्यासिकाभिमानिकं च विषयसाक्षात्कारजमाद्यं विषयध्यानजं मांनोरथिकं, सूर्यनमस्काराद्यभ्यासाज्जायमानं शरीरलाघवादिरूपं तृतीयं, द्रव्यपाण्डित्यगर्वजमन्त्यम्। एवं दुःखेऽपि द्रष्टव्यम्। दुखत्वजातिमतनिरूपाधिद्वेषास्पदं वा दुखम्। इच्छामीत्यनुभवसिद्धेच्छात्वज़ातिमती इच्छा, सा च सुखमोक्षयोः सुखदुःखाभावत्वप्रकारज्ञानादुत्पद्यते। तत्साधने सुखदुःखाभावसाधनताज्ञानादेव स्त्रीपुत्रादौ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सन्यासादौ च यथा, द्वेष्मीत्यनुभवसिद्धजातिमान् क्रोधापरपर्यायको द्वेषः। यते इत्यनुभवसिद्धयत्नत्वजातिमान् यत्नः। स द्विधा, जीवनयोनिरन्यश्च, जीवनादृष्टं योनिः कारणं यस्य स आद्यः। सर्वदा प्राणसञ्चारकारी, गुरुभारोत्तोलनधावनादौ प्रयत्नविशेषाश्वास क्रियाविशेषदर्शनाद्यविशेषयोः कार्यकारणा भावो बाधकं विना तत्सामान्ययोरपीति न्यायेन प्राणक्रियासामान्ये यत्नसामान्यजन्यं त्वद्वितीयो द्विधा, एको द्वेषजः सर्पादिभ्योः निवृत्तिलक्षणः शत्रुवधादौ प्रवृत्तिरूपस्तु न द्वेष किन्तु तन्मरणेच्छाजः इच्छाजन्यान्यः तन्निद्रादिसकलकालिकस्य तस्यावश्यकत्वात् स चातीन्द्रियः। इच्छाजन्योऽन्यः एतौ प्रत्यक्षौ। एते बुद्धीच्छाप्रयत्ना ईश्वरीया नित्याः जीवानामनित्याः। विहितयज्ञादिजन्यतावच्छेदकजातिमान् धर्मः। ताश्च ज्योतिष्टोमयज्ञादिजन्यतावच्छेदिकाविलक्षणस्वर्गादिजनकतावछेदिकाश्च तत्तददृष्टे विलक्षणाः न तु धर्मत्वमेका जातिर्मानाभावात्। धर्मत्वेन सुखत्वेन कार्यकारणभावे मानाभावादिति अत एव बाधकाभावात् विज्ञानमानन्दं ब्रह्मेति श्रुतेश्चेश्वेरे नित्यं सुखमस्तीति वेदान्तिनः। निषिद्धपरदारगमनादिजन्यतावच्छेदकजातिमान्धर्मः। धर्मत्ववदेता अपि नाना तत्तदुःखजनकतावच्छेदिकाश्च। ननु यज्ञादिजन्यातीन्द्रि–यधर्माधर्मयोः किं मानम्। उच्यते इष्टसाधनत्ववाचिना विधिना अनिष्टसाधनत्वबोध–कनिषेधेन यागपरदारगमनादेस्तथात्वं बोध्यते। न च चिरनष्टस्य कालान्तरभावि–स्वर्गादिसाधनत्वं साक्षाद्युक्तमतो व्यापारत्वेन अभ्युपेयौ न च यागादिध्वंस एव व्यापारोऽस्त्विवति वाच्यम् एवं हि कारणीभूताभावप्रतियोगित्वेन यागादेः प्रतिबन्धकत्वापत्तेः। किञ्च कीर्त्तितधर्मादपि फलापत्तिः। व्यापारसत्वात् अकीर्त्तितयागत्वेन कारणतेति न कीर्त्तितात्फलमिति चेत् न। फलोन्तरकीर्त्तितादपि फलानापत्तेरिति दिक्।

एतौ धर्माधर्मौ त्रिविधौ सञ्चितौ क्रियमाणौ प्रारब्धसंज्ञौ। तत्रैतच्छरीरारम्भकं प्रारब्धं कर्मतद्भोगैकनाश्यं जीवन्मुक्तिशास्त्रानुरोधात् आद्यं ज्ञाननाश्यं

''ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरूते तथेति शास्त्रात् इति वेदान्तिनः।

सिद्धान्तस्तु

नाभुक्तं क्षीयते कर्मकल्पकोटिशतैरपि।
अवश्यमेव भोक्तव्यंकृतं कर्मशुभाशुभमि।।

ति वचनस्य प्रायश्चित्तनाश्यव्यतिरेकेण सङ्कोचे प्रमाणाभावात् सञ्चितस्यापि कायव्यूहेन भोगादेव नाशः। भस्मसात्पदं तुलाक्षणिकं शीघ्रमेव भोगान्नाशं लक्षयतीति दिक्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

क्रियमाणं च ज्ञानिनो नोत्पद्यते लिप्यतेन सपापेन पद्मपत्रमिवांभसेति वचनात्। नन्वेवं योगिभिः क्रियमाणकर्मणो वैयर्थ्यापत्तिरिति चेन्न।

तस्य लोकसंग्रहमात्रार्थत्वात्। वस्तुतस्तु तस्य पुत्रादायमुपयन्ति सुहृदः। साधुकृत्यां द्विषतः पापकृत्यामिति भूतौ तस्य परार्थत्वं स्फुटमित्यवधेयम्।। ।। संस्कारस्त्वजातिमान् संस्कारः स त्रिधा वेगो भावना स्थितिस्थापकश्च। वेगेन गच्छतीति प्रत्यक्षसिद्धवेगत्वजातिमान् वेगः। मूर्त्तमात्रवृत्तिः। भावना च स्मृतिजनकः स्वजन्यस्मृति–नाश्यश्च संस्कारः आत्मवृत्तिरतीन्द्रियः पूर्वज्ञानजन्यः तत्र ज्ञानस्यानुभवत्वेनैव करणतेति प्राञ्चः। नव्यास्तु सकृदनुभूतस्य स्मरणोत्तरं संस्कारनाशेन पुनर्विनानुभवमस्मरणप्रसङ्गात् पुनः पुनः स्मरणादृढतरसंस्कारोत्पत्तेरनुभवसिद्धत्वात्। अनुमितिशाब्दबोधे सत्यपि स्वर्गं नरकं चानुभवामीत्यप्रतीतेरनुभवत्वजातौ प्रमाणाभावेन स्मृत्यन्यज्ञानस्य रूपस्या–नुभवत्वस्य कारणतावच्छेदकत्वे गौरवापत्तेस्ततोपि लाघवाच्च ज्ञानत्वेनैव तत्कारणतेत्याहुः। तथा च पुनः पुनः स्मरणस्थले स्मरणादेव दृढतरसंस्कारो–त्पत्तिरिति, एतेषां पूर्वानुभवतज्जन्यसंस्कार तज्जन्यस्मृतीनां समानविषयत्वमतो न घटः ज्ञानात्पटः स्मृतिः। स्थितिस्थापकश्च यथास्थितवस्तुस्थित्यानुमेयः पृथिवीवृत्तिरतीन्द्रियश्चं। शब्दं शृणोमीत्यनुभवसिद्धशब्दत्वजातिमान् शब्दः स द्विधा, ध्वनिर्वर्णश्च। तत्र ध्वनिः सङ्गीतशास्त्रसिद्धानेक भेदवान् तत्कारणं मुखवीणादिवर्णः ककाराकारादिः उभयत्राप्याकाशः समवायिकारणम्। भेर्याकाशसंयोगस्ताल्वोष्ठा–काशसंयोगवंशदलाकाशविभागादिरसमवायिकारणम्। जिह्वाताल्वादिसंयोगवंशदल–विभागादिनिमित्तकारणम्। क्वचिच्छब्दोऽपि शब्दासमवायिकारणम्। दूरभेरीताडनस्थले, तत्र भेर्याकाशसंयोगादुत्पन्नस्तारतारोनदूरस्थपुरुषीयश्रवणगोचरः। तस्य मन्दत्वेनानुभवात् किन्तु भेरीशब्दाद्वीचीतरङ्गन्यायेन कदंबमुकुलन्यायेन वा शब्दस्तस्मादन्य इत्येवं मन्दादिभावेन जायमानेषु स्वश्रोत्रावच्छिन्नोत्पन्नः स्वयं गृह्यते तेषु पूर्वशब्दो असमवायिकारणम्। स च स्ववृत्तिभेर्यादिप्रयोज्यजातिमन्तं जनयतीति भेरीशब्दो मया श्रुत इति धीर्न विरुध्यते, तथा चासमवायिकारणं त्रैविध्यात् द्विविधोऽपि त्रिधेति फलितम्। उक्तञ्च संयोगाद्विभागाच्छब्दाच्चशब्दनिष्पत्तिरिति, सोऽयं शब्दो द्विक्षणस्थायी क्षणोत्तरमनुपलम्भात्, नाशकानुरोधाच्च, स्वजन्यः शब्द एव स्वनाशकः। स चोत्पत्तिद्वितीयक्षणो पूर्वनाशयतीति सर्वे द्विक्षणस्थायिनः। अन्त्यस्य च जनकशब्दो नाशकः सुन्दोपसुन्दन्यायेनेत्यतः क्षणिक एवान्त्यशब्द इत्येके अन्त्यशब्दः उपान्त्यशब्दनाशनाश्य इति सोऽपि द्विक्षणस्थाय्येवेत्यन्ये। सर्वासाधारण्या–न्निमित्तवायुसंयोगनाश एव शब्दनाशकः। तथा च वायुसंयोगस्ततः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पूर्वक्रियानाशशब्दोत्पत्ती ततः क्रियापूर्वदेशविभागसंयोगनाशशब्दनाशा इति क्रमेण नाशाच्छब्दः चतुःक्षणस्थायीति नव्याः। सोऽयं शब्दो नित्य एव। सोऽयं गकारः शिवेनोक्तः स एव विष्णुनोच्यते, प्रहरात्पूर्वमुक्त एवेदानीमुच्यते इति प्रत्यभिज्ञानात् विभुश्च। योऽयं काश्यां हकारः श्रुतः स एव सीतावने नोच्यते इति प्रतीतिः सर्वदेशव्यापिनस्तस्यानुभवात्। विभुत्वाच्च द्रव्यमेव सः योऽयं तारो मया श्रुतः स एव मन्दः श्रूयत इति प्रतीतेस्तारत्वादिकमपि तत्र न विरुध्यत इति **मीमांसकाः**।

उत्पन्नो गकारो नष्टो गकार इति प्रतीतेरुत्पत्तिनाशवानेव शब्दः। सोऽयमित्यत्र तज्जातीयोऽयमिति भासत इति **नैयायिकाः**। तत्त्वं वैयाकरणभूषणेऽस्माभिः प्रपञ्चितम्। संयोगविभागयोरनपेक्षकारणं कर्म, स्वोत्तरभाविभावाजन्यसंयोगविभागजनकमित्यर्थः। तेन कर्मणा संयोगे जननीये सोत्तरमुत्पद्यमानस्य विभागस्य प्रतिबन्धकीभूत–पूर्वसंयोगध्वंसस्य चापेक्षायामपि न क्षतिः। विभागस्य प्रतिबन्धकाभावसम्पादक–त्वनान्यथासिद्धत्वेनाजनकत्वात्, संयोगध्वंसस्य भावत्वाभावात्। न वा समवायिकारणादेश्च पूर्वोत्पन्नस्यापेक्षितत्वे दोषः। संयोगजसंयोगे पूर्वसंयोगस्य विभागजविभागे पूर्वविभागस्य तथा प्रत्येकजनकत्वसत्वात् संयोगविभागेत्युभयमुपात्तम्। उभयजनकत्वं कर्मण एव न संयोगादिति नातिव्याप्तिः। तच्चोत्क्षेपणापक्षेपणाकुञ्चन–प्रसारणगमनभेदात् पञ्चधा, भ्रमणादयस्तु गमनभेदा एव, तच्च मूर्त्तमात्रवृत्तिः, मूर्त्तत्वेनैवत्तत्कारणत्वा। अत एव कर्म समवायिकारणतावच्छेदकतया मूर्त्तत्वं जातिरेवेति **नव्याः**। इयत्तावच्छिन्न परिमाणवत्त्वमुपाधिरेवेति प्राञ्चः। (तच्च समानानां भावः सामान्यम्। अनेकानुगतो धर्म इति यावत् कञ्च समवायेन शब्दाद्येवेति न सामान्यम्। तद् द्विधा। जातिरूपाधिश्च, तत्राद्यलक्षणं प्राञ्च आहुः।)

तच्च संयोगवेगप्रयत्नगुरुत्वद्रवत्वस्थितस्थापकासमवायिकारणकम्। धनुसंयोगादिषौ प्रथमं कर्म ततो वेगः कर्मजः ततः पुनः कर्मद्वितीयं, प्राणिगमनं तृतीयं, पतनं चतुर्थं स्पन्दनं पञ्चमं पर्णादौ द्विगुणिते यथा स्थानहेतुषष्ठं स्वजन्यसंयोगनाश्यम्। अत एव क्षणचतुष्टयस्थायिव्याप्यवृत्येवेति प्रपञ्चितमन्यत्र।

नित्यमेकमनेकसमवेतं सामान्यम्। यथा घटत्वादिः, घटत्वं नित्यमेकमनेकघटेषु समवेतं चेति लक्षणसमन्वयः। तद्विधा जातिरूपमुपाधिरूपञ्च, तत्र जातिः समवायेनैव वर्तते। उपाधिरनेकपदार्थघटितो धर्मः। यथाकारणत्वान्यथासिद्धत्वादिः। अन्यथासिद्धत्वं चावश्यकल्प्यमानपूर्ववर्त्तिन एव कार्यसम्भवे तत्सहभूतत्वं निष्कृष्टप्रागुक्तम्। प्राञ्चस्त्वन्यथाप्याहुः। यथा अन्यत्र क्लृप्तनियतपूर्ववर्त्तिन एव कार्यसम्भवे तत्सहभूतत्वं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यथा रासभतन्तुरूपादेः। अन्यं प्रति पूर्ववत्तित्वे गृहीते एवान्यं प्रति पूर्ववर्तितया गृह्यमाणत्वं वा। यथा कुलालपित्रादेः। एवं भावत्वाभावत्वेन्द्रियत्वविषयत्वादिकमपि। तत्र समवायैकार्थसमवायान्यतरसम्बन्धेन सत्तावत्वं भावत्वम्। उक्तसम्बन्धेन सत्ताभाव एवाभावत्वम्। ज्ञानजनकमनः संयोगाश्रयातीन्द्रियत्वमिन्द्रियत्वं इन्द्रियमनोयोगस्य ज्ञानजनकत्वाल्लक्षणसमन्वयः। आत्ममनो योगस्य ज्ञानहेतुत्वांदात्मन्यतिव्याप्तिर्वारणाय तीन्द्रियमिति, विषयतासम्बन्धेन साक्षात्कारवत्त्वं विषयत्वं। शरीरादौ तत्संत्वेपि न दोषः। उपधेयसंकरेऽप्युपाधेरसंस्कारात्। एवं कारणत्वावान्तरं समवायिकारणत्वम–समवायिकारणत्वं निमित्तं कारणत्वं च, समवायेन कार्याधारत्वमाद्यम्। तच्च द्रव्यमात्रवृत्तिः, द्रव्यत्वस्यैव कार्यसमवायिकारणतावच्छेदकत्वात् समवायैकार्थं समवायप्रत्त्यासत्याकारणत्वमसमवायिकारणत्वम्। यथा पटे तन्तुसंयोगस्य पटरूपे तन्तुरूपस्य वा उभयान्यकारणत्वं निमित्तकारणत्वम् यथा घटे दण्डादेः। एवं रूपरसगन्धस्पर्शस्नेहबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मशब्देषु विशेषगुणत्वम्। तच्च स्वाश्रयव्यावृत्त्यौपयिकावान्तरसामान्यवत्त्वम्। पृथिवीजलादिभ्यो भिद्यते पाकजरूपात् तेजः इतरेभ्यो भिद्यते शुक्लभास्वररूपात् उष्णस्पर्शाद् वा इत्यादिस्वाश्रयस्य व्यावर्त्तकतावच्छेदकत्वेनोपयुक्तमवान्तरजातिमत्वमस्तीति लक्षणसमन्वयः। एवं निरुच्यमानव्याप्त्याद्यपीहोदाहरणम्। नन्वेवं पृथुबुध्नोदराकारवत्त्वगन्धवत्त्वगुणाश्रय–त्वसास्नादिमत्वाद्युपाधिरेव घटः पृथिवीद्रव्यमित्यादि प्रतीत्युपपत्तेर्घटत्वादि जातौ किं मानमिति चेत्। उच्यते, कारणत्वकार्यत्वादयस्तावंत्सावच्छिन्नाः तथा च चक्रकार्यतावच्छेदकतया गन्धस्य कार्यमात्रस्य च कारणतावच्छेदकतया दानहननादिभिः पुण्यपापोत्पत्तेस्तत्कारणतावच्छेदककोटिप्रविष्टतया च घटत्वपृथिवीत्वद्रव्यत्वगोत्वादि–कमावश्यकम्। उपाधेः क्लृप्तत्वेपि गौरवेणावच्छेदकत्वासम्भवात् बाधका–भावेऽवच्छेदकत्वं लघुधर्मे एव वर्तते इति सिद्धान्तात्। एवं बाधकाभावेऽनुगतप्रतीत्यापि तत्सिद्धिः। स च बाधकसंग्रहः **प्राचीनैरुक्तः**।

व्यक्तेरभेदस्तुल्यत्वं सङ्करोथानवस्थितिः।
रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रह इति।

घटत्वात् कलशत्वं न पृथक्जातिः तद् व्यक्त्यभेदात्। द्रव्यत्वाद् गुणाश्रयत्वं न पृथक्जातिः तुल्यव्यक्तिकत्वात्। शरीरत्वं न जातिः पृथिवीत्वादिना सङ्करप्रसङ्गात्। परस्परात्यन्ताभावसमानाधिकरणयोरेकत्र समावेशः सङ्करः। पृथिवीत्वं विना तैजसादिशरीरत्वं वर्तते, शरीरत्वं विना च घटादौ पृथिवीत्वम्। तदुभयमस्मदादिशरीरे सामान्यत्वं जातिः। तत्रापि सामान्यस्वीकारेऽनवस्थाऽत्माश्रयान्यतरापत्तेः। आकाशत्वं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

घटो वा न जातिः नित्यमेकमनेक– समवेतं सामान्यमिति रूपहानात्। अत एवाभावः सास्नादिमत्वं वा न जातिः। समवाय उक्त लक्षणाक्रान्तोऽपि न जातिः संम्बन्धविरहात् सम्बन्धिभिन्नत्वे सति सम्बन्ध्याश्रयत्वस्यैव सम्बन्धत्वेन स्वरूपसम्बन्धे सम्बन्धव्यवहारस्य गौणत्वात् च स्वरूपसमवायेन वृत्तित्वाभ्युपगमेऽपि न क्षतिः इति। तच्च सामान्यं त्रिविधम्। परमपरं, परापरञ्च सकलसामान्यव्यापकपरा सत्ता यथा सामान्यान्तराव्यापकमपरम्। परिमाणभेदेन भिन्नेषु बाल्यकौमारादियुक्तशरीरेषु देवदत्तत्वादिः यथा कस्यचित्सामान्यस्य व्यापकं कस्यचिद्व्याप्यं चान्त्यम्। द्रव्यत्वादिः यथा पृथिवीत्वादेर्घटत्वादेर्व्यापकं सत्ताव्याप्यं च तत् इत्यन्यत्र विस्तरः।।

।। नित्यद्रव्यवृत्तयोन्त्या विशेषाः समानजातीयरूपरसादिमत्परमा एवादीनां परस्परं भेदकं विनाभेदनिर्णयासम्भवाद्भेदकत्वेन विशेषा अनुमीयन्ते अनित्य द्रव्येऽष्वाश्रायेणैव। भेदसम्भवात् तत्र तेषु प्रमाणाभावान्नित्यद्रव्यमात्रवृत्तित्वं तेषाम्। व्यावर्त्तकान्तराभावे सत्यं ते व्यावर्त्तकत्वेन स्वीक्रियमाणत्वादन्त्यत्वं चेति लक्षणसमन्वयः। यथा प्रजारक्षकत्वेन महाराज आवश्यकः। स च स्वत एव स्वरक्षणसमर्थः एवं विशेषाः स्वत एव व्यावृत्ता इति नानवस्था, शब्दसमवायिकारणतावच्छेदकतया चाकाशे तत्सिद्धिः। अष्टद्रव्यातिरिक्तद्रव्यत्वादिराकाशमात्रवृत्तित्वेऽपि गौरवेण कारणतावच्छेदकत्वासम्भवेन द्रव्यत्वादि जातिवत्तस्यावश्यकत्वादिति दिक्।

अयुतसिद्धानां सम्बन्धः समवायः विशेषणतान्यसम्बन्धेन यावदुभयसत्वं ययोराश्रयाश्रयिभावस्तावयुतसिद्धौ, यथा गुणगुणिनौ। पटोत्पत्तेः पूर्वं तन्तुसत्वादव्याप्तेर्वारणायोभयेति। वायुरूपाभावकालघटादेरयुतसिद्धत्ववारणाय विशेषतान्येति। अभावस्य च विशेषणतैव सम्बन्ध इत्युक्तकालोऽपि विशेषण त यैव जगदाधार इति स्पष्टमन्यत्र। प्राञ्चस्तु विनाशक्षणपर्यन्तं ययोराश्रयाश्रयिभावस्तावयुतसिद्धौ तदुक्तम्। तावेवायुतसिद्धौ द्वौ विज्ञातव्यौ ययोर्द्वयोः अनश्यदेकमपराश्रितमेवावतिष्ठते। ते चावयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति। तन्तुपटादयः। अवयवावयविनः आश्रयनाशजन्यघटादिनाशस्थले नाशसमये घटादेरनाश्रितत्वाभ्युपगमाद्विनाशक्षणपर्यन्तमिति, तन्न। नित्यगुणतदाश्रययो– रात्मात्मत्वजात्योः विशेषनित्यद्रव्ययोरव्याप्तेः अयं समवायस्तन्तुषु पटः समवेत इत्यादि प्रत्यक्षसिद्ध इति **नैयायिकाः**। **वैशेषिकास्तु** समवायो न प्रत्यक्षः यावदाश्रयप्रत्यक्षं विना सम्बन्धप्रत्यक्षासम्भवात्, सम्बन्धप्रत्यक्षे यावदाश्रयं प्रत्यक्षस्य हेतुत्वात् अन्यथा घटो संयुक्ताविवितवत् घटाकाशौ संयुक्ताविति, घटे रूपसमवाय इतिवदाकाशे शब्दसमवाय इत्यपि प्रत्यक्षापत्तेः। एतेन संयोगप्रत्यक्षे एव यावदाश्रयप्रत्यक्षं हेतुलाघवात्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न तु सम्बन्धप्रत्यक्षमात्रे, संयोगसमवायान्यतरत्वरूपसम्बन्धत्वस्य कार्यतावच्छेदककोटिप्रवेशे गौरवादिति निरस्तम्। उक्तप्रत्यक्षापत्तेर्वारणाय तस्यावश्यकत्वात्। किन्तु रूपादिघटादिसम्बन्धवत्तदाश्रितत्वादित्याद्यनुमानात् तत्सिद्धिः। न चाधाराधेयभावादिरेव रूपघटयोः सम्बन्धोऽस्त्विवति शंक्यम्। घटनाशाद् घटवृत्तिरूपरसादिनाशवत्तद्वृत्तिपटादेरभावस्य च नाशप्रसङ्गात्, घटध्वंसकालिकघटवृत्तिनाशत्वस्य घटनाशकार्यतावच्छेदकत्वपर्यवसानात्, समवायाभ्युपगमे च पटसमवेत नाशत्वमेवावच्छेदकमतो न दोषः। न च तवापि घटनाशात् घटत्वनाशापत्तिः भावनाशं प्रति जन्यत्वेन कारणत्वात्, एतेन सम्बन्धतया समवायकल्पने भूतलघटाभावादेरपि वैशिष्ट्याख्यसम्बन्धस्वीकारापत्तिरित्यपरास्तम्। तत्र तर्काभावादिति। रूपवान् घट इत्यादिविशिष्टप्रत्यक्षं तु सम्बन्धाविषयत्वेऽपि तन्नियम्यत्वमात्रेण सङ्गच्छते अहं शरीरीत्यदृष्टदृष्टसंसर्गकप्रत्ययवदित्याहुः। मीमांसकास्तु गुणगुण्यादीनां तादात्म्यमेव, नीलो घटश्च पृथक् मृद्घट इत्याद्यभेदानुभवाद् वा समवायो निष्प्रमाणक इत्याहुः। ननु शक्तिसादृश्यादयोऽपि पदार्थान्तराणि सन्तीति कथं षडेव भावा इति मैवम्। अभिधारूपा वाचकत्वशक्तिस्तावदीश्वरेच्छारूपेत्युक्तम्। वह्नौ दाहानुकूला शक्तिस्तु कारणता रूपं सामान्यमेव, न च मण्यादिप्रतिबन्धकसत्वे दाहापत्तिवारणाय प्रतिबन्कापनोद्यशक्तिस्वीकार आवश्यक इति वाच्यम्। मण्यभावादेरपि कारणत्वकल्पनया तन्निरासात्, नानृतं वदेदिति विधेयस्यानृतवदननिषेधरूपस्याभावस्य कत्वंगत्वस्य पूर्वमीमांसायां कत्वाधिकरणे व्युत्पादितत्वात्, सादृश्यं च तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वरूपं सामान्येमेवेति दिक्॥

॥ **अभावो द्विधा**, संसर्गाभावो भेदश्च, संसर्गारोपजन्यप्रतीतिविषयाभाव आद्यः। भूतले घटो नेत्याराप्येव निषेधप्रतीतेः स त्रिधा प्रागभावो ध्वंसोऽत्यन्ताभावश्च भविष्यतीति प्रतीतिविषयोर्विनाश्यभावः प्रागभावः। तस्य ध्वंसः प्रतियोगी तध्वंसश्च, उभयकाले घटप्रागभावो नष्ट इति प्रतीतेः। उत्पत्तिमान्भावो ध्वंसः। घटध्वंस जात इति प्रतीतेः। तत्प्रागभावश्च घटस्तत्प्रागभावश्च उभयत्रापि ध्वंसो भविष्यतीतिप्रतीतेः। स च न विनाशी, ध्वंसो नष्ट इति प्रतीत्यभावात्, व्यर्थध्वंसधाराकल्पनायां प्रमाणाभावाच्च, उत्पत्तिविनाशशून्यः संसर्गाभावोऽत्यन्ताभावः। ह्रदे वह्निर्नास्तीति भूतलादौ घटापसरणोत्तरं तदानयनात् पूर्वं च प्रतीतस्य घटकाले सत्वेपि न प्रतीतिः घटज्ञानेन प्रतिबन्धात् प्रतियोगिदेशान्यदेशत्वस्यानतिप्रसंजकसम्बन्धत्वाद्**द्वेत्याचार्याः**, उत्पत्तिविनाशशीलः प्रतियोगिसमानाधिकरणस्तुरीय एव तत्र संसर्गाभाव इत्यन्ये। स द्विधा, एकमात्रपर्याप्तधर्मावच्छिन्नप्रतियोगिताकः,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अनेकपर्याप्तधर्मावच्छिन्नप्रतियोगिताकश्च, घटत्वादिप्रत्येकपर्याप्तम्। एकस्मिन्नपि घट इति प्रतीतेः। तदवच्छिन्नः आद्यः। द्वित्वाद्यनेकपर्याप्तम्। घटौ द्वाविति वदेको द्वावित्यप्रतीतेः। तदवच्छिन्न एकघटवति घटौ न स्त इति प्रतीतिविषयोऽन्त्यः। न च प्रतियोगिमति कथमभाव इति वाच्यम्। पुरुषमात्रवति दण्डीपुरुषो नास्तीति प्रतीतेर्दण्डविशिष्टपुरुषाभावस्वीकारेण प्रतियोगितावच्छेदकविशिष्टस्यैवाभावविरोधित्वात्, न चेयं प्रतीतिर्दण्डाभावं पुरुषाभावं संयोगाभावं वा अवगाहते। केवलदण्डपुरुषवति तत्संयोगवति पुरुषे दण्डे च दण्डी पुरुषो नास्तीत्यनुगतप्रतीतेरिति दिक्। तादात्म्यारोपजन्यप्रतीतिविषयाभावो भेदः। घटः पटो नेत्यारोप्येव तन्निषेधात्, सोऽपि घटः पटो न घटो न घटपटाविति प्रतीतेः पूर्ववद्द्विधा, न च घटवति घटाभावो नास्ति घटो न घटभिन्न इति प्रतीतेरभावाभावोऽपि सिद्ध्येत्, एवं सोऽपि नास्तीति प्रतीत्या तदभावेऽपीत्यनवस्थेति शंक्यम्। अत्यन्ताभावाभावः प्रतियोग्येव घटादिः। अन्योन्याभावाभावः प्रतियोगितावच्छेदकघटत्वादि रूप इति स्वीकारात्। ततोऽतिरेके प्रमाणाभावादिति **प्राञ्चः। नव्यास्त्व**भावत्वेन प्रतीतेर्घटादिप्रतियोगितदवच्छेदकयोः समानवृत्तिकोऽतिरिक्त एवात्यन्ताभावभेदयोरभावः तदभावस्तु घटाभाव एवेति नानवस्था एवं ध्वंसस्य प्रागभावः प्रागभावस्य ध्वंसश्चातिरिक्त एवेत्याहुः। नन्वधिकरण–मेवाभावोऽस्तु। कुतोऽतिरिक्त स्वीकारः कुतो वा तद्ग्रहणाय विशेषणता स्वीकारः भूतले घटो नास्तीत्याधाराधेयभावस्याभेदेऽपि घटाभावे घटो नास्तीतिवदुपपत्तेः। अत्यन्ताभावे नित्यत्ववादिना घटशून्यभूतले घटानयनोत्तरं तत्सम्बन्धाभावमात्र–स्वीकारवदस्माभिस्तदा तदधिकरणे घटाभावत्वसम्बन्धो नास्तीत्यभ्युपेयम् अतस्तदधिकरणं घटाभावो न वा आद्ये घटकालेऽपि घटो नास्तीत्यापत्ति अन्त्ये घटनयनात् प्राङ्नास्तीत्यनापत्तिरिति परास्तम्। तस्मान्नतिरिक्तभावे प्रमाणम् इति चेत्, उच्यते, तत्त्वज्ञानिना क्रियमाणकर्मभिर्धर्माधर्मौनोत्पद्येते इति सर्वसिद्धतत्कस्य हेतोः। मिथ्याज्ञानवासनारूपकारणाभावादिति चेन्न। अनन्तमिथ्याज्ञानवासनानां हेतुतामपेक्ष्य प्राथमिकतत्त्वज्ञानव्यक्तिप्रागभावस्यैव हेतुत्वकल्पने लाघवात् तथा च लाघवात्कारणत्वेन प्रागभावसिद्धिः। किञ्च अन्यतरकर्मजसंयोगे कर्मणः संयोगं प्रति न समवायेन हेतुता कर्मशून्ये तदुत्पत्तेर्व्यभिचारात् नापि कालिकसम्बन्धेन घटकर्मणास्तम्भाकाशसंयोगापत्तेः। तस्मात् स्वजन्यसंयोगप्रागभाववत्ता संसर्गेण कर्मणः कारणता वाच्येति प्रागभावसिद्धिः। एवमनेकतन्तुकपटादिस्थले तत्तत्तन्तुसंयोगानामपि न समवायेन हेतुता। संयोगेभ्यो द्विमात्रनिष्ठेभ्यः पटस्याधिकेषूत्पत्तेर्व्यभिचारात्। कालिकेन हेतुत्वे तूक्तातिप्रसङ्ग इत्युक्त रीत्या स्वजन्यपटप्रागभाववत्ता संसर्गेण हेतुता वाच्येति तत्सिद्धिः। एवं दाहमण्यभावः प्रतिबन्धकाभावतया कारणम्। तस्याधिकरणस्वरूपत्वे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तावदधिकरणानां कारणत्वे गौरवात्, अभावव्यत्तिरेकेण कारणतावच्छेदकस्याधिकरणे दुर्वचत्वेन तदयोगाच्चात्यन्ताभावोऽपि लाघवादिभिर्भिन्न आवश्यक:। एवमति– रिक्तध्वंसमन्तरेण मोक्षस्येव दुर्वचत्वात् ध्वंसो आवश्यकस्तथाहि, न तावन्नित्यसुखाभि व्यक्तिर्मुक्ति:। सुखवदभिव्यक्तेर्नित्यत्वे इदानीमपि सत्त्वेन मुक्तिसंसारयोरविशेषप्रसङ्गात्। न च नित्यसुखाभिव्यक्तिर्मुक्तिसमये जायते मनसेति मतं साधु। जन्यभावस्य विनाशित्वनियमेनैक ज्ञानव्यक्तेर्नाशे मुक्तिहानापत्ते:। अभिव्यक्तिपरम्परा च जन्यज्ञानावच्छिन्ने शरीरस्य हेतुत्वेन तदभावान्न युक्ता तस्मादात्यन्तिको दु:खध्वंसो मुक्ति:। आत्यन्तिकत्वं च स्वसमानाधिकरणदु:खतत्प्रागभावासमानकालिकत्वम् तदानीं सुखदु:खध्वंसस्यास्मदीय दु:खप्रागभावसमानकालिकत्वात् स्वेत्यादि इदानीमस्मदीयदु:खध्वंसस्य सुषुप्तिकाले दु:खासमानकालिकत्वसत्वात् प्रागभावेति उपान्त्यदु:खध्वंसस्य तत्प्रागभावासमानकालिकत्वात् दु:खेति। तादृशश्च मोक्षस्तत्त्वज्ञानेनात्मनि जन्यते। तद्यथा तत्वज्ञानान्मिथ्याज्ञानवासनानिवृत्तौ रागद्वेषमोहानां निवृत्त्या कर्मान्तरे प्रवृत्तिरेव न पूर्वसंस्कारात् प्रवृत्या कर्मोत्पत्तावपि नादृष्टोत्पत्ति: अदृष्टहेतुमिथ्याज्ञानस्य तत्त्वज्ञानप्रागभावस्य वा अभावात्।। तथा चोक्तं **वाचस्पतिमिश्र:**। मिथ्याज्ञानसलिलावसिक्तायामात्मभूमौ धर्माधर्मावङ्कुरं जनयत इत्यादिना प्राचीना दृष्टं च ज्ञानाग्निसहकृतयोगवशात्कायव्यूहेनयुगपत्सर्वभोगान्नश्यति। तथा च पूर्वकर्मसमाप्तौ भोक्तव्यकर्मान्तराभावाज्जन्माभावे सिद्धे वर्त्तमानशरीरभोग्यसर्वदु:खनाशे सिद्धे वात्यन्तिकदु:खनिवृत्तिरिति तथा चाक्षपादीयं सूत्रम्। दु:खजन्मप्रवृत्तिदोषमिथ्या– ज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्ग इति।। ।। ननु किं तत्तत्त्वज्ञानं किं वा मिथ्याज्ञानं कथं वा तयोर्निवर्त्यनिवर्तकभाव:। उच्यते देहेन्द्रियादावनात्मन्यात्मत्वबुद्धिरेव मिथ्याज्ञानं, तत्तु संसारिणामनादिप्रवाहागतं दुर्बुद्धिकल्पितकुतर्का दृढतरं जायते यथा लोकायतिकोक्तयुत्तया देहात्मवादे नित्यात्मवादसाधकयुक्तिभिर्नित्याणु मन एवात्मपक्षे सकलशरीरव्यापि दु:खाद्युपलब्धिहेतुभि: सकलदेहव्यापकत्वयदीन्द्रियसमुदायात्मपक्षे इन्द्रिययौग– पद्येऽपि बुद्धिसत्वमात्रेण सुखाद्युपलब्धे: बुध्यात्मवादे, तदभावेऽपि सुषुप्तौ सात्मकत्वव्यवहारात्प्राणात्मवादे ततश्च तन्निरासार्थं पञ्चानां तेषामात्मत्वे युगपदेव कस्यचिदिष्टार्थं परस्य तद्विरोधात्तन्नाशाय च प्रकृत्यापत्या प्रवृत्तिनिवृत्त्यो: सङ्करापत्तिरित्यादि: को देहाद्यतिरिक्तव्यापकात्मनिर्णायक इतरेषां पक्षाणामा– भासत्वनिर्णायक: श्रुतिस्मृतीतिहासानां तादृगात्मप्रतिपादकानां तादृगात्मप्रतिपादने तात्पर्यनिर्णायकश्च न्यायसमूहोऽनुसन्धेय: तदनुसन्धानमेव च विचार:। स द्विधा श्रवणमननभेदात् तत्र न्यायैर्निर्णीततात्पर्यकश्रुत्यादिभिरात्मनिर्णय: श्रवणं ततोप्युक्तवादि– दुस्तर्कजालैरसम्भावनाविपरीतभावनोपत्तेस्तन्निवारकन्यायानुसन्धानं मननम्। ततश्च

CC-0. Nepal Sanskrit Academy; Kathmandu Collection

व्यासङ्गत्यागेव देहाद्यतिरिक्तात्माकारमनोऽनुसन्धानं निदिध्यासनम्। ततो यथा भूहाद्यतिरिक्तात्मसाक्षात्कारस्तत्त्वज्ञानात्मको जायते, यः समूलं मिथ्याज्ञानमुन्मूलयति, विशेषदर्शनजन्यलौकिकसाक्षात्कारत्वेन भ्रमनिवतर्कत्वदर्शनात् श्रुतिरप्येवमाह, तरति शोकमात्मवित्, आत्मा वाऽरे द्रष्टव्यः श्रोतव्योमन्तयो निदिध्यासितव्य इति मिथ्याज्ञाननाशः शोकतरणम्।

तद्धेतुरात्मदर्शनम्। तद्धेतूनिश्रवणादीनि त्रीणि इति विवेकः। नन्वात्म–तत्त्वसाक्षात्कारस्यैव मिथ्याज्ञाननाशकत्वे द्रव्यादिसर्वपदार्थप्रतिपादनं व्यर्थमिति चेन्न। तत्तत्त्वज्ञानमन्तरेण तद्भिन्नत्वेनात्मज्ञानासम्भवात् परम्परयोपयोगेन सार्थक्यात् न्यायव्युत्पादकत्वेनाप्युपयोगाच्च तच्चात्मज्ञानं भगवत्प्रसादमन्तरेण न भवतीति सोऽपितत्त्वतो ज्ञेय उपास्यश्च तथा च श्रुतिः। यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः। तदाशिवमविज्ञायदुःखस्यान्तो भविष्यतीति आचार्यैरप्युक्तं, स हि तत्त्वतो ज्ञात आत्मसाक्षात्कारस्योपकरोतीति। नन्वीश्वरे किं मानं न प्रत्यक्षं तस्य परोक्षत्वात्। नापि क्षितिः सकर्तृका कार्यत्वात् घटवदित्यनुमानं मानं परमाणावंशतो बाधात् घटादावंशतः सिद्धसाधनाच्च अदृष्टद्वाराजीवकर्तृकत्वेन सिद्धसाधनाच्च, उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्व रूपकर्तृत्वेन कुलालादेर्हेतुताया असिद्धेश्च अनेकज्ञानादौ कारणावच्छेदकत्वकल्पने गौरवापत्तेः। कृतिमत्त्वस्यैव कर्तृपदार्थत्वाच्च कृधातूत्तरतृचस्तदर्थाश्रयवाचकत्वात्। अस्तु तर्हि कृतिमत्त्वेनैव हेतुतेति चेन्न। अनेककृतिषु कारणतावच्छेदकत्वे गौरवात्तेन रूपेणापि हेतुत्वासिद्धेः। किं चैवमीश्वरे ज्ञानेच्छयोरसिद्ध्यापत्तिः। श्रुतेस्तत्सिद्धिरिति चेत् न सुखस्यापि स्वीकारापत्तेः। आनन्दं ब्रह्मणो विद्वानिति श्रूतेः। न च वेदकर्तृत्वेनेश्वरसिद्धिः। तस्यानादित्वात् शिवाद्या ऋषिपर्यन्ताः स्मर्तारोऽस्य न कारका इति स्मृतेरिति चेत्। अत्रोच्यते कुलालादि–चेतनासम्वलितमृदादिभिर्घटाद्यजननात्तत्र कुलालादेर्हेतुतेति सर्वसिद्धं, तत्र कारणतावच्छेदकं न कुलालत्वादिजातिः। कुशलब्राह्मणादिभिरपि तज्जननात्तत्र तत्सत्त्वे सङ्करापत्तेः। नोपाधिरनिर्वचनात्, घटजनकत्वस्य च दण्डादिसाधारणत्वात् घटजनकत्वेन घटहेतुताया असम्भवाच्च। कृतिमत्त्वेन हेतुतायाश्च त्वयैव निरासात्। तस्मादात्मत्वमेव कारणतावच्छेदकं परन्तु अनेनेदमेतदर्थमहङ्करिष्यामीत्याद्यालोचनरूपज्ञान–तादृशेच्छाप्रयत्नास्तद्व्यापारा अन्वयव्यतिरेकसिद्धाः। तान्विना कुलालादेर्घटा–द्यनुत्पत्तेः। अतो द्व्यणुकाद्युपादानगोचरपरमाणुभिर्द्व्यणुकं करिष्यामि आकाशेन शब्दं करिष्यामीत्यादिकज्ञानादिमानात्मा तत्कर्ता वाच्यः। स च सृष्ट्यादौ शरीराद्यभावात्ता–दृशजन्यज्ञानासम्भवान्नित्यज्ञानवान् सिध्यन्नीश्वर इत्युच्यते। एवं च कार्यमात्रकारणता–

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वच्छेकत्वेनैव जीवेश्वरसाधारणात्मत्वजातिसिद्धिरिति विभावयामः। तथा च जन्यकृत्यजन्यं कार्यम्, आत्मजन्यं कार्यत्वात्, घटवदित्यनुमानमेव तत्र प्रमाणं घटादावंशतः सिद्धसाधनवारणाय जन्यान्तं पक्षे विशेषणम्। पक्षतावच्छेदकावच्छेदेन साध्यसिद्धानुद्देश्यायामस्या दूषणत्वे च तन्नोपादेयमेव। एवञ्चेश्वरस्य सर्वज्ञतापि सिध्यति। केषाञ्चित् पदार्थानां फलत्वेन केषाञ्चित् सृज्यत्वेन केषाञ्चिद्धेतुत्वेन केषाञ्चिदवच्छेदकत्वेन विषयीकरणादिति निरूपितमस्माभिस्तर्करत्ने। एवं वेदकर्तृत्वेनापि तत्सिद्धिः तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे इति श्रुतेः। वेदः सकर्तृकः वाक्यत्वात् भारतादिवदित्यनुमानाच्च वेदस्य सकर्तृकत्वावगमात्। स्मर्तारि इति स्मृतिः सदृशपरा, स्मृतिर्यथा स्वसमानविषयावाक्यापेक्षा तथा वेदः कल्पान्तरीयानुपूर्वी वा नित्यस्यान्यत्र निर्णीतत्वादित्यलं विस्तरः। तस्य चेश्वरस्योपासना श्रुतिस्मृत्याद्य–नुसारेणानेकधा महद्भ्योऽवगन्तव्येति पल्लवेनालम्।। ।।

बालबुद्धिप्रकाशार्थं पदार्थानां प्रदीपिका।
रङ्गोजीभट्टपुत्रेण कोण्डभट्टेन निर्मिता।।

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणरङ्गोजिभटात्मजकोण्डभट्टकृता पदार्थदीपिका सम्पूर्णा।। ।। श्री लक्ष्मीनारायणाय नमः।

यत्तादात्म्यस्फुटपरिचयोत्पादना यार्द्धदेहं।
गौरी हरिरपि यदीयार्द्धदेहं जहार।।

अत्युदामापरिमितगुणग्राममीशंतमाद्यम्।
वन्दे यस्मादमलमतिभितेमोक्षलक्ष्मीः।।

रघुवीरकृतद्रव्यसारसङ्ग्रह, लोकनैः।। सन्तःश्चरन्तु निशंकं सिद्धान्त सिद्धवर्त्मसु। अत्रसकल शिष्टैर्ग्रन्थादौ मङ्गलस्यापनिबद्धत्वादादौ मङ्गलफलविचार्य्यते।। अत्र केचिन्मङ्गलं समाप्ति फलकं समाप्तन्याफलकत्वे सति सफलत्वादित्यनुमानात् मङ्गले समाप्तिफलकत्वसिद्धिरिति समाप्तिरेव मङ्गलस्य फलम्। न चोपदर्शितानुमाने हेतु विशेषणासिद्ध्या न किञ्चिदेवदिति वाच्यम्। मङ्गलं समाप्त्यन्याफलकं समाप्ति फलभिन्नत्वे सति या शिष्टैः कर्तव्यत्वादित्यनुमानान्मङ्गले समाप्त्यन्याफलकत्वसिद्धौ उपदर्शितहेतु– विशेषणासिद्ध्यभावात्।

।। इति।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

समीक्षा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

The Language of the Gods in the World of Men

The Language of the Gods in the World of Men-Sanskrit, Culture and Power in Premodern India-Sheldon Pollock, Permanent Black, New Delhi 2006

In *The Language of the Gods in the World of Men,* Sheldon Pollock attempts a reassessment of the cultural and literary history of 'pre-modern' India, covering two millenniums. Pollock in a sense also creates a history by this. To quote his own words 'doing History cannot and should not be separated from making history' (p. 570)

The book is a first of its kind, in the sense that it makes a post-modern analysis of the pre-modern world, focussing upon the growth of Indian literature with reference to what Pollock calls Sanskrit cosmopolitanism and vernacularization. References and views from Bakhtin, Heidegger, Gramschi to R.C. Majumadar, Ranjit Guha are cited, and also criticised to redefine the processes of 'culturation'. European colonialism has been termed as globalization in its harshest form (p. 578), and elements of European modernity in Indian pre-modernity have been unearthed, and the process how they provided stimulus to modernity is hinted upon.

Knowledge and language are two things that have been most emphasised over in this book. Pollock quotes Śaṅkarācārya—*"Two persons may perform the same act, both the one who understands and the one who does not. But understanding and ignorance are different, and what one performs with understanding becomes far stronger than what one performs in ignorance."*

What difference does knowledge make? This book itself provides a right answer - knowledge stands as a caution and warning to erring humanity. This is exactly what Pollock does after writing about 600 pages of his enormous work - he sends a note of warning and caution to India and the western world with regards to their understanding of civilisations and history.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

Alongside history, Pollock recreates geography by recounting how Sanskrit cosmopolitism created their own world of cartogram for Indian masses through their concepts of the *Vṛttis, Pravṛttis, Kāvya-puruṣa* etc. The concept of *Tīrtha* however is significantly missing from this account. But the judgement pronounced on the western understanding is absolutely unerring—"To claim then, as it is so often claimed, that geographical unity of India is creation of the British mapping of their empire, is historically shallow as it is conceptually naive" (p. 557). How different is this statement from the postulaion of Indian intellectuals who still believe that despite many evils of British Raj, it gave us a geographical unity which had been missing in premodern India.

The tools and concepts through which history of India is being studied have been questioned. "The notion of legitimation, along with Sanskritisation, ethnicity, linguism, and cultural naturalism are not only obstacles, that modem western theory places in the way of understanding pre-modern India. Two other analytical frameworks are even more obstructive, the one that frames India as the civilisation it always was, and the other that frames it as the nation it never could be." (p. 524)

It is a warning and a call for India to look within once again and understand herself, a millennium of cosmopolitanism through which India made a world history and then another millennium of vernacularization through which we discovered regional identities and new aesthetics - both these have now culminated into a narrow world; a very narrow and vitiated concept of hindutva on one hand, and even more dangerous concept of regional identities on the other.—"hindutva is a perversion of India's great cosmopolitan past" says Pollock. On the other hand an entirely different, and very aggressive vernacularism is rising up in Assam and other parts.

Pollock shows here how language creates History. For the fIrst time we have a fascinating and authentic account of history being made through language and its aesthetics, imbibing the 'essentialisation of literature' and the primacy granted to writing (p.5) in India, so that we can also find a post-modern attestation of what Rājaśekhara says in his *Kāvyamīmāṃsā*

kavivacanāyattā ca lōkayātrā, saiva niḥśreyasamūlam

The world depends on the speech of the poet and that is the base for salvation.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

The work is a unique elaboration of 'trans-regional culture-power sphere of Sanskrit.' Sanskrit never sought to theorise its own universality. There was something central in it that made it cosmopolitan. It was thus a "universalism that never objectified, let alone enforced, its universalism" (p. 12).

Pollock furnishes a convincing account of the process of emergence of 'a linguistically homogeneous and conceptually standardised form of Sanskrit political poetry' (p. 122) all across the subcontinent. This emergence, a startling phenomena, led to the development of a common culture throughout South East Asia amongst the people belonging to diverse societies, speaking different languages and living different life styles. This transformation occurred without enforcement of military power, without any pressure of an administrative or legal apparatus. It was the conquest of Sanskrit thought and Sanskrit culture - uniform throughout the vast peninsula, and it is unparalleled in history.

Sanskrit Cosmopolis cast an ever lasting impact and dominated the socio-political and cultural scenario in South East Asia for more than a millennium. The ruling elites found it a vibrant medium for propagation of their power. Sanskrit was never adopted for day to day use, it was used to articulate a form of political consciousness, it became a tool for celebration of 'aesthetic power' unravelling 'an important chapter in the story of human thought and action' (p. 30).

The transculturation of South East Asia was never a work of colonisers and invaders, it was carried upon by monks, traders and adventurers, and also it was never imposed upon, because 'those who participated in Sanskrit culture chose to do so, and could choose to do so' p. 571

Pollock examines the interrelationships of religion, literature, culture and power through these two millenniums. He demolishes the structure of prevalent notions. Religion did not really legitimise the power, it merely invested power with a ritualistic or ceremonial status. Culture could create 'aethetisation of power', playing a positive role towards ennobling the political life. Literature, along with these, became a vehicle of cosmopolitanism.

The concept of *Cakravartī Kṣetra* is adopted in rhetorics and *Alaṅkāraśāstra* to define *Rītis, Vṛttis,* and *Pravṛttis*. On the other hand Kāvya provides a stimulus to the rulership and the governance. In this way, during a millenium of history, Sanskrit transformed itself to

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

transform the social life of large part of the world, and this transformation 'constitutes one of the most momentous events in the history of culture and power in Asia. It is also one of the least discussed and unsurprisingly, the least understood' (p. 39).

By the whole analysis Pollock presents a fine definition of culture itself - `all culture is transculture' He also demolishes the idea of little traditions and local cultures, as envisaged in modem Anthropology. .

Pollock presents excellent critique of French philologists; they failed to understand the process by which Sanskrit culture was being inculcated through the form of panegyric; and they found the vast mass of inscriptional literature in Sanskrit from South East Asia empty of historical material and rich in matter devoid of interest for them. (p. 147). However Sanskrit culture never became a tool for polity. It defined and regulated polity. The whole thesis of Pollock is an exposition of this fact.

For the first time the book establishes the idea of 'inscriptional aesthetics' (p. 249) where epic and history go along together, locality and transregionality join hands. History is presented in terms of metaphor. V.S. Pathak in his thesis on Ancient Indian Historians had already presented the indian view of History as reflected in the Historical epics. The King is uplifted from spacio-temporal constraints, so that history becomes 'Itihāsa'

To Pollock, Sanskrit seems to have been born transregional 'it was at home everywhere and perhaps in a sense at home nowhere'. (p. 262). It also adopted ideas from european culture, texts from Greek were translated in Sanskrit. (p. 265)

Sanskrit became culture, what were its' tenets? Pollock enumerates them as trans-locality, transethnicity, expressive power and aesthetic resources as well as dignity and stability conferred by grammar. (pp 254-55) The aetheticization of political power stands in sharp contrast with modem notions of Walter Benjamin. (p. 258) Inscriptional and epigraphical records are cited here to prove that grants were made by kings for recitation of Mahābhārata.

Modem pundits and scholars who wrote histories of Sanskrit have not paid attention to most amazing facts of the history of Sanskrit language - for example, its appropriation by the Śakas - for public political purposes. This is a charisma to Pollock, which does not have a prehistory.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

A major part of the book is devoted to the most important treatment of vernacularization that heralds beginning around tenth century. The whole exercise is done in comparison to the movements all over the globe and with gleanings from the history of world literature. Pollocks's studies here assume a unique character because of this comparative perspective. Latin imperialism posed a threat, tended to eradicate dialects and multilinguality, and vernacular paranoia arose in a desperate attempt for survival. On the other hand in India, vernacular cultures were invented even by those who were adept in Sanskrit learning. Also those who were writing in vernaculars could as well write in Sanskrit, but they chose a regional language for distinct vernacular aesthetics.

In V chapter, Pollcok turns to the inter-cultural dialogue between Sanskrit and vernaculars. Study of Sanskrit Kāvyas as well as the texts on rhetorics was zealously taken up. This led to the composition of aesthetics in vernacular literature, and the texts like *Siyabasalakara*, *Kavirājamārga* (Kannaḍa) *Taṇḍīyālaṅkāra* (Tamil) were prepared. Pollock draws comparative study of Sanskrit texts and these texts in vernaculars, (a task that should have been done by Indian scholars) and concludes that Daṇḍin's Kāvyādarśa is 'probably the most influential work on literary science in the history after Aristotle's Poetics'. Similar is the case with literary traditions in South East Asian countries where lexicons based on that of Amarasimha and texts on Metrics based on Piṅgalaśāstra were prepared. The examples can be further multiplied if we take into account the text o Polity and Economy, where Kauṭilya, Manu and Śukra were emulated. Everywhere Sanskrit provided the conceptual framework and a solid foundation for power.

Why Sanskrit became a powerful medium for power? Pollock sees the answer in Vedic seers' concern for language, which has continuity in Brāhmaṇas and in the text of Pāṇini and other grammarians.

The book furnishes an interesting account of localisation of cosmopolis, and amalgamation of indigenous and perennial. The accumulation of styles (Rītis) with new Rītis being added to the threefold division - *(Vaidarbhī, Pāñcālī, Gauḍī)* like *Lāṭī, Avantī, Āndhrī* etc. is an example (p. 219). "Regional differences are part of the repertoire of a global Sanskrit and thus constitute a sign precisely of Sanskrit's trans-regionality." In this way, local colours assume the character of translocality, and Sanskrit pervades in the local space. After tenth century there came a phase in which 'Sanskrit literature inaugurated

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

vernacular traditions almost everywhere' (p.396) in India and South East Asia. Local cultures started emulating Sanskrit cosmopolitanism and also replacing it. A vernacular transformation of culture happened. After this, there comes a phase of independence, where the vernaculars tend to design their own agenda of aesthetics and culture. 'The corelative relationship between rule and instance was turned upside down.'

Pollock cites interesting examples to prove the Power's concern with grammar and grammar's concern with power, In a royal inscription, *Varṇasthiti* of language is treated at par with Varṇasthiti or social order, and kings practiced grammar for glory (p. 176-83). It is with these references that Pollock recreates the process that has been termed here as 'culture-power-formation of the cosmopolis'. These mutual concerns were not just superficial interconnections, they were based on a deeper idea of the order of things; grammar world view is also for self discipline and so is policy, in the words of Kauṭilya *Kṛtsnaṃ Śāstramidamindriyajayaḥ* - the whole discipline is conquering one's own sense-organs. This is possible through the realisation of a world view that is grounded in local reality and yet looked beyond it. Pollock rightly reproduces the formula for the resolve *(Saṅkalpamantra)* used in worships, in giving alms and other occasions. Because of this Varāhamihira is able to rationalise the whole mythical account of Indic space into a scientific presentation of Indian Geography and Topology.

Pollock's book has become a repository of very revealing and significant instances from History of South Asia and South East Asia to prove the subtle links between literature, language, grammar on one hand and Governance, polity and administration on the other. As a result things which may appear quite fantastic and unimaginable now happened. In China, mastery of the recitation of a particular poetic form becomes essential requisite for Civil Service. In Thailand, princes are taught Sanskrit Prosody. Ability to compose Tibetan poetry based on Daṇḍin's principles' became a requirement for Government service under the regime of V Dalai Lama in Sixteenth Century.

Who else but Pollock who could have drawn lines of distinction between the expansion of Roman empire and Sanskrit Cosmopolitanism?. The frames of both are so different. Ayōdhyā is recreated in Thailand, Indonesia and other countries. Gaṅgā is rediscovered by transfoming a local river. This transformation of local space was impossible in the process of expansion of Roman empire. In this way, Pollock has created a new discipline for study -'Comparative Cosmopolitanism'. In the History of Mankind, Diverse have been the

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ways through which culture relates itself to power all over the globe. Along with the complex process of literization and literarization, emergence of vernacular political discourse and complimetarity and replacement between Sanskrit cosmopolitanism and vernacular cultures, this book furnishes accounts of the moments of transition in the history of power.

A new cultural modality emerges with the process of vernacularization. Pollock places Sanskrit Cosmopolitanism and vernacular cultures in juxtaposition, the process of borrowing is explained, the Maṇipravāla style being adopted not only in Malayalam, but in Tamil, Telugu, Kannada and in almost all the vernaculars of Northern India. And this happened not only in India, but many countries of South East Asia. A fusion of transregional and regional happened. Sanskrit Universal assumed local habitations and names. *Kavirājamārga* in Kannada becomes an excercise in the localisation of global poetics (p. 345). This tremendous excercise of retaining Cosmopolitan distinction and at the same time maintaining vernacular identity, has been unique in Indian History. The rootless and placeless cosmopolitanisn acquires regional characteristics. This is illustrated here by adoptation and connotaions of many words like Kannada (Karṇāṭaka) meaning the culture land of the black soil and Nadu etc. (p. 354) Language names thus come closer to ecological situation and culture.

Some times there are sweeping generalisations, conclusions are derived on the basis of inadequate evidences with significant omissions in this brilliants treatise. Pollock has himself admitted these drawbacks considering the enormity of his task and vastness of the material. The whole exercise, brilliant though it is, is marked with a tendency to reduce aesthetics into something 'profoundly historio - political.' Plays are state-play's, all the long poems are 'poetic cronicles', accounts of royal victory or success (caritas, vijayas or abhyudayas)'. Pollock has missed some pertinent features of the process of interaction between Sanskrit cosmopolitan and the regional-cum-vernacular. Jayadeva's Gītagōvinda could not have been possible without assimilation of the meters and rhythm of vernacular poetry. Interaction with vernaculars led to emergence of new genres and movements in Sanskrit literature. Addahamana or Abdul Rahaman composed his Sandeśarāsaka. Vidyāpati was writing in Sanskrit, Maithili and Apabhrimsha or Avahatta. His Padāvalī in Maithili echoes the rhyme and diction of Jayadeva's Gītagōvinda. The tradition of Uparūpaka continued. Sanskrit theatre enterred in a new phase as a

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

result of this interaction with oral traditions of vernaculars. Vidyāpati has also written Gōrakṣavijayanāṭaka. Host of pundits poets of Sanskrit joined new movements.

What the tradition of Uparūpaka did in Kashmir, Kāmarūpa (Assam), Mithila and in various regions of Madhyadeśa, was being done in South through Kūṭiyāṭṭam, and in many other parts of the country through the dramas of Kīrtaniyā style. Therefore, the assumption that 'Sanskrit never localised and its literature failed to assume local habitation' (p. 49) needs reconsideration.

It does not seem quite correct to say that even though the political poetry of Sanskrit transformed the whole cultural scenario,'the theoreticians of Sanskrit literature ignore it completely-Praśasti is never discussed in analysis of literary art in general or a genre in particular." Alaṅkārāsaṅgraha of Amṛtānanda is an important text on Poetics. It gives. a detailed treatment of Praśastikāvya as a form of poetry. The concept of Vyājastuti and a number of stanzas that text like Kāvyaprakāśa of Mammaṭa cite as examples (of course without naming the poets who eulogise and the king that has been eulogised) speak how dominant has been the effect of form of Praśasti. In fact the theoreticians support the contention of Pollock, rather than willfully neglecting the reality of it.

'Literature in India began when the language of gods entered the world of men' (p. 75). This assumption is based on the distinction of Veda from Kāvya, ignoring the fact that Veda defines itself as Kāvya and the seers of Veda are said to be Kavis. It is true that the term Kāvya there has a connotation quite different from Pollock's usage of it. But to deny their relationship and the prevalent notion *Sarvaṃ Vedāt Prasiddhyati* tends to creating imaginative compartmentalisation in traditions. Pollock stoutly denies even a continuum of Veda in Kāvya literature, or even the occurrence of Vedic effect in Kāvya, 'to which much Kāvya any way shows complete indifference" (p. 77) and that Veda could never be viewed as Kāvya in the whole tradition. (p. 76). On the basis of an excerpt from Abhinavagupta, he presumes that the hymns of Veda were never thought of as Kāvya before modernity.(p. 5).The argument is forceful, and very aptly supported by one tradition too; as well as the citation from an authority like Abhinavagupta. But then, there are other traditions as well that should have been taken into account. We can wonder how Pollock can forget Rājaśekhara who almost at the same time when Abhinavagupta was writing, builds an equally strong case for viewing Veda as Kāvya.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

The regard for supremacy of Sanskrit language and viewing of local dialect with contempt is evident from several references that Pollock has so meticulously provided here. But to stretch it to such an extant to that 'This strict and narrow interpretation of three language formula, so to call it, is corroborated by the literary history of Sanskrit epoch" (p. 99) is questionable again. Works like Śukasaptati and Bharaṭakadvātriṃśikā, that are replete with vernacular idioms, diction and terminology, could not have been possible had there been a contemptuous outlook for emerging vernaculars.

The emphasis in whole of this treatment of Sanskrit Cosmopolitan has shifted so much to translocality that the adaptation of regional traditions in Sanskrit literature has been overlooked. Pollock maintains that 'literature cannot be local in the thought world' of Sanskrit (p. 408). The emphasis then has shifted in this book to the gradual separation of vernacular literature from Sanskrit Universal. There are no references to Madhusūdana Sarasvatī, Vallabhācārya Rāmānuja, Rāmānanda, Yāmunācārya, and a host of others who built stable bridges between the Śāstra and the regional literatures, and who commanded an equally overpowering respect in the regional/vernacular world as well.

There are very rare references, like to works such as — *Nītivākyāmṛtam* a text on polity composed by Somadevasūri the well known author of *Yaśastilakacampūḥ*, and how the text remained relavant even after five centuries; and a host of works illustrating vernacular resurgence-viz-*Pharīdabānī* of fifteenth century, *Candāyana* of Daud etc.

One can also wonder why the great poets of Classical Sanskrit tradition - Kālidāsa, Bhāravi, Māgha, Bāṇa and Bhavabhūti and then Rājaśekhara etc. have ben excluded from this magnificient analysis. That they made their own marks on the social fabric is a proposition that should have been considered here.

There are also certain misrepresentations and wrong connotations. The word Adhikāra is taken to mean 'right', whereas it would mean either the duty assigned to one (Adhikriyate Asmin Iti) or the ownership of the outcome of the whole plot (Adhikāraḥ. Phalasvāsmyam-DR.) Nowhere in the tradition the word dharma would simply mean only 'sacrifice' as assumed here (p. 51). *Pravṛtti* a technical term in Nāṭyaśāstra translated here as fashion (p. 206); it could be better understood as tendencies. The line from Mahābhārata-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

arthasya puruṣō dāsō dāsāstvarthā na kasyacit

has been translated as

'Man is a slave to power, but power is slave to no one'.

To translate *artha* simply as power is, we can say, Pollockian interpretation.

Certain notions arduously postulated by the European and American Indologists have percolated in this otherwise very brilliant study also. The periodicity of Kālidāsa is still open to debate. Pollock has just placed him in Gupta period and accepts the influence of the style and usages of Allahabad inscritpion on Raghuvaṃśa Similar is the case with the date of Patañjali's and some other authors.

Sometimes there are sweeping generalisations, viz.—'Vāmana's theoretical prioritization is not matched by any new analytic insight"—is a remark the validity of which becomes doubtful considering the even modem studies on Vāmana.

The whole thesis rests on insistence on Kāvya with historical political background. The traditions of *Gāthā* has been overlooked. The Mahābhārata refers to and quotes the Gāthās of Śukra Kavi and others. It is not right therefore to say that there is no evidence of Sanskrit poetry available prior to Vālmīki's Rāmāyaṇa (p. 48). Pollock would also deny existence of Kāvya in last centuries of B.C.E, considering the periodicity of Mahābhāṣya doubtful. Pollock presumes that the earliest literary work that also unavailable now is that of Bhartṛmeṇṭha (pp. 80-81) and that even literary theory is not well organised before sixth century AD. He has ignored *Padyacūḍāmaṇi* Mahākāvya--, a fine specimen of poetry composed in 3rd-4th century AD, which is available also.

In some places, the subtle nuances of the concepts are missed. Pollcok simply assumes that the term *adoṣau* as used in the definition of Kāvya in the tradition of Alaṅkaraśāstra merely means grammatically flawless, and then he would give a verdict how grammar has been authenticating and authorising literature in this tradition (and not *vise versa*). *Adoṣau* does not simply mean the insistence on grammatical correctness, it has social, moral and cultural considerations for literary compositions. It is true that the Ācāryas of Alaṅkāraśāstra have always vouched for grammar (in a wider sense where grammar means world view and life style), but there are paradigms where violence of grammar (in the narrow sense where the correctness of words only counts) is

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

supposed to be a quality. Ānandavardhana has explicitly said that norms (Lakṣaṇas) follow the Lakṣya (the instance), Pollock's reversal of this very norm by making norm preceding its embodiment to prove the prerequisite of grammar is not universally applicable in Sanskrit.

Pollock agrees that the tendency to reduce culture to power and power to culture forms the dichotomy of our age. Sanskrit cosmopolitan envisaged a different type of relationship between the two. This is the holistic view. It is here that he draws sharp distinctions between the spread of Latin in Europe and spread of Sanskrit in South East Asia. The whole exercise has been made to seek alternative philosophy of culture and power for our times and for future of human race. "A story is told about the great ascetic Śaṅkara, how by leaving his own body and entering into the corpse of the dead king Amara, he was able to reanimate him long enough to learn the ways of love. In the same way, if we can enter into these languages in some deep way, by acts of critical philology, historical sensitivity, and reflexive interpretation, they may be able to tell us something about the ways of life for our future." (p. 36).

The whole treatise of Pollock is an outcome of this grand design and vision for future.

Radhavallabh Tripathi

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली
CC-0. Nepal Sanskrit Academy, Kathmandu Collection